ORISSAN ORIENTAL TEXT SERIES (SANSKRIT) -21

MUKUNDAVILASAMAHAKAVYAM

BY

JATINDRA RAGHUTTAM TRITHA

(WITH PRAKASIKASIKATIKA)

EDITED BY

DR. BHAGABAN PANDA, M. A.

Sahityacharya

EDITOR,

DIRECTORATE OF CULTURE

ORISSA, BHUBANESWAR

ORISSAN ORIENTAL TEXT SERIES (SANSKRIT)-21

MUKUNDAVILASAMAHAKAVYAM

BY

JATINDRA RAGHUTTAM TRITHA

Published by

DIRECTORATE OF CULTURE,
ORISSA, BHUBANESWAR-751014

FIRST EDITION-1000

1989

PRINTED BY

Sarada Press, Berhampur
Shree Maa Printers, Bhubaneswar

PRICE-Rs.

ओडिशा संस्कृति निर्देशालयेन प्रकाशितम्।

प्रथममुद्रणम् – १०००

१९८९

शारदा प्रेस, ब्रह्मपुर
श्रीमा प्रिण्टर्स, भुवनेश्वर
मुद्रणालयद्वये मुद्रितम्

मूल्यम्—रू

Introduction

Śrīgītagovindaṃ, a famous classical work composed by Kavirāj Jayadeva, during the reign of Rājarāja (Kāmārnava) Deva (1147-1156-AD) the Gaṅga ruler of Orissa[1], had been imitated by the large number of poets in different parts of India during the last seven hundred years. Out of the sixty four imitations, Known sofar, Orissa has coutributed nineteen works which include seven complete lyrical Mahākavyas similar to Gītagovinda mahākāvyaṃ in many respects.[2] This Mukundavilāsamahākāvyaṃ by Jatīndra Raghūttama Tīrtha, is one of them. It is so far accepted chronologically as the third imitative Sanskrit work of Orissa being preceeded by Abhinavagītagovinda-mahākāvyaṃ of Gajapati Purusottama Deva (1466-1497-AD) and Rukmini-parinayamahākāvaṃ of Nārāyaṇa Bhañja Deva (1473-1534-AD).[3] This work of great literary significance Mukundavilāsaṃ is now being presented before the scholars and readers for the first time.

Description of manuscripts :

This edition of Mukundavilāsaṃ is based on the following four manuscripts which are noted under 'Ka', 'Kha', 'Ga' and 'Gha'.

---

1. History ot Orissa-Dr. H. K. Mahatab-vol-I, 1959 P-211-212.
2. Sri Jajadeva O Sri Gitagovinda—K. N. Mahapatra, 1973. P-299.
3. These two have been published, by the Directorate of Culture, Orissa and 1974 respectively.

Ka. Cat. No. L. 182

This is a palm-leaf manuscript in the collection of the manuscript library of the Orissa State Museum. It contains 16 folios each with six lines of writing in Oriā characters The size of each folio is 37 4 x 3 7 C. M. This was collected from Narasinha Mishra of Gadamānatri, P. S. Begunia of Puri District in 1960. This manuscript is worm-eaten and incomplete. The text ends with the fifth 'Pada' of the thirty sixth Prabandha in the 12th canto. There in no colophon nor the name of the scribe at the end. But the first verse of the 12th canto which is noted below may be taken as colophon to the work -

ग्रहवसुशरचन्द्रोन्मानवर्षान्तिमेऽब्दे
क्षितिपतिकुलमौलौ क्ष्मापते श्रीशकस्य ।
वसुरसऋषिवेदैः सम्मिताब्दान्तवर्षे
समजनि कलिकालस्यैष काव्यप्रबन्धः ॥

From this it is known that the work had been completed by the author in kaliyear 4763 or Saka year 1589 or 1667-AD The year of the copy of the manuscript is assigned to the middle of the 18th. Century A D.[1]

Kha. Cat No Sms. 55.

It is a paper manuscript in the collection of the manuscript library of the Orissa State Museum, containing 171 pages each with 9 to '9 lines of writing in the Oriā scripts. The Size of the paper is 32. x 19. C M. The manuscript was collected from Gopinatha Panda of Usuna, Rahania in the district of Cuttack in 1966. The text is complete. It has a commentary called 'Prakāsikā. Many letters and words are missing in different parts

1. OHRJ Vol. IX. No. 1 & 2, 1960, P-30

of the commentary for which it was very difficult to decipher the writing There are no colophon nor the name of the scribe at the end of the manuscript.

Ga. Cat. No. L. 222.

It is a palm-leaf manuscript presevedin the manuscript section of the Parija Library Utkal University contain 67 folios each with 8-9 lines of writing in the Oriā Characters The Size of each folio is 25.3x4.2 C.M. It was collected through Sri Sadasiva Ratha Sharma of Puri in July, 1962. The text with the 'Prakāsikā' commentary is complete. The manuscript is worm-eaten for which the text as well as some portions of the commentary have been lost. It has the same colophon as in the 'Ka' manuscript. No name of thc scribe is mentioned at the end.

Gha Cat. No. nil

This is a palm-leaf manuscript in the possession of pandita Sri Srinibasa Rath At and post sanara in the district of Cuttack. It contains 38 folios eaeh with 4-5 lines of writing in Oriā scripts. The Size of the manuscript is 30x3 C. M. It is severly worm-eaten and some folios have also been broken. This has the following colophon at the end in adition to the verse mentioned in the 'Ka' and 'Ga' manuscripts.

X X X

धन्याः वाणपुरीविप्राः धन्यस्तत्प्रभुरप्यसौ ।
यैश्चिरं वाङ्मनकायै रसभाणि ... ... ॥
हरिमणितनुशोभाः कामदाः कामरूपाः
रुचिरतर ··· मनुलोचनाः रोचमानाः ।

X X X

... ... सन्ततं वः ॥

There is also a post colophon note "अत्रश्लोका: २१९ । गाथा:-७६" from which it is known that the number of verses and songs of the work are 219 and 76 as against 208 and 38 respectively. The name of the scribe is not mentioned.

Poet Jatindra Raghuttam Tirtha

Poet Raghūttama was a Sanyāsi as is known from the introductory verses of his work under discussion[1]. From the epithets used before and after his name in the colophon at the end of each canto it ts ascertained that Raghūttam was probalely the head of a subsect of the sampradāya Saṅkara-philosophy preached by the great Saṅkara. In the middle of the 8th. Century, when the whole of India was passing through religious decadence the great saint Saṅkara rose to eminence. He saved the Hindu India from a tragic disaster by establishing four Pithas or religious centres at Puri, Dvârakà, Mysore and Vadrikā in four different directions of India. Four Mathas Viz Govardhanamatha, Sṛṅgerimatha, Saradā matha and Jyotimatha were established in those four places respectively. The Govardhanamatha at Puri was intended for religious movement among the people of Eastern India. After the great Saṅkara, four mothas were adormed by his four disciples named Padmapāda, Hastámalaka, Sureśvara (Mandana) and Totak at Puri, Dvārakā Mysore and Vadrikā respectively.[1] "The two disciples of Padmapāda had the designations Tirtha and and Aśrama, the two disciples of Hastāmalaka had the designations Vana and Aranya, the three disciples of Mandan had the

1. Sri Sankaracharya (Hindi) Prof B. Upadhyaya, Allahabad, 1963. P-173

appealation Giri, Parvata and Sāgara and three disciples of Totalla had the designations Sarasvatī, Bhāratī and Puri."[1] The adjectives Jatīndra of Tīrthapāda used with the name of the poet indicates that he was a head of monastery of Tīrtha subsect. Sri K. N. Mahapatra, a reputed scholar of India, observes that the poet Reghūttama Tīrtha may tentatively be taken as the head of the famous Govardhanmatha of Puri where the presiding deity is Srī Gopāla.[2]

But from the internal evidences furnished by this mahakarya it is known that the poet Raghūttama was hailed from Achyutapur situated under the then Banapur ex-State and composed his 'Mukundavilāsam' before the presiding deities Daskeśa-Bhagavatī on the bank of Sālavati or Sāliā river as is called now.[3] Achutarājapur or Achyutapur a Brāhmana Śāsana was established by Achyutarāja Mansimha, the Rājā of Banapua in 1650-AD. His son Jagannatha Manasimha, reigned from 1657-1736-AD during which the temples like Umamaheśvara (Balugan), Simhanātha (Simhesvara), Harihareśvara (Nairi), Daṣkeśvara or Daṣka-prajāpati (Banapur), Kaliyugeśvara (Ghiakhala), Kapileśvara (Achyutarajapur) and Kāliāi (Chilikai were built by him.[4] Sri Jagannātha Deva referred by the poet may be accepted as Sri Jagannātha Harichandana, the Rājā of Banāpur.[5] From the colophonic verse cited under the manu-

1. OHRI Vol. IX. No. I & II P-30
2. Ileip. P-31
3. Mukuudavilasam-Canto XII. Verse – 28
4. Banapur (Oriya)-Dr. R. C. Panda-Part-I National Press, Puri.
5. Mukundavilasam - Canto - I Verse-18

script description it is known that this mahākāvya was completed in 1667-AD. Besides no other information is available form the work. But from the above it can tentatively be decided that the poet Raghūttama Tīrtha was flourished in the first Quarter of the 17th. century AD.

Substance of the work—

CANTO-I

(Gopīpūrvānurāga)

The poet first pays homage to Rādhākṛṣṇa and Sri Jagannātha of Nilāchala Verses-1-4). Then the aims of the composition, praises to soholars, name of the work, importance of the work and the place of composition are described (Verses-5-18). Jagadīśa Viṣṇu is all in one (Verse-19,Pravandha-1) and he had come down to this earth as Mīna, Kūrma, Śūkara, Narahari, Vāmana, Paraśurāma, Rāma, Balarāma, Buddha and Kalki to save this world (Prabandha-2). But these incarnations are nothing than illusion created by an actor like Kṛṣṇa who keeps enchanted the hearts and minds of the milkmaids (Verse-20-26).

CANTO II

(Gopīvagvilāsaprakāśa)

The Gopīs talk about Kṛṣṇa before Rādhā who also expresses her pangs of separation when she saw him at the bank of Yamunā (V-1. P. 3-4). One female companion realises the state of Rādhās mind and informs about Kṛṣṇa's love for Rādhā who also expresses her hearty love openly (V-2-4.P.6). The other ladies tell about their experience on Kṛṣṇa who the best of all, lives in the hearts of the Gopīs (V. 5-15. P. 7-8.

CANTO - III

(Nāradopadeśa)

The Gopīs talk very often about Kṛṣṇa to lessen their pangs of soroows. Nārada comes on their resque. He advised them to think on Kṛṣṇa who is not other than Parambrahma or highest goal of this worldy life and starts singing. At this Gopīs lost their outer action (V - 1 - 17. P 9). Nārada advised again, to get Kṛṣṇa, worship Harapārvatī who fulfil the wish of their devotees. All should always think one God without any thought of division and distinction. Nārada then disappears keeping the ladies astonished (V-18-26. P. 10)

CANTO-IV

(Gaurī-Śaṅkarapujanaṃ)

As advised by the sage Nārada, the Gopīs worship Śiva and Pārvatī everyday and observe various austerities in the month of Kārtika. They sing the strotras in praise of lord Śiva and Goddess Pārvatī to get Kṛṣṇa as husband of own (V-1-16. P. 11-14).

CANTO –V

(Govindapūrvānurāga)

Kṛṣṇa's mind becomes impatient for Rādhā's union. He tells Subala about the beauty of beloved and requests him to device the ways to get her (V-1-11. P-15-17). Then Subala consoles Kṛṣṇa and advices him to proceed to the bank of Yamunā where the Gopīs are worshipping the deities(V 12-15)

CANTO – VI

(Gopī pattāpaharanaṃ)

Kṛṣṇa with his friend Subala reaches at the shore of Yamunā and looks at the Gopīs who are in neckdeep water. Then Kṛṣṇa takes their cloths and climbs the Kadamba tree. The Gopīs see the incident and tell Kṛṣṇa about the impropriety he has done (V-1-8. P-18). But Kṛṣṇa charges them for their misdeeds and directs them to comeout of the water with folded hands on the forehead to get the cloths returned. This was done atlast. Kṛṣṇa left the place to see his cows and Gopīs to their own houses (V-9-22 P. 19-21).

CANTO—VII

(Govindagopī kamoddīpanaṃ)

The pinning Gopīs leave their daily work. They feel restless till they see the lover Kṛṣṇa who with the cows in the evening comes back in the forestpath (V. 1-8. P. 22). Afterwards though they go back to their houses, can not sleep in the night (V. 9-11).

CANTO—VIII

(Gopīvirahaprajāgaraṇam)

Rādhā expresses her dejection before her companions. Then all sing the glory of Kṛṣṇa (V-1-5. P. 23-25).

CANTO—IX

(Mukunda-Virahanatanaṃ)

In the early morning Kṛṣṇa with Rāma, Subala and other gopālabālas left for the forest where the dear friend Subala sings a song on the beauty of the nature (V-1-8 P-26).

At this Kṛṣṇa expresses his pangs of sorows for Gopīs. He roams on the sand of Yamunā and with the friends takes evening bath in the river (V. 9-15. P-27). The Gopis see the water sports of Kṛṣṇa and sing his glory. Atlast one of them being impatient approaches Kṛṣṇa who consoles her (V. 16-18 P. 28)

CANTO-X

(Gopigovindvāgvilāsārambha)

Kṛṣṇa plays the flute at the kadaṃba tree and the Gopis in the half makeups rush to him (V. 1-2-P-29). But cruel kṛṣṇa behaves them roughly for which they pray him to save their lives (V-3 8. P.30-31)

CANTO-XI

(Rāsavilāsa)

Rāsalila starts at the end of which all go into Yamunā (V. 1-16. P-32-34).

CANTO-XII

(Jalakṛīda)

Jalakrīdā starts. The Gopīs are provided with celestial cloths by Kṛṣṇa They sing the glory of kṛṣṇa (V-1-28 P. 35-38) In the concluding verses (V-29-30) the author gives his identity and date of completion of the work.

Critical Appreciation -

(i) Background of the work

There is no doubt that the 'Mukundavilāsamahākāvyam' is a lyrical kāvya which combines in itself the elements of drama, music and dancing. It is poem .which touches the

inermost cords of the human life, mind and heart giving a lasting sense of delight. It is an expression of the best thoughts noblest emotions which the spectacle of life awakes in the finest souls in beautiful form and melodious language. It is composed according to the definition of mahākāvya as given in various works of poetics. [1]

In Orissa prior to the work of the poet Raghūttama, three works namely 'Gitagovindamahākāvyaṃ' by Kavirāja Jaya Deva, 'Abhinavagitagovindamahākāvyaṃ' by Kavi chandra Rāya Divākara Misra (1450-1515 AD) and attributed to Gajapati Puruṣottama Deva (1466-1497 AD) and 'Rukmini-pariṇayamahākāvyaṃ' by Nārāyaṇa Bhañja Deva 1473-1534AD) similar to the work under discussion were in good circulation being very popular among the Orissan Vaiṣṇavas. A marked deviation from the traditional theory of love and devotion for Rādhā Kṛṣṇa took place under the great influence of 'Pañcha-sakhā' the five intimates who founded the 'Neo-vaiṣṇavism' or Utkaliya Vaiṣṇavism in Orissa. Tantra-Yoga was combined with the cult of love and devotion and Kṛṣṇa-Jagannātha was made the ultimate object of realisation according to the theory of Utkaliya Vaisnavism This was the socio-religious background in which the poet Raghūttama made a successful attempt at bringing together the presiding deities of the vaiṣṇavas into onefold and preached the theory of Advaita through his mahākāvya which thus combines the beauty of poetry with the solemnty of highest philosophy.

---

1. Sahityadarpana-Ch. VI. Verse—315-324.

As stated earlier Raghūttama was a yati by profession. He was a follower of Śaṅkara, the great mastser of Vedantic India. He was a devotee of both Śrikṛṣṇa and Śiva who are viewed together as Harihara. No doubt the author was highly erudite scholar in thə philosophy of Vedanta. He has successfully displayed his knowledge of vedantic thought through the songs & verses composed in very simple words and mellifluous rhythem. His mahākāvya has been named as 'Mukundavitāsa'[1], the literary meaning of which is "the menifestations of Viṣṇu and Śiva" who are advaita or indistinguishable and one according to the author. In the maṅgalācharaṇa, Raghūttama, has prayed to Śrikṛṣṇa, the lover of Rādhikā and depicted him as Nandasuta (offspring of delight), Guṇātīta (devoid of all quatities or properties), asaṇga (independent) and Nitya (eternal and the veritable Brahma as described in the philosophy of Vedanta[2] He also sees the five presiding deities namely Heramba (elephant head god), Dinakara (sun), Viṣṇu, Śiva and Śakti (Durgā or mother goddess) accepted in pañchopāsanā system of the Vaiṣṇava cult and Brahmā (creator) in Śrikṛṣṇa who is none else than Paramātmā the ultimate one whom the scholars, suffering under illusion or māyā, pray in different forms.[3] The God though one is two in the forms of Rādhā and Kṛṣṇa or Prakrti and Puruṣa or female and male. He is three as Brahmā, Viṣṇu and Maheśvara and four as Jagannāthā, Subhadrā, Balabhadra and Sudarśana in body of

1. Mukuandavilasamahakavyam (MVM) Canto-I Verse-15.
2. Ibid. Verse-1.
3. Ibid. Verse—2, 5, 13.

wood or Dārutanudhṛk at Puri and he is cowherd or Gopatanubhṛt at Vṛndāvana.[1] The māyā or the illusion is the cause of this usual tendency to identify the infinite with the finite to view the one as the many.

The concept of māyā or illusion is based on the fact of experience according to the inherent limitations in our sensory and intellectual apparatus. The mind influenced by avidyā or māyā views the one as many distinuished between the creator and the creations and impresed the quality of sensation on that which is beyond the limitation of senation. It breakes up the original unity of the all sensations into its component parts and reconstructs them in its own way[2] Māyā is a positive entity, a bhāvapadārtha and not the mere absense of knowledge. In the theory of advaita philosophy the Nirguna-Brahma is realised at the stage of Nirvikalpa Samādhi. It is viewed as saguna by the intellect and names and forms are imposed on it. But the absolute does not undergo any change and remains immutable quite unaffected by what we think about it.Hence the concept of Jīva and Iśvara, time and space are the creations of māyā. The author has also stated that sages call him by many names[3] as has been declared in the vedanta.[4]

---

1. MVM. Canto–I Verses - 4, 14.
2. MVM. Canto-I Vers–2
3. इदं मित्रं वरूणमग्निमाहुरथो दिव्यः स सुपणों गरुत्माम् ।
   एकं सद्विप्राः वहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः ॥ ऋग्-१.१६४-४६ ॥
4. अविद्याकृतमेतद्यदिदं दृश्यते श्रुयते वा साधनं
   साधकश्चेति । परमार्थतस्त्वेक एवात्मा अविद्यादृष्टे —
   रनेकवदाभासते ॥ Advaita vedanta-M. K. V. Iyer-1964. P-68.

II) **The aim of composition**—

The main aim and object of the poet Jatīndra Raghūttama was to preach the philosophy of advaita and Parama-Brahma or the supreme god through the medium of song.[1] One will get fulfilled in all the four vargas or the primary and ultimate aims of life through the reading of the kāvyas[2] The poet has declared that there are numerous good Kāvyas which will bestow all the three vargas viz dharma, artha and kāma, but his 'Mukundavilāsamahākāvyaṃ', as he has aspired, will give the pure knowledge that is mokṣa or Nirvāṇa and all who want it should read this mahākāvya which will fill the hearts of devotees with the eternal happiness.[3]

To illustrate his deep understanding in the philosophy of vedanta, Raghūttama prays Śrīkṛṣṇa as pure-knowledge and paramātman who like a great actor acts in all the animates and inanimates of this world and only to the fools He appears as matsya, Kūrma, Barāha Nṛhari, Kharva, Rāma, Sugata and kalkī through the norms of triguṇa ie. Satva,Rajaḥ and Tamaḥ[4] Like Śrīkṛṣṇa Rādhā has also been described as identical with Vāṇī, Lakṣmī, Bhagavatī, Sītā, Rukmiṇī and Revatī.[5] Hence the author prays, the religious leaders of the Vaiṣṇavas, Saivas and Saktas not to see and pray the Paramesvara, the undivided one separately as Hari, Hara, Srī or Kālikā, as they

1. MVM. Canto- Ganto-I Verses-5, 6.
2. चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥ सा: द: -१-२ ॥
3. MVM. Canto-I Verses-16, 17.
4. MVM. Canto-I Prabarda-I & Verses-19, 20.
5. MVM. Canto-I Verse-3 & Canto-V. Verse-7.

are all not separate but one and the supreme.[1] It has been described through the words of the gopīs and Nārada that Hari is no other than Hara and thus Hari-hara is one[2] and Śrīkṛṣṇa is Brahma Himself.[3] Most of the verses and songs are composed to preach the theory of Advaita philosophy through the narration of the love, separation and meeting of Rādhā and Kṛṣṇa and the dialogues of other companions associated with the main characters in the work.

(ii) Arrangement--

In the form and nature this Mukundavilāsamahākāvyam is an imitation of the famous Gītagovindam by Jaya Deva. The Story of Rādhā-Kṛṣṇa Rāsalīlā as described in this mahākāvya has been derived from Srīmad Bhāgavatam. The poet Raghūttama hadpresented the puranic theme in a novel way following the foot prints of his predecessors. Orissa is proud for the poet who made a significant contribution for the development of Sanskrit lyrical poetry in India The Mukundavilāsam is divided into 12 cantos like Gitagovindam The names of the cantos are (i) Gopīpūrvānurāga, (ii) Gopīvāgvilāsaprakāśa, (iii) Nāradopadeśa, (iv) Gauriīśankarapūjana, (v) Govindpūrvānurāga (vi) Gopīpattāpaharana, vii) Govindagopīkāmoddipna (viii) Gopīvirahaprajāgarana (ix) Mukndavirahanatana x) Gopigovindavāgvilāsārambha, (xi) Rāsavilāsa and (xii) Jalakrīdā. It cantains 38 song and 208 verses composed in different rāgas and metres respectively.

The songs or Prabandhas are further divided into padas which vary from 4 to 11 in number. These can suitably be called as Chatuṣpadī, Ṣaṭpadī, Saptapadī, Aṣṭāpadī, Navapadī, Daśapadī etc. The Prabandha Nos, 3, 4, 6 & 10 are Saptapadīs Nos. 20, 24, 26, 28, 32, 33 & 35 are Novapadis, Nos. are chatuspadīs, Nos. 11 and 37 Satpadīs Nos. 2 and 3 are

1. MVM Canto-I Verse-13,Canto-III-Verse-22 and Canto-V. Verses-7-9.
2. MVM Canto-II Verses-8-11 & Canto-III Verses-R3-24.
3. MVM- Canto-III Verses-12, 13, 25.

21, 30, 31 & 34 are Daśapādīs, Nos. 1, 25 and 36 are Ekādaśapadīs and rest Prabandhas are Aṣṭāpadīs. The last Prabandha is in the form of Dandaka. The rāgas, Tālas and metres are noted here for ready reference of the scholars.

(iii) **Rāgas** –

Following 24 rāgas are used. They are arranged alphabetically. No of canto and Prabandha are in the bracket against each

(i) Kalyāṇa (C-11, P-32), (ii) Kāmodī (C-10, P-29), (iii) Kedāra (C-8 P-23 & 24), (iv) Gujjari (C-6, 10. P-19, 30) (v) Gundakeri (C-4. P-13), (vi) Gauri (C-7, 9. P-22, 28), (vii) Todi (C-1, 2, 9 12. P-1, 8, 26, 36), (viii) Deśakhya (C-11, P-33), (ix) Dhanāsī (C-2, 10. P-6, 21) (x) Pithamāyūra (C-5 P-17) (xi) Bhairava (C-6. P-18) (xii) Mangalagujjari (C-2, 4. P 4-14.), (xiii) Mallāra (C-1, 11, 12. P-2, 34 38), (xiv) Mālavagauda (C-4, 5. P-11,16), (xv) Mālasśri (C-4. P-12), (xvi) Lalita (C-3, P-10), (xvii) Vasanta (C-2, 5, 12. P-7, 15, 35), (xviii) Baladhanāsī (C-2. P-5) (xix Vibhāsa (C-6. P-20) (xx) Vihaṅgaḍa (C-8, 12. P-25,37), (xxi) Sārṅgi (C-2 P-3), (xxii) Sāmagaḍa (C 6. P-21), (xxiii) Sāranga (C-9 P-27) and (xxiv) Sindhuḍā (C-3. P-9).

(iv) **Talas** -

Following four tālas are found in this Mukundavilāsaṃ—

(i) Ekatāla (C-12. P-38, (ii) Pattatāla (C-12. P-36), (iii) Rūpakatāla (C-11. P-33) and (iv) Siṃhanandana (C-12 P-37)

v) **Metres** –

Following 15 metres are used for 208 verses. They are arranged alphabetically with no. of verses against each It, shows that the author exhibited his special fascination for the

Indravajra metre in which the highest number of verses are composed —

(i) Anuṣtup-19 (ii) Āryā-5 (iii) Indravajrā-70 (iv) Toṭaka-2 (v) Drutavilambita-10 (vi) Puspitāgrā-14 (vii) Pṛthvī-9 (viii) Pramānika-7 (ix) Mandākrāntā-1 (x) Mālinī 31 (xi) Vamśa-sthavila-16 (xii) Vasantilaka-10 (xiii) Sardūlavikrita-8 (xiv) Śikhariṇī-5 and (xv) Svāgatā 1.

(vi) Poetie beauty —

The poetic beauty of a work rests upon the ways of descrption, the deep insight, the command over vocabulary and the rich sense of rhythm of the poet. A thing of beauty is a joy for ever but it is rightly said that beauty lies in the power of the eyes of the observer, as while a thing may seem insignificant to an ordinary man, it appears most significant or symbolic of many things to a poet of genius. Jatīndra Raghū-ttama was such a poet of genius. Like the poets of the Rītī school he describes in simple but melliflous verses the love and separation of Rādhā and Kṛṣṇa in the background of appropriate natural scenes. Most of the verses apart from their intrinsic poetic worth are illustrated the ornamental devices or Yamaka, Anuprāsa, Śḷeṣa, Upamā, Rūpaka, Utpreṣkā Atiśayokti etc which prove the poets depth, craftmanship and sound knowledge of the rhetorical devices.

The poet describes the beauty of the Gopis, the devo-tees of Kṛṣṇa as a river, the eyes & the hands, the heart and the devotion of the Gopis being represented as lotus, sky and the moon respectively.

वरतनुतनुनद्यां मुद्रिते यद्दृगब्जे
करकमलयुगं च प्रापयेत्कोरकत्वम् ।
हृदयगगनमध्ये भक्तिचन्द्रोदयस्य
स्फुटमिदमिह कार्यं केन वा नावधार्यम् [1]॥

Similarly the beauty of Rādhā has been compared with a pond in the words of Kṛṣṇa.[2] The author draws lively pictures of the amorous pining of the gopis[3] and Kṛṣṇa[4], the beauty of Vṛndāvana[5], the preparation of the gopis for rāsalīlā[6], the complete surrender of the gopis before kṛṣṇa for getting back their cloths[7] and finally the rāsalīlā of the gopis and Kṛṣṇa.[8] Besides most of the verses and songs are deeply devotional and worthy of being sung by the devotees.

The poem represents a unique combinaiion of philosophy and poetry. Apperently an erotic poem on the divine love of Srīkṛṣṇa and the gopis, it really illustrates under the mask of the enthralling tale of love, the Advaita theory of the indistinguishability of Brahmā, Viṣṇu, Maheśvara, Tara, Durga and Rādhā and yet at no movement is the poetry too heavily burdened by this underlaying philosophy. The deliberate ambiguity in most of the verses that makes them applicable both to Śiva and Viṇṣu is significant

---

1. MVM-Canto –IV. Verse-7.
2. MVM—P-15.
3. MVM–P-23-24.
4. MVM – P-27.
5. MVM—P-26.
6. MVM—P-29.
7. MVM—P-31.
8. MVM—P-35.

(vii) Editorial note—

This lyrical Kavya 'Mukundavilāsaṃ' is placed before the learned readers for the first time. There is, no clue to the identity of the author 'Prakāśikā', the commentary incorporated in this work, but from the approach of the commentary as well as spirit underlying in it, it is presumed that the poet Raghūttama himself must have written this to make his work comprehensible to the common people and the scholars as well The broken portions of both the text and the commentary have been left unfouched The text and commentary have been systemetically arranged and question marks have been given at some places of doubt. However we have tried our best to make this edition complete and correct in all its aspects. Unfortunately some printing mistakes have crept in, which the learned scholars will kindly ignore.

I am grateful to Prof.Sarbeswar Das, Ex-Chief Editor for his timely valuable advice and guidance. I am thankful to Sri Suresh Chandra Jena and Srimati Shakuntala Panda, Asst. Editors who have assisted me in comparing the scripts and preparing the press copy of the masuscript and index etc. I hope the book will be appreciated by all.

Vasanta Pañchamī
The 10th February, 1989.

Bhagaban Panda
Editor

विषयसूची

... ...

मुकुन्दविलासमहाकाव्यम्

प्रथमः सर्गः

॥ श्री गणेशाय नमः ॥

वेदान्तैरपि गीतं नित्यमसङ्गं गुणातीतम् ।
नन्दसुतं गुणसिन्धुं चिन्तय तं राधिकाबन्धुम् ॥१॥

॥ प्रकाशिका व्याख्या ॥

जगद्रूपं जगन्नाम मायया यद्व्जायत ।
वस्तुतो नास्तिरूपादेस्तद्वस्तुनि मनोऽस्तु मे ॥

कार्यकारणरूपाभ्यामुपाधिभ्यामिदं द्विधा ।
अन्तःकरणमायायामेकं ब्रह्माहमाश्रये ॥

मायामानुषरूपेण जीवोद्धारणकारणम् ।
जगद्गुरुमहं वन्दे श्रीमन्तं पुरुषोत्तमम् ॥

श्रीजगन्नाथदेवस्य प्रीतये भक्तपालिनः ।
वितन्यते श्रीमुकुन्दविलासस्य प्रकाशिका ॥

शक्त्या भक्त्या च योगेन वृत्त्या व्यञ्जनया तथा ।
यया संख्यावतो व्याख्या न प्रत्याख्यानमर्हति ॥

इदं खलु कलिकालाख्यान्धकारिकमनोदृशां ककारसद्पानमत्तानां विषयिणां संसारगहने वंभ्राम्यमाणानां परमार्थपथमपश्यतामनुकम्पया विषयाभास-

परमरसप्रकाशकं परमार्थपथदर्शकं श्रीमुकुन्दविलासाख्यप्रबन्धं पङ्नीबन्धुमिव निखिलध्वान्तध्वंसकं परमहंसपरिव्राजकाचार्यश्रीरघूत्तमतीर्थश्रीपादाः सम्पादयामासुः । तस्य च प्रबन्धस्य द्वादशसर्गात्मकस्य[1] प्रतिपाद्यमर्थं प्रकाशयामि ।

प्रथमे परमं ब्रह्म नटवद्बहुरूपधृक् ।
गोपीरूपं कृष्णरूपे पूर्वरागीति वर्ण्यते ॥

कृष्णरूपानुरक्तस्य वल्लवीवृन्दरूपिणः ।
द्वितीये नटवत्तस्य वाग्विलासोऽपि वर्ण्यते ॥

कृष्णस्य स्वतनुर्गोपीः प्राप्त्युपायमुपादिशत् ।
नारदो भगवानेत्य तृतीये त्विति वर्ण्यते ॥

चतुर्थे भक्तशिक्षायै गौरीशङ्कररूपिणम् ।
स्वमेवापूजयेद्ब्रह्म गोपीरूपीति कीर्त्यते ॥

पञ्चमे राधिकामुख्यगोपीतनुषु वर्ण्यते ।
नटवत्पूर्वरागोऽस्य नन्दनन्दनरूपिणः ॥

षष्ठे पट्टापहरणं परिहासरसोज्ज्वलः ।
स्त्रीपुंसरूपिणस्तस्य कृष्णस्य परिवर्ण्यते ॥

गोष्ठागमे सप्तमे तु गोपगोपीतनूधरः ।
अन्योऽन्यदर्शनोद्दीप्तकामः कृष्ण इतीर्यते ॥

---

1 ग. द्वादशसर्गात्मकस्य ।

अष्टमे राधिकादीनां तनूनां परमात्मनः ।
गोविन्दविरहोद्वेगलीलेव किल कीर्त्यते ॥

नवमे विपिने तस्य गोचारणविहारिणः ।
गोपीनां विरहोद्वेगनाट्यं स्फुटमुदीर्य्यते ॥

दशमे मुरलीगानानीतगोपीगणैः सह ।
तस्यान्योऽन्यं वाग्विलासो रासारम्भश्च भण्यते ॥

एकादशे तु गोपीभिः समसंख्यतनुर्रतः ।
रासनाट्यपरेशस्य परमाश्चर्य्यमीर्यते ॥

द्वादशे जलकेल्यन्ते तस्य नारदरूपिणा ।
आत्मना महती गीतैरद्वैतं प्रतिपाद्यते ॥

अस्य ग्रन्थस्य इदमन्वद्रहस्यं साकारनिराकारोभयविधस्य परमेश्वरस्योपासनं त्रिवर्गमोक्षार्थकं तत्र साकारोपासनेन त्रिवर्गसिद्धिः । निराकारोपासनेन तु मोक्षः । त्रिवर्गस्तु अप्रासङ्गिकफलम् ।

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥

इति श्रीभागवते सकलसाकारोपासनानां त्रिवर्गरूपाणि फलानि दर्शयित्वा एतद्वचनेन चतुर्वर्गप्रदर्शनात् साकारोपासनान्यपि निष्कामाणां चित्तशुद्धिद्वारा ज्ञानमुत्पाद्य मोक्षप्रयोजकानि भवन्ति ।

वासुदेवे भगवति भक्तियोगप्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानार्थं यदहैतुकम् ॥ इति श्रीभागवतवचनात् ॥

निराकारोऽपि साकारः सिद्ध एव हि कारणम् ।
भुक्तये मुक्तये चापि न शिवान्मोक्षदोऽपरः । इति स्कन्दवचनात् ॥

सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ।
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरः ॥ इति मार्कण्डेयवचनात् ॥

ब्राह्मे मुनय उचुः —

गृहस्थो ब्रह्मचारी च वानप्रस्थोऽपि भिक्षुकः ।
यस्तमिच्छेन्मोक्षमाप्तुं देवतां कां यजेत सः ॥

ब्रह्मोवाच —

शब्दमात्रं श्रुतिमुखाद्ब्रह्माविष्णुशिवादयः ।
प्रत्यक्षोऽयं परो देवः सूर्यस्तिमिरनाशनः ॥

तस्मादन्यत्र भक्तिहीनकार्याशुभमिच्छता इति ।

हरिं हरं विधातारं यः पश्येदेकरूपिणम् ।
स याति परमानन्दं शास्त्राणामेव निश्चयः ॥
एवं माया महाविष्णोर्भिन्ना संसारदायिनी ।
अभेददृष्ट्या दृष्टं चेत् संसारक्षयकारिणी ॥ इति बृहन्नारदीयवचनात् ॥

वासुदेवो हरो ब्रह्मा तारिणी प्रकृतिः परा
एकमूर्त्तिस्तत्वतोऽमी ··· षु तथा स्मरेत् ॥

भेदकृन्नरकं याति ··· ··· ··· इति तन्त्रकल्पवचनात्

कालिकां पूजयेन्नित्यं कृष्णाभेदस्वरूपिणीम् ।
सर्वदा कृष्णभक्तानां सैव सिद्धिप्रदायिनी ॥
यथा कृष्णस्तथा दुर्गा यथा दुर्गा तथा हरिः ।
अभेदात् सर्वसिद्धिः स्याद्भेदान्नरकमाप्नुयात् ॥

इति बृहद्गौतमीयतन्त्रवचनात् ।

जन्मानि क्रमशो यस्य निष्पाप स वृषाणि च ।
तस्य त्वयि शिवे भक्तिस्ततो भेदो मया सह ॥
अभेददृष्टिः सर्वत्र ज्ञानदाज्ञाननाशिनी ।
वैराग्यादिमहामुख्यैः साधनैः संप्रवर्त्तते ॥

इति ब्रह्मवैवर्त्तपुराणे रुद्रं प्रति श्रीविष्णुवचनात् ।

कलौ कलुषसम्पन्ना न मां विन्दन्ति मानवाः ।
ममैव मायया मूढा भेदवादपरायणाः ॥
मम भक्तिं प्रकुर्वाणा ये विश्वेशं द्विषन्ति वै ।
किल्बिषो मम ते ज्ञेयाः पिशाचपदगामिनः ॥

इति स्कान्दे विष्णुवचनात् ।

यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम् ।
बुद्धिं स्तस्यापकर्षन्ति सोऽपासनानि पश्यति ॥
बुद्धौ कलुषभूतायां विनाशे प्रत्युपस्थिते ।
अनयो नयसंकाशो हृदयान्नापसर्पति ॥
न देवा दण्डमादाय रक्षन्ति पशुपालवत् ।
यत्तु रक्षितुमिच्छन्ति बुद्ध्या संविभजन्ति तम्[1] ॥

इति महाभारतवचनात् ।

किं तस्य दुर्लभतरमिह लोके परत्र च ।
यस्य विप्राः प्रसीदन्ति शिवो विष्णुश्च सानुगः ।

इति श्रीभागवतवचनाच्च ।

सर्वदेवेष्वद्वैतभक्त्या सर्वपुरुषार्थसिद्धिरतः सर्वशास्त्रसिद्धान्त संक्षेपेण श्रीकृष्णभक्तिमारभ्य दर्शयामासेति । ननु वाशिष्ठरामायणे —

सामान्यं परमं चैव द्वे रूपे विद्धि मेऽनघ ।
पाण्यादियुक्तं सामान्यं भजन्ते मूढबुद्धयः ॥
परं रूपमनाद्यन्तं यन्ममैकमनामयम् ।
तद्भजन्तो महाधीरा गच्छन्ति पदमव्ययम् ॥

इत्यर्जुनं प्रति श्रीकृष्णवचनेन.......................... । निन्दाश्रवणात् कथं यतिना वेदान्तविदा साकारकृष्णभजनप्रकाशकं शास्त्रमारभ्यत इति नाशङ्कनीयम् ।

1. ख. योजि ।

स्वमात्मानं हरिं ध्यात्वा स्वयमेव हरिर्भवेत् ।
सन्ततं विषयासङ्गमलं चित्तमेव हि ॥
ततः सायुज्यतासिद्ध्यै सगुणोपासना हरेः ।
वासनानामनादित्वात्कर्मबन्धो निरन्तरम् ॥
दुरितानि बहून्येव मनो मलकराणि च ।
क्षालयेत् सततं ··· सगुणोपासनाज्जलैः ।

इति नारदीयतन्त्रे जगद्गुरोर्नारदस्य वचनात् ।

अव्यक्तं ब्रह्मसेवी हि निर्विघ्नं न परं व्रजेत् ।
युञ्जयोद्धरिवर्गस्तद्ब्रह्म सगुणं भजेत् (?) ॥
यथागाधजलान्तःस्थो मत्स्यो जयति जालिकान् ।
कामक्रुध्यानरीनेतांस्तथा नारायणाश्रयः ॥

इति हरिभक्तिसुधोदये तस्यैव वचनात् । भगवतो गुणमये स्थूलरूप आवेशितं मनो ह्यगुणेऽपि सूक्ष्मतम आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुमिति ।

श्रीभागवते पञ्चमस्कन्धे परीक्षिद्वचनात्—

श्रुत्वा यथा स्थूलसूक्ष्मरूपे भगवतो यतिः ।
स्थूलेन जितमात्मानं शनैः सूक्ष्मे नयेदिति ॥

तत्रैव शुकवचनात् —

आत्मारामश्च मुनयोनिर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थं भूतगुणो हरिः ॥

इति प्रथमे सूतवचनाच्चेत्यलं विस्तरेण । श्रीकृष्णाख्यं सगुणं ब्रह्मवर्णक-शास्त्रमारोप्समाणः कविः प्रथमं तत्स्वरूपं दर्शयन् विघ्नविघातार्थं श्लोकचतुष्टयेन तत्स्मरणकीर्त्तनरूपमङ्गलमाचरति ।

वेदान्तैरित्यादि । हे चित्त तं नन्दसुतं तं लोकशास्त्रप्रसिद्धं चिन्तय भावय । तं कीदृशं वेदान्तैः अपि गीतं अप्रमितगुणालङ्कारमिति भावः । पुनः राधिकाबन्धुं राधैव राधिका वृषभानुनाम गोपपुत्री तस्याः बन्धुः प्रियः तं पुनः किदृशं वेदान्तैरपि गीतं चतुर्णां वेदानामन्ताः शेषाः सगुणब्रह्मप्रतिपादकाः उपनिषद्भागाः गोपालतापिन्युपनिषदादयः । तं भगवन्तं पुराणादिभिश्च गीतं उपास्यत्वेन कथितं बोधितमिति यावत् । पुनः कीदृशं नित्यं नाशरहितम् । पुनः कीदृशं असङ्गं प्राकृतसङ्गरहितम् । पुनः कीदृशं गुणातीतं प्राकृतगुणरहितम् ।

पक्षान्तरे तं लोकशास्त्रप्रसिद्धं परमेश्वरं चिन्तय । तं कीदृशं वेदान्तैरपि गीतं वेदान्ताः निर्गुणब्रह्मप्रतिपादिका उपनिषदस्तैरपि गीतम् । पुनः कीदृशं असङ्गं सङ्गः संयोगः तद्रहितम् । पुनः कीदृशं गुणातीतं गुणाः सत्वरजस्तमांसि अतीतं अतिक्रान्तं तद्रहितमित्यर्थः । एवंभूतमपि गुणसिन्धुं ऐश्वर्यदयाभव······ गुणानां निरूपमाधिकरणमित्यर्थः । ननु इदं विरुद्धं निर्गुणस्य गुणसम्बन्धकथनमिति चेत् तत्राह राधिकाबन्धुमिति । राधिका माया जगत्साधनात् तस्या बन्धुं तत्सहायं अयं भावः । माया सम्बन्धेन ऐश्वर्य्यादिगुणयुक्तः परमार्थतस्तु तन्मुक्त ईश्वर इति । पुनः कीदृशं मायासम्बन्धेन एव नन्दसुतं नन्दनामगोपपुत्रं परमार्थतस्त्वजत्वात् । मायया तस्य पुत्र ईश्वर इति भावः । यद्वा मायया जीवेश्वरविभागं प्राप्य उपास्योपासकभावं गतस्तत्रेश्वरो जीवानां हिताय वर्त्तते ॥ १ ॥

हेरम्बं कतिचित्परे दिनकरं केचित्पुनः शङ्करं
शक्तिं केचन केऽपि विष्णुममलं[1] त्वन्ये परे पद्मजम् ।
एकं भिन्नधिया[2] यमेव परमात्मानं सदोपासते
तं वृन्दावनचन्द्रमाश्रय मनः श्रीराधिकावल्लभम् ॥२॥

या वाणी विधिसन्निधौ जलधिजा या शार्ङ्गिणः[3] सङ्गिनी
येशानार्द्धशरीरिणी भगवती श्रीरामचन्द्रप्रिया[4] ।
या रुक्मिण्यपि वासुदेवगृहिणी या रामगा रेवती
तामेतां व्रजराजपुत्रदयितां[5] श्रीराधिकामाश्रये ॥३॥

हेरम्बमित्यादि । तं नन्दसुतं स्तौति प्रस्तूयते । एक एव आत्मानमित्यादि सुगमम् ॥ २ ॥

या वाणीति । तस्यैव परमेश्वरस्य स्त्रीशरीरेष्वपि अदेवबुद्ध्या भेदयन्नाह । या वाणीत्यादि सुगमम् ॥ ३ ॥

---

1. ग. मनलं ।
2. घ. भिन्नाभिया ।
3. क. शार्ङ्गिणाम् ।
4. ख. ग. या रामचन्द्रप्रिया ।
5. घ. भज राजसुतदयितां ।

योद्वेधा प्रकृतिः पुमानिति मतः स्त्रीपुंसदेहाश्रितो
यस्त्रेधा विधिविष्णुशङ्करवपुर्द्धारी दरीदृश्यते ।
श्रीमन्नीलगिरौ च दारुतनुधृक्[1] योऽसौ चतुर्द्धा स्थितो
राधाकृष्णतनूधरो विजयते वृन्दावने स प्रभुः ॥४॥

योद्वेधेति । तस्यैव ईश्वरस्य स्त्रीपुंसलिङ्गकनामरूपभेदैराशङ्कितं भेदं वारयन् अद्वैतभक्तिं दर्शयन्नाह । यः प्रभु परमेश्वरः स्त्रीपुंसदेहाश्रितः सन् प्रकृतिः पुमानिति स्त्रीपुरुषा इति मतो नटमिथुनवत् ज्ञातः जनानामिति शेषः । इति शब्दोऽत्र.... या वाचि तथा च प्रकृतिरित्याकारकस्य शब्दस्य प्रत्ययस्य वा विषयीभूतो न तु परमार्थतः स्त्रीपुंसत्ववानितिभावः ।

नरः पुरुष इत्युक्तो नारी प्रकृतिरुच्यते ।
शिष्णयोनिर्विनिर्मुक्तो जीव उक्तः सनातनः ॥

इति पद्मपुराणवचनात् । यश्च ब्रह्मादिशरीरधारी सन् तत्र धात्रीप्रकारं यथा भवति तथा दरीदृश्यते जनैरिति शेषः । न तु परमार्थतस्तथाविध इति भावः । अत्र श्रुतिरप्यस्ति योऽसौ प्रभुः जगन्नाथसुभद्राबलभद्रसुदर्शनाकारनामरूपैश्चतुर्द्धाश्चतुर्भिः प्रकारैः स्थितश्च । जनानां चतुष्प्रकारबुद्धिविषयीभूत इत्यर्थं । स एव प्रभुः राधाकृष्णतनुधरः सन् वृन्दावने विजयते सर्वोत्कर्षेण वर्त्तते । विजयति इत्यर्थेनात्र सेव्यजनमाक्षिप्यते[2] ॥ ४ ॥

---

1 ग. ग. तनु भृत् ।

2 ग. सेव्यक्तमाक्षिप्यते ।
ग. सेव्यजमाक्षिप्यते ।

काव्यविदां रसरूपं जगतां शब्दार्थरूपं च ।
कविताच्छलेन परमं ब्रह्मैवाहं प्रवक्ष्यामि ॥५॥

यद्यप्यद्यतना मनागपि जना नाश्चन्ति सद्वासनां
कालस्यैव कलेः कलेवरमयाद्द्वेषु[1] भेदेक्षणात् ।
प्रायः प्राक्तनपुण्यपुञ्जकवतां प्रज्ञावतां प्रीतये
ब्रह्माद्वैतकथां तथापि तनुते[2] को प्येष कौपीनभृत्[3] ॥६॥

काव्यविदामिति । करिष्यमाणग्रन्थस्य प्रतिपाद्यं प्रतिजानीते । कविताछलेनाहं रघूत्तमनामा यतिः परमं ब्रह्मैव प्रवक्ष्यामि प्रतिपादयिष्यामीत्यर्थः । तद्ब्रह्म कथंभूतं काव्यविदां रसरूपं व्यञ्जनावृत्त्याभिव्यज्यमानं परमार्थं गिर··· सहृदयप्रकाशमानं यत्किंचिदनिर्वचनीयं वस्तु तत् स्वरूपेण प्रकाशमानमित्यर्थः । जगतां सर्वेषां शब्दार्थरूपं च शब्दरूपेण तदर्थरूपेण आविर्भवतीत्यर्थः । तथा च यान् यान् शब्दान् वात्र प्रवक्ष्यामि तत् सर्वं परमेश्वरस्य नटवेश इव स्वनामकीर्त्तनानन्दानुभवप्रापक इति तत्सम्बन्धितया तस्य कीर्त्तनं मया नन्दनाभिप्रायकमिति भावः ॥ ५ ॥

यद्यप्यद्यतनेति । अत्र ग्रन्थे पण्डितान् अभिमुखीकुर्वन्नाह यद्यप्यद्येत्यादि स्फुटार्थम् ॥ ६ ॥

---

1. घ. द्वेषेषु ।
2. क. द्वैतकथां अपि तनुते ।
   घ. द्वैतकथां अपि तनुते ।
3. ख. ग. कौपीनधृत् ।

पिशुनपतङ्गमुखेभ्यः सुजना निपुणावधानतावृत्तिभिः[1] ।
अक्षतसौरभरभसं रक्षत नवकाव्यमालतीकुसुमम् ॥७॥

भो भो नवीनाः कवयः कुलीनाः स्यादेव[2] यूयं यतिवागधीनाः[3] ।
चौर्य्ये पदानां मम नैष यत्नः[4] मुष्येत[5] तेनैव मदर्थरत्नम् ॥८॥

पिशुनेति । काव्याङ्गाखिलनिन्दनं सदभिवन्दनं च प्राह । पतङ्गाः शलभा निपुणावधानं तानि तानि अवधानानि ता एव वृत्तयः आवरणानि ताभिः अक्षतं यत् सौरभं कान्तत्वं सौगन्ध्यं वा तेन रभसो हर्षो यस्मात् तत् ॥ ७ ॥

भो भो इत्यादि । विनयाभिनयेन खलान् शिक्षयति । यतिवागधीनाः यतेर्मम श्रीमुकुन्दविलासकर्त्तुः कवेः वागधीनाः स्यात् भवेत् । पदानां पदावलेरित्यर्थः । मुष्येत[6] चोरितं भवेत् । शेषं स्फुटम् ॥ ८ ॥

---

1. ख. ग. वृतिभिः ।

2. क. सा चैव ।
ख. ग. घ. स्यातैव ।

3. ख. घ. प्रतिवागधीनाः ।

4. क. नैत यत्नं
घ. वै न यत्न ।

5. क. घ. मृग्येत ।

वर्णाश्रमाचार[1]विशुद्धचेतसः समाश्रितः श्रीशमहेशवेधसः ।
हिताहितज्ञानसतोऽनुशासतः सदा नमस्यामि समाहितः सतः ॥६॥

वर्णाश्रमेति । पुनरपि जनान् शिक्षयितुं सत्साधुनमस्कारमाह ।

वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यः तत्तोषकारणम् ॥
इति विष्णुपुराणवचनम् ।

वेदो वा हरिभक्तिर्वा भक्तिर्वापि महेश्वरे ।
स्वधर्मपतितं मूढं न पुनाति कदाचन ॥
यः कर्माणि परित्यज्य भक्तिमात्रेण जीवति ।
न तस्य तुष्यते विष्णुराचारात् पूज्यते यतः ॥
तस्मात्कार्या हरौ भक्तिः स्वधर्मस्याविरोधिनी ।
सदाचारविहीनो यः पतितः प्रोच्यते बुधैः ॥
पूजयस्व शिवं विष्णुमेकमत्या महीपते ।
भेदकृद्ब्रह्महत्यानामयुतायुतमश्नुते ॥
इति बृहन्नारदीयवचनानि ।

नाचरेद्यस्तु वेदोक्तिं स्वयमज्ञो जितेन्द्रियः ।
विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ॥
इति मां यः स्वधर्मेण भजेन्नित्यमनन्यभाक् ।
सर्वभूतेषु सद्भावो मद्भक्तिं विन्दते दृढाम् ॥
इति श्रीभागवते एकादशस्कन्धे श्रीकृष्णवचनम् ।

1 च. वर्णाक्रमाचार ।

प्रबन्धत्वे तस्मिन् यदपि वचनं नो[1] सुरचनं
गुणौघैर्नोद्रिक्तं न च लसदलङ्कारललितम् ।
सुभाव्यं[2] काव्यं मे तदपि हरियोगा[3]न्मतिमतां
न किं गाङ्गं नीरं विगुणमपि धीरं रमयति ॥१०॥

अभेदं दर्शयंस्तावदीश्वरं मां स्वकर्मकृत् ।
यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितम् ।

इति तृतीये कपिलवचनम् ।

समालोच्य शास्त्रतात्पर्यमवधार्य तदनुसारेण सततोऽनुशासतः शिक्षयत इत्यर्थः ॥ ९ ॥

प्रबन्धत्वेति । शिष्टवृत्त्यङ्गं निजमनोऽनौद्धत्यं प्रकटयन्नाह । प्रबन्धत्वेत्यादि सुगमम् । पक्षे विपरीतलक्षणया न सुरचनमित्यादेर्निर्बोधसम्बन्धस्य सुरचनमेवेत्याद्यर्थतः विगुणमपीति विशिष्टगुणमेवेति तत्त्वार्थः ॥ १० ॥

---

1. ख. ये ।
2. क. सुकाव्यं ।
3. ख. हरिवेशात् ।

अपि[1] श्रुतिवचांसि[2] यत्सहमनांसि नाध्यासते
कुतः पुनरसन्मतेः[3] कृतकवाग्विलासा मम ।
तथापि महतां हतांघसमुदीक्ष्य वाचां चयं
मनो मम घनोपमे महसि तव चंचूर्य्यते ॥११॥

अपि श्रुत्यादि । ननु गीतगोविन्दप्रभृति-श्रीकृष्णविषयकर्मास्ति तद्वं अनविनोदो भवेत् । किमर्थं भवता पुनरुक्तानिवेदं काव्यमारभ्यत इत्याशङ्कायामाह । श्रुतिवचांसि वेदादिवाक्यानि सहमनांसि मनः सहितानि यत्महस्तेजः श्रीकृष्णाख्यं नाध्यासते न विषयो कुर्वन्ति । असन्मतेः मम कृतकवाग्विलासाः विकल्पितवचन-विलासाः कुतः पुनरध्यासते कस्मात् कारणात् पुनः अध्यासते नाध्यासत इत्यर्थः । तत् किमर्थं तत्र प्रवर्त्तसे इत्याशङ्कामपनुदयन्नाह । तथापीत्यादि । तत्र श्रीकृष्णाख्ये महसि मम मनश्चञ्चूर्यते कुटिलं गच्छति । निवारितमपि गच्छतीतिभावः । किं कृत्वा महतां व्यासादीनां जयदेवादीनां च वाचां चयमुदीक्ष्य दृष्ट्वा वाचां चयं कीदृशं हतां तस्य हतमंघो जनानां पापं येन तम् । यद्यपि श्रुत्या वाङ्मनसोऽगोचरतया प्रतिपादिते तस्मिन् निर्गुणे ब्रह्मणि वाङ्मनसयोः प्रवृत्तिर्न सम्भवति तथापि सगुणे ब्रह्मणि तस्मिन् कृष्णाख्ये घनोपमे ब्रह्मणि तयोः संचारसम्भवात् तत् प्रवृत्तिर्निरुध्यत इति भावः ।

---

1 ख तदपि ।

2. क. श्रुतवचांसि ।
   घ. मनांसि ।

3 ख, ग, रसंमते ।

कति कति पुरुषा जायन्ते[1] केषां कदा
गुणकीर्त्तिरशेषदोषमोषदः[2] ।
कथनमपि पुनाति यत्प्रियाणां
सततमसौ हरिरेव वर्णनीयः ॥१२॥

ननु चरणताविरत्यस्य कुटिलगत्यर्थ एव चञ्चूर्यत इति सिद्धति । कुटिलगमनं तु प्रकृतेरनुपयोगमिति चेत् न, विषयस्य त्रिभङ्गिशालित्वान्मनसोऽपि कुटिलगतिसम्भवात् ॥ ११ ॥

कतीति । प्रतिपाद्य माहात्म्यमाह । यत् प्रियाणां यस्य श्रीकृष्णस्य हरेः प्रियाणां गोपीनां कथनमपि कीर्त्तनमपि पुनाति पवित्रीकरोति श्रोतृवक्तृ-निविशेषः ।

वन्दे नन्दव्रजस्त्रीणां पादरेणुमभिक्ष्णशः ।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥

इति श्रीकृष्णं नारदस्योक्तेः शेषं स्फुटम् ॥ १२ ॥

---

1. ख, ग न सन्ति।

2. क, ख, ग, वदगुणकीर्त्तिरशेषमोषा ।

भो भो वैष्णवशैवशाक्तपरमोदाराः परार्थप्रियाः
भिक्षुः प्रार्थयते रघूत्तम इमां भिक्षां सतां संमताम् ।
निर्भेदे परमेश्वरे हरिहरश्रीकालिकाद्याह्वये
भेदेक्षां परिमुच्य मुञ्चति सदा स्वा नारकीर्यातनाः ॥१३॥

य आसीदेकाकी जगदुदयपूर्वत्र[1] भगवान्
समं कल्प्यात्मानं विविधबहुरूपं व्यकुरुत ।
स सर्वः[2] सर्वेशः स विधिविधुशम्भुः स हि धरा-
भराहत्यै भूत्यै जयति जगतां गोपतनुभृत्[3] ॥१४॥

भो भो इति । श्रीकृष्णशिवदुर्गाभेददर्शनेन नरकं भवतीति तन्निवारणार्थं वैष्णवादीनां तदभेदभक्तिमुपदिशन्नाह । हरिहरश्रीकालिकाद्याह्वये हरिश्च हरश्च श्रीश्च कालिका च आद्यर्द्धेन ब्रह्मा च सरस्वती च रामश्च सीता च कृष्णश्च राधा च इत्यादय आह्वा नामानि यस्य स हरिहरश्रीकालिकाद्याह्वयः तस्मिन् भेदेक्षां शरीरनामभेदप्रयुक्तं भिन्नत्वप्रकारकं दर्शनभ्रान्तिं विमुच्य सर्वथा विहायेत्यर्थः । शेषं सुगमम् ॥ १३ ॥

य आसीदिति । जगदात्मकदृष्ट्या कृष्णभजनमुपदिशन् श्रुत्यर्थं वर्णयन्नाह । जगदुदयपूर्वत्र विश्वसृष्टेः प्राक् काले यः परमात्मा एकाकी आसीत् स

1. क. गुर्वीत्र ।
2. क. सर्वे ;
3. घ. तनुभृत ।

विचित्रपदवाक्यार्थश्लोकसङ्गीतसुन्दरम् ।
श्रीमुकुन्दविलासाख्यमेतत्काव्यं सुनिस्तुलम्[1] ॥१५॥

द्वितीयरहित आसीत् । स्थितः सर्वगोपतनूभृत् गोप्यो राधिकादयः । गोपः श्रीकृष्णः ताश्च स च गोपाः तद्रूपास्तनवः शरीराणि ताः धृतवान् इत्यर्थः ।

ननु नामानि गोपीप्रभृतीनि परमात्मन एव सम्भवन्ति । जीवानां यथा तत्तच्छरीरसम्बन्धेन मनुष्यपश्वादिनामानि तथेश्वरस्यापि गोपगोपीप्रभृतिशरीरसम्बधात् तत्कथं गोपतनुभृदित्यत्र गोपगोपीशब्दयोः शरीरपरत्वेन निर्देशः इति चेत् शृणु परमात्मन्येव तत्तच्छरीरे प्रवर्त्तते इति मुञ्च शङ्कान् ॥ १४ ॥

विचित्रेति । काव्याभिधेयं सत्काव्यप्रशंसामाह । विचित्राः पदवाक्याः एषां येषु वा ईदृशानि श्लोकसङ्गीतानि यानि तैः सुन्दरं मनोहरम् । पदवाक्यार्थेषु त्रिष्वेव अन्वितं ज्ञेयम् । श्रीमुकुन्दस्य विलासो वर्णनीयत्वेन यस्मिन्नस्ति स श्रीमुकुन्दविलासाख्यं नाम यस्य तत्तादृशं काव्यमिति । तददोषौ शब्दार्थौ सगुणावनलंकृतीः पुनः क्वापीति काव्यप्रकाशोक्तलक्षणकं काव्यमेव बोद्धव्यम् ।

यद्वा—

वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः ।
उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः ॥

इत्यत्र साहित्यदर्पणोक्तं काव्यलक्षणं वा इह बोद्धव्यम् । कीदृशं सुनिस्तुलं अत्यनुपममित्यर्थः ॥ १५ ॥

---

1. क. तु निस्तुलम् ।

सन्ति काव्यानि भव्यानि त्रिवर्गफलहेतवः ।
इदं तु ज्ञानदं काव्यं सेव्यं सर्वफलेप्सुभिः ॥१६॥

सन्तीति । सुनिस्तुलत्वे हेत्वन्तरमपि दर्शयन् काव्यप्रयोजनमाह । काव्यानि रघुवंशशिशुपालवधगीतगोविन्दप्रभृतीनि । त्रिवर्गेति त्रिवर्गाः धर्मार्थकामाः स एव फलं त्रिवर्गनामकफलं तस्य हेतवः कारणानि । इदं श्रीमुकुन्दविलासाख्यं काव्यं सर्वफलेप्सुभिः सेव्यं सर्वैरित्यनेन मोक्षस्याप्युपादानं सेवापूजाख्यादयस्तु त्रिवर्गमध्यनिविष्टा एव । अतः सर्वपदेन चतुर्वर्गस्यैव ग्रहणं बोद्धव्यं मोक्षदत्वे हेतुर्विशेषमाह । ज्ञानदमिति । शिवविष्ण्वादेरद्वैतभक्त्या तत्वज्ञानमिह सिद्धतीति ध्येयम् ।

जन्मानि क्रमशो यस्य निष्पाप स वृषाणि च ।
तस्य त्वयि शिवे भक्तिस्ततोऽभेदो मया सह ।
अभेददृष्टिः सर्वत्र ज्ञानदाऽज्ञाननाशिनो ॥

इति ब्रह्मवैवर्त्ते श्रीरुद्रं प्रति विष्णुवचनात् चतुर्वर्गफलप्रापकत्वं काव्यस्य यथा तथा वर्णितमभियुक्तैः । यथा :—

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥

चतुर्वर्गप्राप्तिर्हि काव्यतो रामादिवत् प्रवर्त्तितव्यं न रावणादिवदित्यादिकृत्याकृत्य-प्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव । उक्तं च—

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्त्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥ इति ॥

श्रीलमुकुन्दविलासश्चिन्तकचेताः कृतोल्लासः ।
मुक्तिसुखोदयकारो जयति जनानां मनोहारी ॥१७॥

किं च काव्याद्धर्मप्राप्तिर्भगवन्नारायणचरणारविन्दस्तवादिना । एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति इत्यादि वाक्येभ्यश्च सुप्रसिद्धैव । अर्थप्राप्तिः प्रत्यक्षसिद्धा । कामप्राप्तिश्चार्थ सिद्धिद्वारेणैव । मोक्षप्राप्तिश्चैतज्जन्यधर्मफलानुसन्धानात् मोक्षोपयोगी वाक्ये व्युत्पत्त्याधायकत्वाच्च । चतुर्वर्गफलप्राप्तिर्हि वेदशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धीनामपि काव्यादेव । ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु किमिति काव्ये यत्नः करणीयः । इत्यपि न वक्तव्यम् । कटुकौषधोपशमनीयस्य रोगस्य शीतशर्करोपशमनीयत्वे कस्य वा रोगिण शीतशर्कराप्रवृत्तिः साधीयसी न स्यात् । किं च काव्यस्योपादेयत्वमाग्नेयपुराणेऽप्युक्तम् ।

नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥ इति ॥ "त्रिवर्गसाधनं नाट्यमिति" च विष्णुपुराणेऽप्युक्तम् ।

काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च ।
शब्दमूर्त्तिधरस्यैते विष्णोरंशाः महात्मनः ॥ इति ॥ तथा च अस्मिन् काव्ये चतुर्वर्गफलहेतुत्वमिति स्फुटम् ॥ १६ ॥

श्रीत्यादि । श्रीलः श्रीमान् चासौ मुकुन्दविलासश्चेति विग्रहः । चिन्तकानां भावुकानां चेतसः कृत उल्लास प्रसादो यस्मात् स तथा । शेषं स्फुटम् ॥ १७ ॥

श्रीजगन्नाथदेवस्य श्रीबाणपुरपालिनः[1] ।
शिवस्य परितोषाय काव्यमारभ्यते मया ॥१८॥

श्रीजगन्नाथेति । श्रीजगन्नाथ नाम बाणपुराधिकारीराजस्य अनुरोधात् सर्वजनानुकम्पया च आरम्भणीयमिदं काव्यं श्रीनीलाद्रिनाथश्रीरुद्रयोः तद्भक्तस्य नृपस्य श्लेषं वर्णयन् प्रतिजानीते । श्रीजगन्नाथेत्यादि । श्रीजगन्नाथदेवस्य श्रीमतो दारुब्रह्मरूपिणः श्रीनीलाद्रिनाथदेवस्य परितोषाय मया काव्यमारभ्यत इत्यन्वयः ।

किंभूतस्य श्रीबाणपुरपालिनः शिवस्य श्रीबाणपुरपालकशिवाभिन्नस्येत्यर्थः । यद्वा श्रीबाणपुरपालिनः शिवस्य दक्षेश्वरस्य परितोषाय । तस्य कीदृशस्य श्रीजगन्नाथदेवस्य श्रीनीलाद्रिनाथदारुब्रह्मस्वरूपभिन्नस्येत्यर्थः । यद्वा बाणो बाणासुरः तस्य पुरं शोणितनगरं तत्पालिनः शिवस्य किंभूतस्य श्रीजगन्नाथदेवस्य श्रीजगदीश्वरस्य देवस्येत्यर्थः ।

बाणपुरेत्यादि विशेषणं शिवाधिष्ठानात् बोद्धव्यम् । नृपपक्षे तु श्रीजगन्नाथ नाम नृपः श्रीयुक्तजगन्नाथदेवस्तस्य परितोषाय । तस्य किंभूतस्य श्रीबाणपुरपालिनः लक्ष्मीयुक्तबाणपुरनामदेशपालकस्येत्यर्थः । तस्य देशस्य शिवस्य मङ्गलयुक्तस्येत्यर्थः ॥ १८ ॥

---

1. क. श्री बाणपुरशालिनः ।

प्रथमः प्रबन्धः

॥ तोड़ीरागेण गीयते ॥

जय परमेश्वर[1] रमेश्वर विष्णो[2] ।
विजितजगद्गुणरिपुगणजिष्णो ॥
॥ ध्रुवपदमिदम् ॥१॥
जहि जगदीश जगज्जनमायाम् ।
मोहकृते धृतगुण[3] समुदायाम् ॥२॥

जयेति । गीतं पद्यमयं काव्यमारोप्समाणः कविः गीतस्य प्राधान्यात्तदेव प्रथममारभते । रमा लक्ष्मीर्माया वा तस्या ईश्वरः स्वामी नियन्ता वा स परमेश्वरः तस्य सम्बोधनं हे परमेश्वर तमेव विशिनष्टि । परमश्चासावीश्वरश्चेति कर्मधारयः । परमाणां श्रेष्ठानामपि ईश्वर इति तत्पुरुषसमासो वात्र द्रष्टव्यः । विष्णोः व्यापकस्य जय परमोत्कर्षमाविष्कुरु । ननु यावत् गुणाधीनत्वात् परमोत्कर्षमाविष्कारेण का शक्तिरिति चेत् तत्राह विजितेति । विजिताः जगद्गुणाः सत्वरजस्तमोलक्षणाः येन तद्वत्तथाभूत अतएव रिपुगणं कामक्रोधादिशत्रुसमूहं मधुकैटभाद्यसुरसमूहं वा जिष्णो जयनशील ॥ १ ॥

जहीति । ननु केन व्यापारेण अपमाविष्करणीय इत्याशङ्क्याह । जगज्जनानां सकलजीवानां मायामविद्यां जहि नाशय । हे जगदीश जगत्स्वामिन् ।

---

1. क परमेश ।
2. ख. जिष्णो ।
3. क. कृतगुण ।

त्वां प्रवदन्ति वशीकृतमायम् ।
स्थिरचरजीवसकलबलदायम् ॥३॥
त्वं खलु[1] सकलमभूरिदमग्रे ।
अव्ययमुख्यमय महसि समग्रे ॥४॥

ननु गुणवती माया कथं हन्तव्येत्याशङ्कायामाह । मोहकृते मोहनिमित्ते परेषां प्रतारणार्थं धृतो गुणसमुदायो विश्वेव यया स तथा तां कृते शब्दप्रयोजनार्थेऽव्ययं यद्वा मोहस्य कृतं करणं तस्यै ॥ २ ॥

त्वामिति । ननु वेश्येव मामपि माया विमोहयेत् । अतस्तां नाशने मम का शक्तिरित्याशङ्क्याह । प्रवदन्ति कथयन्ति पण्डिता इति शेषः । वशीकृतमायं वशीकृता स्वेच्छाधीनीकृता माया काष्ठादिपुत्तलिका इव येन तथा तदनु जना एव ज्ञानवैराग्यादिभिरविद्यां कथं स्वयमेव न निघ्नन्ति इत्याशङ्क्याह । स्थिरेति । स्थिरचराणां स्थावरजङ्गमानां जीवानां सकलबलानि ज्ञानवैराग्यादिसर्वशक्तयः तेषां दाया दाता तं ज्ञानं वैराग्यादिकरणेऽपि न ते स्वतन्त्रागतस्तेषां तत्प्रकाशनद्वारेणाविद्यां जहि इति भावः ॥ ३ ॥

त्वमिति । सृष्टिस्थितिप्रतिपालकस्त्वमेवासीत्याह । इदं सकलविश्वं भूतभौतिकादिरूपं अग्रे सृष्टेः पूर्वं त्वमेवासिः स्थितवानित्यर्थः । यथा मृत्पिण्डो घटशरावादिसंस्थानापत्तेः पूर्वं स्वरूपेण तिष्ठति तावदिति[2] भावः । कुत्रासं

---

1. क. त्वां खलु ।

2. ग. तवदिति ।

अथ विदधद्बहुभवितुं कामम् ।
त्वमभव इदमखिलं तु निकामम् ॥५॥
प्रकृतिविकृतिबहुभेदमभेदम् ।
रूपं तव नटवेश इवेदम् ॥६॥

इत्यपेक्षायामाह । महसि स्वपरिप्रकाशके स्वरूपे महः शब्दस्य तेजसि भूतस्य स्वपरप्रकाशकगुणसम्बन्धेन गौण्या वृत्त्या ब्रह्मस्वरूपे प्रयोगः । महसि कथंभूते समग्रे अखण्डे हे अव्यय सुखमय नित्यसुखैकस्वरूप अव्ययसुखमयमहसीत्येकपदं वा कर्मधारयत्वात्[1] ॥ ४ ॥

अथेति । आनन्तर्यार्थस्य जीवादृष्टभोगोन्मुखघनत्वेनेत्यर्थः । बहुभवितुं कामं बहुं स्याम् इत्याकारिकामिच्छां विदधत् कुर्वन् त्वं परमात्मा इदमखिलं महदादिविशेषान्तं विश्वं यथेष्टं यथा स्यात् तथा अभवः भूतवानसि ॥ ५ ॥

प्रकृतीति । प्रकृतिस्त्रिगुणमयी मायाप्रधाना परिपर्याया विकृतयो विकाराः महदादिभूतभौतिकपर्यन्ताः प्रकृतिविकृतयो बहवो भेदाः विशेषाः यस्य तदभेदं भेदरहितं सुवर्णं यथा कटककुण्डलादिबहुविशेषवदपि सुवर्णत्वेन एकमेव तद्वदित्यर्थः । इति विश्वं तव रूपं आरोपितरूपं न तु स्तव्यरूपमित्यर्थः । वास्तवत्वे दृष्टान्तमाह नटवेश इवेति नटस्य यथा स्त्रीराजन्यामभल्लुकादिवेशोऽवास्तवो वास्तवरूपं त्वेकमेव तत्तद्वेशसम्बन्धेनापि अविकृतमेव तिष्ठति तथा प्रकृत्यादिविश्वरूपं तवाऽवास्तवं तत्सम्बन्धेनापि एवं यद्ब्रह्मस्वरूपं तन्न विकृतं भवतीतिभावः ॥ ६ ॥

चरमचरं जड़मजड़मनन्तम् ।
सगुणमगुणमवयन्ति भवन्तम् ॥७॥
जगदुदयस्थितिसंहृतिहेतो ।
हंसवृषभभुजगासनकेतो ॥८॥
वाणीश्रीगिरिजातनुधारी ।
खेलसि नटवदखिलहितकारी ॥९॥

चरेति । भवन्तमेकमात्मानं मायया सगुणं वस्तुतोऽगुणमवयन्ति विवेकिन इति शेषः । यद्वा अविवेकिनः सगुणमवयन्ति । विवेकिनस्तद्गुणमेवावयन्ति जानन्ति । मायासम्बन्धेनैव विचित्रानन्तप्रकारैः प्रतीयते इत्याह । चरं जङ्गमं देवादिपिप्पीलिकापर्यन्तं अचरं स्थावरं कल्पतरुसुमेर्वादितृणलोष्ट्रपर्यन्तं जड़मज्ञशवरादिकं अजड़ं वृहस्पतिप्रभृतिकं अनन्तं निरवधिकं अनन्तमिति सगुणादिषु पञ्चस्वेव विशेषणम् । यद्वा अगुणमित्यत्र एव अनन्तमिति विशेषणं तत्पक्षेऽनीश्वरमित्यर्थः ॥ ७ ॥

जगदिति । सगुणत्वे सर्वोदयस्थितिसंहृतिरूपमाह । तदुद्रयो जन्म स्थितिः पालनं संहृतिर्नाशः तेषां हेतो कारण शेषं स्फुटम् ॥ ८ ॥

वाणीति । जगदुत्कृष्टानि स्त्रीरूपाणीत्यादिः । एकेनैव रूपेण सृष्ट्यादिकर्मकारणशक्तिर्मम नास्ति किं अस्त्येवेति चेत् तर्हि एते स्त्रीपुरुषरूपैरित्याशङ्क्याह अखिलहितकारीति ॥ ९ ॥

यस्तु भजति भगवन्तमभेदम् ।
त्यजति स जगतः गतागतखेदम् ॥१०॥

त्वं खलु शरणमकिञ्चनवित्तम् ।
शोधय कृष्ण रघूत्तमचित्तम् ॥११॥

यस्त्वित्यादि । यस्तु जीवः भगवन्तं ब्रह्म भवन्तं अभेदं यथा भजति स जगति सकलसंसारजीवसमूहमध्ये गतागतखेदं जन्ममरणदुःखं त्यजतीति दुःखरहितो मुक्तो भवतीत्यर्थः । इदमुपलक्षणं धर्मार्थकामानपि स प्राप्नोति ।

हरिशङ्करयोर्मध्ये ब्रह्मणश्चापि यो नरः ।
भेदकृन्नरकं याति यावदाचन्द्रतारकम् ॥

श्रीभागवते तु शिवविष्णोर्भेददर्शनलब्धानर्थं दक्षं प्रति श्रीविष्णोः वचनम्—

त्रयाणामेकभावानां यो न पश्यति वै भिदाम् ।
सर्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छति ॥

इति मोक्षपर्य्यन्तं शान्तिमूचे ॥ १० ॥

त्वमित्यादि । अकिञ्चनानां धर्मार्थसर्वपदार्थत्यागिनां सन्न्यासीनां भक्तानां वित्तं धनं तदेवेत्यर्थः । शरणं तद्रक्षकोऽपि रघूत्तमस्य कवेश्चित्तं मनः शोधय अनादिवासनासहितभेददर्शनादिरूपं मलरहितं कुरु । रघूत्तमेति सम्बोधनं वा एतत्पक्षे सम्बोधकस्येव चित्तमित्यर्थः ॥ ११ ॥

जगदपि कुरुते यदीयमाया
स्वयमपि शुद्धतरोऽपि तद्विकारान् ।
स्फटिकमिव दधाति वर्णभेदान्
कुसुमगतान् प्रणमामि तं परेशम्[1] ॥१२॥

जगदपीति । आत्मनः कर्त्तृत्वादिकं परमार्थतो नास्तीत्याह । यदि च माया यस्मिन्नध्यस्ता माया प्रकृतिः सत्वरजस्तमोमयी जगदपि भूतभौतिकवस्तु-समुदायमपि कुरुते जनयति । जगद्रूपेण परिणमत इत्यर्थः । तर्हि कथं ब्रह्मणि जगदुपादानं प्रतिपादयन्तीति श्रुतिः सङ्गच्छतीत्यत आह । स्फटिकमिवेति स्फटिकमणिर्यथा विचित्राणां कुसुमानां रक्तकृष्णपीतादिवर्णभेदान् दधाति धारयति स्फटिकं रक्तस्फटिकं पीतस्फटिकं नीलं इत्यादि प्रतीतिविषयो भवतीत्यर्थः । तथा तद्विकारान् मायाकृतपरिणामादिधर्मान् स्वयमात्मा अतिशुद्धतरोऽपि सन् दधाति तादृशः प्रतीतिविषयो भवति इत्यर्थः । तं शुद्धबुद्धस्वरूपं परेशं परमात्मानं प्रणमामि । प्रकर्षेण नमस्करोमि इति मङ्गलरूपं गीतेन स्तोत्रं कृत्वा पद्यैकेन कविर्नमस्कारं कृतवान् ॥ १२ ॥

---

1. क सुरेशम् ।

द्वितीयः प्रबन्धः

॥ मल्लाररागेण[1] गीयते ॥

क्रमपरिवर्द्धित[2] मीनतनो मनुशरण समुद्धृतवेदतते ।
मन्दरघर्षणकण्डुकर्षणनिद्रित[3]कृतकमठानुकृते[4] ॥
मामनुकम्पय देव हरे[5] ।
निरुपमगुणगण जगदनुरञ्जन करुणामय भवजलधितरे ।
॥ ध्रुवपदमिदम् ॥ १ ॥

क्रमेति । मायया जीवेश्वरविभागप्राप्तस्य आत्मनो जीवरूपस्य तस्य ईश्वररूपस्य अभेदभजनेन मुक्तिपर्यन्तसर्वपुरुषार्थसिद्धिं पूर्वगीते वर्णयित्वा भजनरूपार्थं तन्माहात्म्यं दशावतारवर्णनया दर्शयति । क्रमेण कालभेदेन परिवर्द्धिता मीनरूपा तनुः शरीरं येन तद् तथाभूतं हे मनुशरण मनुः मन्वन्तरः तस्य अधिपतिः सत्यव्रत नाम तस्य शरणः रक्षक सम्यक् धृत्वा वेदततिर्वेदसमूहो येन हे तथाभूत । मन्दरस्य पर्वतविशेषस्य घर्षणेन देवासुरकृतसमुद्रमन्थनव्यापारघूर्णितस्य कठिन-संयोगपरम्परया कण्डुः कण्डूतिस्तस्यापकर्षणं निवारणं तेन हेतुना निश्चितं जातनिद्रितं चक्षुर्मिलनं निद्रानुकरणं कृतवान् अतएव कृतकमठानुकृते कमठः कच्छपशरीरस्थो जीवः तस्याकृतिः तत् कूर्मानुकरणं स्वीकृता येन हे तथाभूत ।

1. ग. रागस्योल्लेखो नास्ति ।
2. क. परिवर्त्तित ।
3. ख. निर्जित ।
4. घ. कुरुते ।
5. घ. मामनुकम्पय धृति हरिहरे ।

रदनधरोद्धर शूकर[1]तनुधर
रणविहरणहत[2]दितिजपते ।
दलित[3]हिरण्यकशिपुवपुरनुपम-
नृहरितनो नतपरमगते ॥२॥

जीवेऽविद्या कामकर्माधीनतया कण्डुवनादिशरीरधर्मं आत्मनारोपयति । हंसः तु जीववल्लीकामयशरीरधारणेन तत्कर्मानुकरणमेव करोति । तनुः तादृशः भ्रान्तिमान् भवसि स्वतःसिद्धात्मतत्त्वज्ञानवत्त्वादिति भावः । एतेन सर्वावतारकर्म व्याख्यातम् । हे देव विचित्रावतारवृन्दकरणेन क्रीडकभरे भक्तदुःखापहारक मां जीवय अनुकम्पय दयाविषयी कुरु मां संसारादुद्धरेति भावः । निरुपमगुणगणेति निरुपमा उपमारहिता गुणा भक्तवात्सल्यादिगुणसमूहाः यस्य हे तथाभूत हे जगदनुरञ्जन जगदनुरागजनक यद्वा निरुपमगुणगणेन यतोऽनुरंजनं प्रीतिः यस्मिन् हे तथाभूत । सर्वेषां गुणानां मध्ये करुणागुणस्याधिक्यमाह । करुणामयेति करुणा दया निरुपाधिजीव दुःखहरणेच्छा दयापरपक्षया तन्मयः तद्बहुल अतएव भवजलधितरे संसारसमुद्रे नौकायामेव तारक इत्यर्थः ॥ १ ॥

रदनेति । रदने धरामुद्धरतीति शूकरतनुधरत्वेन रणे विहरणं यत् तेन हेतो दितिजपतिः हिरण्यकशिपुः येन तादृशः । दलितः विदारितः हिरण्यकशिपोर्वपुः

---

1 ग. 'रदनधरोद्धरशूकर' इत्यस्योल्लेखो नास्ति ।

2. घ. रणाधिरणहत ।

3 ग. दितिज ।

4 क. ख वपुरनघमनुहरतनो ।

अद्भुतवामन लघुतरयाचन

पदकृतसुरपुरधरणीवृते[1] ।

भृगुवर परशुवरेण हि मुहुरपि

विरचितबाहुजनिवहहते ॥३॥

रघुकुलभूषण हत[2] खरदूषण

रावणवधकृतविबुधरते ।

हलधरतनुधर धरणिभारहर

दमित[3] यमुन यदुवंशपते ॥४॥

शरीरं येन हे तादृश । अनुपमा सादृश्यरहिता नृहरितनुर्नरसिंहशरीरं यस्य हे तथाभूत नतानां भक्तानां प्रह्लादादीनां परमगते परमार्थोपायः ॥ २ ॥

अद्भुतेति । अद्भुतवामनाकारमाश्चर्य्यं खर्वं लघुतरं याचनं पदत्रयमात्रं भूतिप्रार्थनं यस्य, हे तादृश । पदाभ्यां कृता सुरपुरधरण्योः स्वर्गपृथिव्योः वृतिरावरणं येन, हे तादृश । भृगुभ्यो भृगुवंशपुरुषेभ्यो वरः श्रेष्ठः परशुवरेण श्रेष्ठकुठारेण हि एव मुहुः वारम्वारं त्रिसप्तकृत्वो विरचिता बाहुजानां कार्त्तवीर्यार्जुनवंशक्षत्रियाणां निवहस्य समूहस्य हतिः हननं छेदनं येन हे तादृश ॥ ३ ॥

रघुकुलेति । रघुकुलानि रघुवंशभवपुरुषास्तेषां भूषणालङ्कारक । खरदूषणौ रजोगुणतमोगुणसदृशौ राक्षसौ येन हतौ हे तादृश । रावणवधेन कृता

---

1. क. ख. सुरनरधरणीभृते ।

2. ग. जित ।

3. ग. दनुज ।

श्रुतिनिन्दनपर बौद्धकलेवर
मोहितदैवतशत्रुमते ।
असिवरनाशितदुष्कृतराशिक
कलितकल्किवपुरुदितजिते[1] ॥५॥
दशविधतनुभिरनुत्तम[2] रमयसि
जगदिह गमयसि दममहितम् ।

विबुधानां देवानां विशिष्टपण्डितानां वा रतिः प्रीतिर्येन हे तादृश । हलं लाङ्गलं धरतीति हलधरतनुधरः हे तादृश । धरणेः पृथिव्याः भारं असुरवृन्दं हरतीति धरणिभारहरः हे तादृश । दमिता दण्डिता लाङ्गलकर्षणेन यमुना येन हे तादृश । यदुवंशानां पतिरीश्वरः हे तादृश ॥ ४ ॥

श्रुतीति । श्रुतिनिन्दने प्रीयते व्याप्रीयते प्रवर्त्तते इति श्रुतिनिन्दनपरः श्रुतिनिन्दनं वेददोषकथनं परं प्रधानं यस्येति वा हे तादृश । बौद्धः बुद्धपदप्रतिपाद्य-कलेवरं शरीरं यस्य इति वा । मोहिता दैवतशत्रूणां असुराणां मतिर्बुद्धिरन्तःकरणं येन । असिवरेण खड्गश्रेष्ठेन नाशितो दुष्कृतीनां पापीनां यवनप्रायाणामसुराणां राशिः समूहो येन हे तादृश । यद्वा नाशितानि छिन्नानि दुष्कृतिराशेः कानि मस्तकानि येन । कलितं कल्किवपुः कल्किनामकं शरीरं येन हे तादृश । उदिता जितिः पराभवो यस्मात् । यद्वा कलितकल्किवपुषा उदिता जितिः उत्कर्षो यस्मिन् हे तादृश ॥ ५ ॥

दशविधेति । दशविधतनुभिरुक्तप्रकारदशशरीरैः अनुत्तम नास्त्युत्तमो

1, ख. हृते ।
2, ग. तनुभिरनुपम ।

त्वामिह विविधतया परिपश्यति
कुमतिरुपाधिभिरहितम्[1] ॥६॥
तत्त्वं तव तु जलादिषु रविरिव
दशसु तनुषु समभवदुदितम् ।
तदिदमभिन्नतया[2] यदुनन्दन
रचय रघूत्तमहृदि विदितम् ॥७॥

यस्मात् स अनुत्तम निरूपमः पराक्रमेत्यर्थः हे तादृश । रमयसि प्रीतयसि जगत् भक्तवृन्दं इह संसारे गमयसि प्रापयसि दमं दण्डं अहितं शत्रुं दमं दण्डं गमयसीत्यन्वयः सर्वावताराणां शिष्टपालनं अशिष्टदण्डनं इति प्रयोजनयुगलमिति भावः । दशावतारोपलक्षितमेकमेव भगवत् त्वमिति दर्शयति । तत्तद् भक्तानां मोहनिवारणार्थं त्वामित्यादि त्वां परमात्मनं सर्वप्रपञ्चातीतं विविधतया भिन्नभिन्नतया परिपश्यति जानाति । कुमतिः कुबुद्धिः भ्रान्त इत्यर्थः जन इति शेषः । उपाधिर्मायागुणैस्तत्र कृतशरीरादिभिश्च रहितम् अपि निश्चितम् ॥ ६ ॥

तत्त्वमिति । अवारोपितं निर्गुणब्रह्मस्वरूपं तव परमेश्वरस्य जलादिषु आदि शब्दात् दर्पणाकारादिस्वच्छवस्तुषु रविः सूर्य्यमण्डलं स इव दशपंक्त्या संख्यासु तनुषु शरीरेषु मत्स्यादिकल्किपर्य्यन्तेषु समभवत् अजनि उदितं

---

1. क. रूपादिभिरहितम् ।
   ग. रूपादिभिरपि रहितम् ।
2. घ. तदिदमभिलीलया ।

न मत्स्यो नो कूर्मो न भवति वराहो न नृहरिः
न खर्वो[1] नो रामो न च सुगत कल्की स भगवान् ।
गुणाध्यासान्मायात्रिगुणरचितं चित्रसमयो
विधत्तेऽसौ तत्तत्कपटमयरूपं नट इव ॥ २० ॥

मायां वर्णयतोऽमुष्य माययात्मा न मुह्यति ।
इति लीलामयीं मायां वर्णयामि तव प्रभो ॥२१॥

म्बितमित्यर्थः । सूर्य्यमण्डलं यथादर्शपात्रस्थितजलेषु दर्पणादिषु वा प्रतिबिम्बितं सत् इमानि सूर्य्यमण्डलानि भिन्नानीति भ्रान्तिविषयो भवति तथा दशसु शंखादिषु शरीरेषु त्वमपि इमे दशपरमेश्वर इति भ्रान्तिविषयो भवसि । तन्निर्गुणब्रह्मस्वरूप-तत्त्वमिदं सर्वेषां जीवानां आत्मास्वरूपं अभिन्नतया एकत्वेन हे यदुनन्दन न भ्रान्तिविषयान् रचय कुरु । रघूत्तमस्य कवेः हृदि मनसि विदितं ज्ञातं साक्षात्कृत-मित्यर्थः । अनेन ईश्वरप्रसादं तत्त्वज्ञानं भवतीति दर्शयति ॥ ७ ॥

न मत्स्य इति ।[2] नन्वेवं तत्वं विदितप्रायं चेत् तदेव साभासं चिन्तय । अलमन्यद्वरेण इत्याशङ्क्याह शेषं स्फुटम् ॥ २० ॥

मायामिति । तन्मया मायामयलीलावर्णनमन्तरेण चित्तशुद्धेरभावात् तन्न सम्भवतीति तत्करणार्थं भगवन्तं निवेदयति । पूर्वश्लोकार्द्धं श्रीमद्भागवतस्य प्रामाण्यत्वेन संकीर्त्यापरेण स्वपद्यार्थेन वदतीत्यादिना मायां तत्कृतावतारलीलां वर्णयतः प्रबन्धत्वेन कीर्त्तयतः अस्पृश्यमायावर्णनकर्त्तुः पुरुषस्य मायया त्रिगुणरूपया प्रपञ्चाकारिकया आत्मा न मुह्यति परमार्थं ब्रह्मतत्त्वेन भ्रान्तः भवतीत्यर्थः । इति

---

1. क. निखर्वो ।

2. ख. ग. ग्रन्थकृता न लिखितं - इत्यधिकलेखोऽस्ति ।

व्रजपुरतरुणीसुरञ्जयन्तं मदनपरार्द्धमपि श्रिया जयन्तम् ।
दशरथसुतवद्गुणैरनन्तं न भजति को वद[1] नन्दनन्दनं तम् ॥२२॥

व्यासवचनप्रामाण्यात् लीलाशरीरधारणे तत्कर्मानुकरणं नटचेष्टवत्तन्मायां तत् स्वरूपं वर्णयामि प्रबन्धत्वेन कीर्त्तयामि । परमेश्वरस्य राधाकृष्णादिशरीरधारिणः प्रभुः भक्तोद्धारणसमर्थः ॥ २१ ॥

व्रजपुरेति । तदनेन निबन्धनेन भगवन्तं प्रसादयन् लीलावर्णनप्रधानं आदिरसमयं काव्यमारीप्सुमाणः शृङ्गारालम्बनविभावात् भूतं परमोत्कृष्टनायकं श्रीकृष्णावतारिणं तमेव भगवन्तं कविः वर्णयति एकेन पदेन । व्रजपुरस्य तरुण्यः वीक्ष्यमाणाः श्रीराधिकादिकाः सुरंजयन्तं विषयाशयितप्रोतिमतिः कुर्वन्तं मदनपरार्द्धमपि परार्द्धसंख्यककन्दर्पानपि श्रिया शरीरसौन्दर्येण जयन्तं आविर्भवन्तं दशरथसुतवत् श्रीरामचन्द्रमिव गुणैः सौन्दर्यशौर्यगाम्भीर्यधैर्यदयादाक्षिण्यदीनोद्धारकत्वादिभिरनुपमैर्गुणैरनन्तम् अपरिच्छेद्यं न भजति कीर्त्तनश्रवणादिभिर्नाराधयति । कश्चतुर्णां वर्णानां आश्रमाणां च मध्ये को जन इत्यर्थः । वदेति संसारिणं सम्बोधनं तत् संसारिण इत्यर्थः न तद् व्रजाधिराजो गोपस्तस्य नन्दनं पुत्ररूपेण प्रकाशमानं तं गोपालतापिन्यादिभिश्च श्रीमद्भागवतादिपुराणसंहितादिप्रसिद्धं भगवन्तं श्रीकृष्णाख्यमर्थमिति भावः । एतादृशं गुणवन्तं भगवन्तं कीर्त्तनश्रवणादिभिः सर्वेषां भजनीयं कविरहं यतिरपि स्ववाग्विलासेन भजामीति ॥ २२ ॥

---

1. ग. घ. वत ।

सुललितनवयौवनप्रवेशे रुचिरतरं समुदीक्ष्य[1] गोपकन्याः ।
मधुमधुरतरानुरागभागं भगवति तत्र गता जगद्विरामम्[2] ॥२३॥

सुललितेति । सम्भोगविप्रलम्भद्विविधश‍ृङ्गारस्य प्रथमं विप्रलम्भश‍ृङ्गारं वर्णयति । युक्तं चैतत्—

सम्भोगो विप्रलम्भश्च श‍ृङ्गार द्विविधो मतः ।
न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते ॥ इति अलङ्कारशास्त्रात् ।

तत्र च—पूर्वानुरागो मानाख्यः प्रवासः करुणात्मकः ।
विप्रलम्भाभिधानोऽयं श‍ृङ्गारः स्याच्चतुर्विधः ॥
तयोः या सङ्गमात्पूर्वं दर्शनश्रवणादिना ।
रतिरुन्मीलति प्रायः पूर्वरागः स उच्यते ॥ इत्यालङ्कारिकमतमवलम्ब्य पूर्वरागं वर्णयति । तत्रापि कामुककामिन्योर्मध्ये प्रथमं कामिन्या एव रागो वर्णनीयो रसाधिक्याच्च व्यासादिभिः श्रीभागवतादौ गोपीनां कृष्णविषये पूर्वं पूर्वरागवर्णनात् इति प्रथमम् इति नायिकारागमेव वर्णयति त्रिभिः सर्गैः । श्रीकृष्णपूर्वरागं तु पञ्चम एव वर्णयिष्यति । सुष्ठु ललितं मनोहरं यन्नवयौवनं कैशोरान्तरिता शरीरदशा तस्य प्रवेशे प्राप्तौ तत्काल इत्यर्थः रुचिरतरम् अतिशयितसुन्दरतनुं भगवन्तं श्रीकृष्णाख्यं उद्वीक्ष्य दृष्ट्वा गोपकन्याः गोपीनां वृषभान्वादीनां वल्लवादीनां सुताः राधादयः मधुरतरो मनोहरो योऽनुरागभागः प्रीतिलेशस्तं तत्र श्रीकृष्णरूपे भगवति परंब्रह्मणि गताः प्राप्ताः । कथंभूतमनुरागं जगद्विरामं जगति श्रीकृष्णवस्तुजाते विरागः वैराग्यं प्रीत्यभावो यस्मात् तं

1. ग. घ. तमुदीय ।
2. क. घ. विरागम् ।

ललितगतिविलासहासदृष्टं[1] तमनिशमन्तरनुस्मरन्त्य[2] इष्टम् ।
धनमिव कृपणाः परस्परं ता हृदयकृतं किल न स्म वेदयन्ति ॥२४॥
हृदकृतमपि कृष्णरागरत्नं तनुपटगोपितमप्यमन्दयत्नम् ।
अनुमितमितरेतरं तु ताभिः[3] स्फुरदनुभावविशेषभानहेतोः ॥२५॥

अङ्कुरीभूतमनुरागमेव स्वल्पतया रागपदेन विशेषयित्वा तस्यापि जगद्विरागहेतुत्वेन महात्म्यं दर्शयित्वा अहो पल्लवितश्रीकृष्णप्रेम्णा तत्स्वरूपं प्राप्तिरेव महत् फलं भविष्यतीति जीवानां प्रतिध्वनितम् ॥ २३ ॥

ललितेत्यादि । गतिर्गमनं विलासो देहदीप्तिः हासं स्मितं दृष्टं दृष्टिः विलोचनक्रिया ललिता मनोहरा एता यस्य तं श्रीकृष्णम् अनिशं निरन्तरम् अन्तः हृदि अनुस्मरन्त्योऽनुचिन्तयन्त्य इष्टं प्रियधनमिव कृपणाः दीनाः दरिद्राः कदर्या वा जनाः इति शेषः । परस्परमन्योऽन्यं ताः श्रीकृष्णप्रेयस्यः गोपकन्याः श्रीराधाद्यः हृदये कृतं हृदयनिहितं किल एव न वेदयन्ति स्म न व्यज्ञापयन् । २४ ॥

हृदेति । श्रीकृष्णविषयमनुरागं परस्परमावेदयन्त्योऽपि अनुभवलिङ्गेन अनुमितवत्य इत्यादिः । हृदि मनसि कृतं निहितमपि निश्चितमपि कृष्णे रागोऽनुरागः स एव रत्नमिव मणिरिव तत् कृष्णरागरत्नं, तनुरेव पट इव तनुपटस्तेन गोपितं

---

1. क. ख. दृष्टिं ।
2. क. रनुस्मरण्य ।
3. क. सुतभिः ।

अनुदिनमनुचिन्तनामृतौघैः स्नपिततरा हरिभक्तिकल्पवल्ली ।
क्रमश उपचितैव गोपिकानां[1] तनुभुवि चित्तमहीरुहावलम्बा ॥२६॥

इति श्रीमुकुन्दविलासे महाकाव्ये यतीन्द्ररघूत्तमतीर्थपादकृतौ[2] गोपीपूर्वानुरागो[3] नाम प्रथमः सर्गः ।

सम्भृतमपि अमन्दयत्नं यथा स्यात्तथा असाधारणयत्नमित्यर्थः । अनुमितमनुमानविषयीकृतमपि इतरेतरं तु परस्परमेव ताभिर्गोपकन्याभिः स्फुरदनुभावः श्रीकृष्णादिनामग्रहणकृष्णसदृशमेघतमालनीलघनवनप्रभृतिवस्तुदर्शनादिजन्यपुलककम्पादिः । तस्य विषयोऽतिशयः तस्मिन् भानं ज्ञानं तदेव हेतुस्तस्मात् । रत्नपक्षे कृष्णो रागो वर्णो यस्य तं कृष्णरागरत्नं इन्द्रनीलमण्यादिरूपं हृत्कृतं वक्षसि निहितहारादिनानन्दनत्वेन प्रथितं तनुपटगोपितं सूक्ष्मवस्त्रावृतं तनुपटं भित्त्वापि स्फुरत् प्रकाशमानं अनुभावविशेषणं प्रभावविशेषेण युक्तं भानं दीप्तिस्तदेव हेतुः लिङ्गस्तस्मात् बहिर्यथा पर्वते पर्वते···[4] मेव अनुमियते तथा वक्षःस्थलमणिरपि वस्त्रभेददीप्त्या ज्ञानमानया अनुमीयते । एवं श्रीकृष्णविषयानुरागं गोपकन्याहृदयस्थितो विलक्षणपुलकाद्यनुभावज्ञानेन हेतुना···[5]वः ज्ञायमानलिङ्गज्ञानमनुमितिकारणमिति मतिद्वयं च दर्शितमित्यन्यत्तत् ॥ २५ ॥

अनुदिनमित्यादि । हरिभक्तिः कृष्णविषयाप्रीतिः सैव कल्पवल्लीव सकलाभीष्टदायिनी सा हरिभक्तिः कल्पवल्ली । शेषं स्फुटम् ॥ २६ ॥

॥ इति श्रीमुकुन्दविलासप्रकाशिकायां प्रथमः सर्गः ॥

---

1. ख. ग. गोपीनां ।
2. ख. ग. रघुत्तमकृतौ ।
3. क. पूर्वानुरागप्रकटनो ।
4. ख. ग. पाठः कीटदष्टः ।
5. ख. ग. पाठः कीटदष्टः ।

द्वितीयः सर्गः

स्मितसरसतरास्यं भ्रूलतामञ्जुलास्यं[1]
सुमधुरपरिहासं[2] कोमलं वाग्विलासम्।
स्फुटतरहरिभावं गोप्य उद्यद्विभावं[3]
व्यदधत भगवन्तं चिन्तयन्त्योऽतिकान्तम् ॥१॥

स्मितेति। द्वितीयसर्गे गोपकन्यावतारस्य श्रीमुकुन्दस्य श्रीकृष्णावतार-विषयकप्रथमसर्गप्रकटितप्रेमजनितबाल्यलीलाकौशलं वर्णयति। वाग्विलासं गोप्यः व्यदधत अकुर्वन् इत्यन्वयः। वाग्विलासं कीदृशं स्मितसरसतरास्यं स्मितेन ईषद्धासेन सरसतरं स्निग्धतरं आस्यं मुखं यस्मिन् यथा स्यात् तथा तम्। पुनः किंदृशं सुमधुरेति मनोहरपरिहासः परस्परमुपहसनं यत्र स तथा तम्। पुनः कीदृशं कोमलं अनिष्ठुरार्थम्। पुनः कीदृशं स्फुटतरो हरिभावः कृष्णविषयभक्तिर्यत्र स तथा तम्। पुनः कीदृशं तत्तद् प्रकाशमानो विशिष्टो भावो भावना श्रीकृष्णविषयिनोस्तुतिप्रयोगः यत्र स तथा तम्। गोप्यः कथंभूता भगवन्तं शोभातिशययुक्तं चिन्तयन्त्यः मनसा स्मरन्त्यः अतिकान्तं अतिप्रियम् ॥ १ ॥

---

1. क. मञ्जुहास्यं।
2. क. घ. परिहास्यं।
3. ग. घ. उद्यत्विभाषम्।

तृतीयः प्रबन्धः

॥ शार्ङ्गी[1]रागेण गीयते ॥

करचरणादि किमपि नहि चलयसि कलयसि कमपि न भोगम् ।
अविरतनिभृतगतवरवर्णिनो वरयसि चिद्रसयोगम् ॥१॥
सखि हे, मनसि जपसि किमु मन्त्रम्[2] ।
ध्यायसि रहसि देवमिह कञ्चन परमभावपरतन्त्रम् ॥
॥ ध्रुवपदमिदम् ॥२॥

करचरणेति । श्रीराधिका रहसि स्मिता । यथा हरिचिन्तनातिमग्ना दशोः काचित् सश्लेषमुपहसति । चलयसि चलं चलनयुक्तं करोषि । भोगं विषयोपभोगं किमपि एकमपि न कलयसि न करोषीति चिद्रसस्य ब्रह्मरसस्य योगं वरयसि । पक्षे चिदिति प्रश्ने अव्ययं रसयोगं संयोगसम्बन्धं वाञ्छसि । मन्त्रं योगिनां जप्यं प्रणवं पक्षे मन्त्राणां कृष्णप्राप्त्युपयोगिनो एवमेव करिष्यामि । एवमादिरूपं कञ्चन देवं कांचित् देवतां ब्रह्माख्याम् । पक्षे देवं क्रीडनकर्त्तारं कञ्चन मनोऽभिलषितं देवं, कथंभूतं परमभावं परमतन्त्रं परमभक्त्यधीनम् । पक्षे परमरत्यधीनम् ॥ १-२ ॥

---

1 ख. ग. शारङ्ग ।
घ शार्ङ्ग ।

2. ख. ग. सखि हे पश्यसि मनसिज किमु मन्त्रम् ।

अथ किमु यामुनतटगतया वत देवतयासि[1] निविष्टा ।
किमथ निकुञ्जगता[2] क्वचिदप्यसि कृष्णभुजङ्गविदष्टा ॥३॥
इति निशमय्य सखीवचनामृतमुदितसुखागतबाधा[3] ।
सस्मितमाह रघूत्तमवर्णितशुभचरिता[4] किल राधा ॥४॥

अथेति । पक्षान्तरार्थः किमु वितर्के । देवतया गान्धर्वादिरूपया ध्रुवपक्षे श्रीकृष्णरूपया निविष्टा आविष्टा । पक्षान्तरे किमिति प्रश्ने वितर्के वा कुञ्जगता पुष्पावचयायेत्यर्थः । श्रीवृन्दावनमध्ये निकुञ्जे प्रविष्टासि । इति कृष्णभुजङ्गेन कृष्णनायकेन विदष्टा विशेषेण दन्तेन अधरादौ क्षता स्मरणरसावेशेन स्तब्धासि । विदृष्टेति पाठोऽपि विशेषेण भावाभिरञ्जनेन अतिमनोहरदर्शनेन दृष्टा येनाहूतचिन्तास्तब्धासीति-भावः । सर्पदंशन पक्षे मन्त्रसिञ्चं पश्यसि किमु मन्त्रमित्युपयुज्यते । वनदेवतावेश-पक्षे च मन्त्रजपस्तव युज्यते ॥ ३ ॥

इतीति । इति पूर्वोक्तं श्लिष्टं सख्याः वचनामृतं निशमय्य[5] अर्थ-विभागेन श्रुत्वा उदितसुखा जातानन्दा अत्र बाधा नष्टदुःखात्सस्मितं यथा स्यात् तथा आह वक्ष्यमाणगीतरूपवचनप्रकारेणेत्यर्थः । आहेत्यत्र वर्त्तमानपक्षे यस्य चिद्वृत्तिः लक्षणयाऽतीतत्वमर्थः । सा राधिका कीदृशी रघूत्तमेन वर्णितं कवित्वं चरितं चरित्रं यस्याः किल वाक्यालङ्कारे ॥ ४ ॥

---

1. घ. अथ किमुयामुनगहनछायावत देवतया ।
2. ख. ग. अथ किं कुञ्जगता ।
3. क. मुदितमुदागतबाधा ।
   ख. ग. सुगागतबाधा ।
4. ग. घ. शुभरचिता ।
5. ख. निसमत्य ।

चतुर्थः प्रबन्धः

॥ मङ्गलगुञ्जरीरागेण गीयते ॥

यामुनतटनिकटाटनशीलनमुपगतकेलिकदम्बम् ।
नवघनपुञ्जमञ्जुदलिताञ्जनगञ्जनरुचिनिकुरम्बम्[1] ॥
॥ ध्रुवपदमिदम् ॥१॥

सखि हे, कंचन कृष्णभुजङ्गम् ।
अद्य[2] विलोकितवत्यहमद्भुतभङ्ग[3]वलितलसदङ्गम् ॥२॥

यामुनेति । श्रीराधिकापि तां सखीं श्लेषेणाह । उपगतं केलिकदम्बं कदम्बो वृक्षविशेषो येन कृष्णभुजङ्गेन तम् । श्रीकृष्णपक्षे उपगतं केलिकदम्बं गोपबालैः सह विहारवृन्दं येन तम् । उपगतं केलिकदम्बो वृक्षविशेषो येन । अनेन केलिदम्बतले तमित्युक्तं नवघनादीनां गञ्जनं परिभवकरं रुचिनिकुरम्बं कान्तिसमूहो यस्य तम् । उभयपक्षेऽपि तुल्यमिदं कृष्णभुजङ्गमिति कालसर्पं कृष्णनाम नामकं च विलोकितवती दृष्टवती । अहं राधा अद्भुताभिः उच्चाभिश्च यद्भङ्गुराभिः लसन्ति अङ्गानि करचरण-

---

1. ख. ग. निकुरुम्बम् ।

2 घ. ताप ।

3. ख. ग. भङ्गि ।
घ. ऊर्द्धं ।

चपलाचपलकुटिलनयनाञ्चलचलितविषमविषधारम् ।
स्वनिःश्वसितावलिकलितबेणुरवरचितचमत्कृतिसारम् ॥३॥

गोवर्द्धनधरमखिलगुहाशयमणिधरकुण्डलयोगम् ।
भुवनमनोरमसरस[2]रघूत्तमस्मितसुन्दरभोगम् ॥४॥

कटीग्रीवालोचनादिरूपाणि अङ्गानि यस्य श्रीकृष्णनायकस्य तम् । सर्प पक्षे अभिलषदङ्गं यस्य तं गमनेन गच्छन्तं सर्पं दृष्टवतीत्युक्तम् ॥ १-२ ॥

चपलेत्यादि । चपलेव चपलं यत् कुटिलं नयनाञ्चलं लोचनप्रान्तभागः ततश्चलिता विषमा विषधारा यस्य सर्पस्य तम् । कृष्णपक्षे नयनाञ्चले चलितनयनप्रान्तभाग-क्रियाविशेषः. तदेव विषमविषधारेव यस्य तम् अयं भावः । तस्य लोचनक्रिया मदुपरि या जाता सा मां औषधादिदुर्वारविषमिव दंदहतीति । निश्वःसितावल्या निश्वासश्रेण्या कलितः कृतः बेणुवत् यो रवः शब्दस्तेन रचिता चमत्कृतिसाराऽस्याश्चर्य्यबुद्धिर्ममेत्यनेन तम् । कृष्णपक्षे बेणुवदुपमा नास्तीति बोद्धव्यम् ॥ ३ ॥

गोवर्द्धनधरमित्यादि । गोवर्द्धने यमुनातटप्रकटपर्वते ध्रियतेऽवतिष्ठते इति गोवर्द्धनधरस्तम् । कृष्णपक्षे अयमर्थः संगच्छते । प्रकारान्तरं तु सुगमम् । अखिल-

---

1. ख. ग. निःस्वसितावलि ।

2. घ. रसय ।

प्रियरतिमुदयन्तीं यत्नतो गोपयन्तीं
छलवचनविलासं कुर्वतीं मन्दहासम् ।
चतुरतरवयस्या भावबोधात्सहासा
स्फुटतरमविषादं तामिदं संजगाद ॥२॥

गुहाशयं अखिलगुहासु पर्वतसकलदरीषु शेते यस्तम् । एतेनाश्चर्योऽयं सर्प इति भावः। कृष्णपक्षे अखिलानां जनानां गुहासु हृदयदरीषु शेते तिष्ठति सर्वान्तर्यामीत्वात् यस्तम् । मणिधरकुण्डलयोगमिति मणिधरश्चासौ कुण्डलयोगश्चेति मणिधरकुण्डल-योगस्तम् एतेन फणायां मणिधरः कर्णभ्योः कुण्डलभावसम्बन्धी सर्पोऽयमित्युक्तः । कृष्णपक्षे मणिधरे क्षुद्रपद्मरागादिविचित्रमणिखण्डनिकरखचिते कुण्डले स्वर्णमय-कर्णकुण्डले तयोर्योगः कर्णसम्बन्धो यस्मिन् तम् । स्थितं भुवनं मनोरमः सरसः स्निग्धः राजा रघूत्तमः श्रीरामचन्द्रस्तेन सस्मितः सदृशः सुन्दरः रुचिरः भोगोवपुर्यस्य शरीरं यस्य तम् । एतेनात्यन्ताश्चर्योऽयं सर्प इति व्यञ्जितः। कृष्ण इति ध्वनितम् । अपिव रघूत्तमेन कविना सम्यक् स्थितः शास्त्रजन्यप्रेमविषयीकृतः सुन्दरभोगः सहजरुचिरस्वरूपभूतं नित्यसुखं यस्य स रघूत्तमसुन्दरभोगस्तं पूर्वविशेषणद्वयेन भोगान्तस्य कर्मधारय इति द्रष्टव्यम् ॥ ४ ॥

प्रियरतिमिति । इति श्लेषवचनवृन्देनापि श्रीकृष्णविषयरतिं केचित् व्यञ्जितां केचिद्गोपिताम् उपलभ्य सखी विरहाकुलां राधिकां आश्वासयन्ति गाथान्तरेण श्रीकृष्णेन सह सम्मिलनसम्भावनामाह । प्रिये श्रीकृष्णे रतिः प्रीतिस्तां शेषं स्फुटम् ॥ २ ॥

पञ्चमः प्रबन्धः

॥ वाल[1]धनासीरागेण गीयते ॥

लसदुपयमुनाविपिनमिलितेन[2] । कुसुम[3]चयाशयगतिरचितेन[4] ॥
हरिणा त्वमहो सखि लोकिता ॥ ध्रुवपदमिदम् ॥१॥
नवजलधरवररुचिरतरेण[5] । जितचपलातनुरुचिनिकरेण ॥२॥
त्रिभुवननिरुपमतरुणवरेण । जगदधिकागुणगरिमभरेण[6] ॥३॥
अमलकमलदलजयिनयनेन । जितनटखञ्जनदृगभिमतेन[7] ॥४॥
सततविबुधशतनतचरणेन । प्रणतपदासुरयुवतिगणेन ॥५॥

लसदित्यादि । हरिराधिकयोः विशेषेण तृतीयान्तप्रथमान्ते] सर्वत्र द्रष्टव्ये ॥ १ ॥

नवजलधरेति । तनुरुचि-निकरेण जित-चपलेत्यन्वयः ॥ २ ॥

त्रिभुवनेति । गुणगरिमाभरेण गौरवातिशयेन जगदधिका सकल-देवदेवीनिकरेभ्योऽधिकेत्यर्थः ॥ ३ ॥

अमलेति । अभिमतेनेति श्रीकृष्णविशेषणम् ॥ ४ ॥

---

1. ख. ग. घ. वाला ।
2. घ. मिलितेव ।
3. क. कुसुमाय ।
4. ख. ग. रपितेन ।
5. क. वररुचिरेण ।
6. क. गुणरिमभरेण ।
7. क. खञ्जन··पाठः कीटदष्टः ।

तव शुभगुणगणरतहृदयेन[1] । मुदितमना बहुतदतिशयेन ॥६॥
मरकतमुकुरविजयिवदनेन । जितशशिना सुविमललपनेन ॥७॥
अनघरघूत्तमयतिभणितेन[2] । मुदमुपगच्छत[3] परमहितेन ॥८॥

मधुमथनकथा[4] सुधाभिषिक्ता
वरतनुहेमलता गता प्रमोदम् ।
पुलकमुकुलपूरपूरिताङ्गी
स्मितकुसुमालिविकाशशोभिताभूत्[5] ॥ ३ ॥

प्रियसखीविदिते तु मनोगते[6]
हरिनवप्रणये वृषभानुजा ।
स्वविषयां प्रियतामनुमन्वती
प्रकटमाह मुदा प्रियचेष्टितम् ॥४॥

सततेति । बहु अतिशयेन बहुतरश्रीकृष्णमाहात्म्येन मुदितमना हृष्टमना स इत्यर्थः ॥ ५-७ ॥

अनघेति । कविना कवित्वेन वा अन्वितमिति द्रष्टव्यः । उपगच्छतेति हे श्रीकृष्णभक्ता इति शेषः ॥ ८ ॥

मधुमथनेत्यादि । वरतनु श्रीराधिका सैव हेमलतेति रूपकालङ्कार-श्लोकोऽयम् ॥ ३ ॥

प्रियसखीति स्पष्टम् ॥ ४ ॥

---

1 घ गणेन ... पाठः कीटदष्टः ।
2 घ. अनघरघु...तन कीटदष्टः ।
3 क. गच्छता ।
4 क. मधु...पाठः कीटदष्टः ।
5 क. स्मि...श्मेभि: पाठः कीटदष्टः ।
6 क. मनोगतात् ।

षष्ठः प्रबन्धः

॥ धनासीरागेण गीयते ॥

सखी हे निशमय परमरहस्यम् ।
तदवधि तन्मयमभदखिलमपि यदवधि कृष्णमपश्यम् ॥
॥ ध्रुवपदमिदम् ॥१॥

त्रिभुवननिरुपमनिखिलमनोरमनवतरनटवरवेशम् ।
मुरलोमिलितललितरदन[1]च्छदमतिमधुरस्मितलेशम् ॥२॥

सतृषदृशा सखि मन्मुखदर्शनगलितमनोहरवंशम् ।
लोलाकन्दुकधृतनखलेखनमपि कृतनवदलदंशम् ॥३॥

सखीत्यादि । निशमय शृणु । परमरहस्यं अत्यन्तमित्यनेन गोपनीयं कुत्राऽपि न प्रकाश्यं त्वयि तु द्वितीयहृदयमिव विश्वासस्थाने प्रकाशयामिति भावः । तदवधि श्रीकृष्णदर्शनक्षणावधि तन्मयं श्रीकृष्णमयमखिलमपि जगदपि यत्र यत्र दृष्टिं निक्षिपामि तत्र तत्रैव श्रीकृष्णं पश्यामीति भावः ॥ १ ॥

त्रिभुवनेत्यादि स्पष्टम् ॥ २ ॥

सतृषेत्यादि । सतृषा सतृष्णा तृष्णाव्यञ्जका या दृक् नयनं तथा करणभूतया इति बाह्यान्वयः इति बाह्येनैव समस्तस्य दर्शकस्य अन्वयो द्रष्टव्यः

---

1. क. मिलितरदन ।

सपदि भुजान्तरनीतपीतपटमुकुलितलोचनकञ्जम् ।
हृदयीकृतनिजकान्तरघूत्तमलब्धरुचिररुचिपुञ्जम् ॥४॥

मन्मुखदर्शनेन गलितोऽधरात् कराभ्यां च मनोहरो वंशो मञ्जुमुरली यस्य स तथा तं एतेन सविषया प्रेमानुरागदर्शनजन्य मोहातिशयः श्रीकृष्णस्य जात इति ध्वनितम् । लीलायै तस्य लीलायै कन्दुकः लीलाकन्दुकः कन्दुक इति । आस्फालनेन चालनीयं कदम्बपुष्पा कावन तरुणी कुम्भकारं किमपि वस्तु अस्मिन् लीलाकन्दुके धृतं निहितं नखेन लेखनात् अथ नखलेखनान्तरं दले सदृशे रक्तनामकाशोकपत्रे दंशे दन्तसंयोगे यथा स्यात्तथा तं एताभ्यां चेष्टाभ्यां त्वत्कृतेऽधरे नखाघातदन्ताघातौ मया कृताविति मां प्रति परिहसितं तेभ्य इति ध्वनितम् ॥ ३ ॥

सपदीत्यादि । सपद्यधरसदृश नवदलविशेषता एव भुजान्तरे नीतः पीतपटम् उत्तरीयं पीतवसनं गौराङ्गीसदृशं येन सा तथा मुकुलिते मुद्रीकृते लोचनकञ्जे नयनपद्मे येन स तथा तं स तथा तद्दन्तघातौ मया कृताविति चासौ स चेति तम् एतेन त्वदालिङ्गनसुखेन मम लोचनमुद्रणं जातमिति मां प्रति तेन परिहसितं इति व्यञ्जितम् । पीतपटालिङ्गनेन जातशोभस्य श्रीकृष्णस्य उपमामाह । हृदयीकृता हृद्गतीकृता निजकान्ता श्रीसीता येन । सहृदयीकृतं निजकान्तं स चासौ रघूत्तमः श्रीरामचन्द्रश्चेति स तथाभूतः स इव लब्धरुचिररुचिपुञ्जः प्राप्तमनोहरशोभासमूहो यः श्रीकृष्णः तं अथ च हृदयीकृतो हृत्स्थीकृतो निजकान्तो निजाद्रि....देवो येन रघूत्तमेन

---

1. ख. ग. घ. नवदलदंशं ।

काचित्कमलपत्राक्षी कांचित्प्राह सखीं प्रियाम् ।
श्लिष्टामक्लिष्टविस्पष्टां वाणीं वाणीव पण्डिता ॥५॥

सप्तमः प्रबन्धः

॥ वसन्तरागेण गीयते ॥

हे सखि हरिवरमेकमपश्यम् ।
सततगुहाशयनं क्वचन दृश्यम् ॥
ध्रुवपदमिदम् ॥१॥

कविना तेन लब्धः प्राप्तरुचिरो मंजुलो रुचिपुंजः प्रीतिसमूहो यस्मिन् श्रीकृष्णे तथा तमित्यर्थः ॥ ४ ॥

काचिदित्यादि । गाथाचतुष्टये मत्सखि श्रीराधिकयोः विचित्र-वाग्विलासरूपेण श्रीराधिकाकृष्णयोः पूर्वानुरागौ सख्यगुणभावेन वर्णयित्वा गोप्यन्तरस्यापि वाग्विलासद्वारा पूर्वानुरागं वर्णयन्नाह । श्लिष्टां श्लिष्टालङ्कारयुक्तां अभीष्टविस्पष्टां माधुर्यप्रसादगतां वाणीव पण्डिता सरस्वतीव पण्डिता वाग्विलास-रचनचतुरा प्राह ॥ ५ ॥

हे सखीत्यादि । हरिवरं सिंहश्रेष्ठं पक्षे हरिः श्रीकृष्णः सर्ववरः वरणीयः पतिस्तं एकं व्यापकमपश्यं बुद्धिविषयीकृतं विषयीकरोमीत्यर्थः । हरिवरं कथंभूतं सततं निरन्तरं बहुकालं गुहायां पर्वतदर्यां शयनं यस्य स तथा तं

1. ख, ग क्वच दृश्यम् ।

पुरुषकुञ्जरततिभिरधृष्यम् ।
सुतरां मानुषपशुभिरमृष्यम् ॥ २ ॥
गोवर्द्धनगिरिभुवि विचरन्तम् ।
सुविदितनिरुपमविक्रमवन्तम् ॥३॥
अरुणनाभितनुमध्यविलासम् ।
पृथुलतरोरसमभ्रकभासम् ॥४॥

क च कदाचिदाहारादिसमुद्दश्यं दृष्टं कस्यापि दृष्टिविषयम् । कृष्णपक्षे सततं गुहासु जीवानां हृदयदरीषु शयनस्थितिः यस्य स तथा तं क च दृश्यं क च कदाचिद् योगिनां ध्यानसमयदृश्यं साक्षात्कारविषयम् ॥ १ ॥

पुरुषेति । पुरुषाश्च कुञ्जराश्च तेषां ततिभिः समूहैः अधृष्यं भवितुमशक्यं यद्वा पुरुषकुञ्जराः पुरुषश्रेष्ठाः महावीराः तेषां समूहैरपि शेषतुल्यं अन्यत्र पुरुषश्रेष्ठैः महावीरैस्तृणावर्त्तादिभिः शेषतुल्यं सुतरामिति मानुषाः सामान्यधिया पशवः सामान्यमृगारतैस्ततिभिरधृष्यं तु सं द्रुमशक्यम् । अन्यत्र मनुष्यपशुभिः पशुसदृशममृष्यं विचारयितुं शक्यं ज्ञातुमशक्यमित्यर्थः । धिया प्रागल्भ्ये मृष तितिक्षायामिति धातुः च मूर्द्धन्यान्तं तस्यैव रूपप्रतिपत्तिमिदं अधृष्यं अमृष्यमिति ॥ २ ॥

गोवर्द्धनेत्यादि । उभयपक्षेऽपि तुल्यं न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकर इति न वाच्यम् । "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायिने । संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः" इति व्युत्पत्तिवचनात् भूमाद्यर्थेऽत्र प्रकृतेर्मतुपो विधानात् ॥ ३ ॥

अरुणेति । तत्र नाभिक्षीणमध्याभ्यां विलासः शोभा यस्य सा तथा

लसदरुणायततरलदृगन्तम् ।
चकितां मामवलोकितवन्तम् ॥५॥

सपदि तदाहमपस्मृतगेहा ।
अचलपदा पुलकाकुलदेहा ॥६॥

यदि निरमास्यदसौ करकृष्टाम् ।
मामकरिष्यत सपदि विदष्टाम् ॥७॥

तम् इदमभ्युदयः । तदेव तुल्यं अभ्रकभासमिति । अभ्रगिरिजामिलमित्यादिना शुक्लः स्वच्छवस्तुविशेषः तस्येव भाः कान्तिर्यस्य स तथा तम् । अन्यत्र अभ्रं मेघः अभ्रमेवाभ्रकं स्वार्थे कः शेषं तुल्यम् ॥ ४ ॥

लसदित्यादि सुगमम् । चलितां भीतां भयेन चञ्चलां वा अन्यत्र लज्जया चञ्चलां शेषं सुगमम् ॥ ५ ॥

सपदीति । सपदि झटिति तदा मत्कर्मक-हरिकर्तृकदर्शनकालेऽहं गोपी अपस्मृतगेहा इत्यर्थः । अहं पुनः किदृशी अचलपदा अचले स्तम्भीभूते पदे चरणे यस्याः सा तथा पुलकैराकुलो व्याप्तो देहो यस्याः सा तथा उभयपक्षे भयानन्दाभ्यामित्यर्थः ॥ ६ ॥

यदीत्यादि । निरमास्यत् अकरिष्यत् । असौ हरिः करकृष्टां कराभ्यां कृष्टां आकृष्टामित्यर्थः । अन्यत्र करे कृष्टां धृतां आकृष्टां वा सपदि विदष्टं विशेषेण कुचकुम्भयोः करिकुम्भभ्रमात् दष्टं दशनक्षतं अकरिष्यत इत्यन्वयः । विशेषेण कामकलाकौशल्येन अधरादौ दष्टामकरिष्यत इत्यन्वयः ॥ ७ ॥

इति हरिदयितावचनं सारम् ।
रसय रघूत्तम[1]भजितमुदारम् ॥८॥

पश्यन्तीं मां सखि हरिवरं दृष्टवन्तं कटाक्षैः
स्मारं स्मारं पुलककुलकैराकुलाङ्गी सदाहम् ॥
कृष्णं बाले वरमभिमतं बोधय किम्बासि हृष्टा
मैवं मैवं गिरितटवने सिंहदृष्ट्यास्मि भीता ॥६॥

काचित्कुमारी रमणीयवाणीविवृद्धकृष्णाद्भुतरूपरागा ।
सगद्गदं साश्रु सरोमहर्षं हर्षेण संप्राह परा वयस्याम् ॥७॥

इतीति । सारं वरं रसय आस्वादय । हे कृष्णभक्त इति शेषः । भणितं कवितं उदारं औदार्य्यगुणयुक्तम् ॥ ८ ॥

पश्यन्तीमित्यादि श्लोकः सुगमम् ॥ ६ ॥

काचिदिति । गोप्यन्तरस्य श्लेषं मधुरक्रमेण वाग्विलासेन पूर्वरागं वर्णयति । काचिदपरा उत्कृष्टा अन्या वा कुमारी वयस्यां सखीं सम्प्राहेत्यन्वयः शेषमविषमम् ॥ ७ ॥

---

1. ख, ग, घ. अनघरघुत्तम ।

अष्टमः प्रबन्धः

॥ तोड़िरागेण[1] गीयते ॥

कमपि समैक्षिषि सखि पुरुषेशम् ।
विलसदनुक्षणनवनववेशम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

द्युतिभिरखिलदिशमुज्ज्वलयन्तम् ।
मरकतमयमिव विधुमुदयन्तम् ॥२॥

हरिमणिमयमधुजितप्रतिविम्बम् ।
जङ्गममिव गतकेलिकदम्बम् ॥३॥

कमपीति । समैक्षिषि अद्राक्षं पुरुषेशं पुरुषश्रेष्ठं विलसन् अनुक्षणं प्रतिक्षणं नवनववेशो यस्य स तथा तम् ॥ १ ॥

द्युतीति । द्युतिभिर्देहकान्तिभिरखिलं दिशं सर्वाशाम् उज्ज्वलयन्तं सजातीयप्रकाशयुक्तं कुर्वन्तम् । पुनः कीदृशं मरकतमयं विधुमिव चन्द्रमिव उदयन्तं प्रकाशमानं अद्भुतोपमेयम् ॥ २ ॥

हरिरिति । तमेव उत्प्रेक्षते । हरिमणिः तन्मयं तन्निर्मितं मधुजित-प्रतिविम्बं श्रीकृष्णप्रतिमां जङ्गममिव वृक्षमूलगतमनुष्यवत् चलनं तदिव गतकेलि-कदम्बं गतः केलिकदम्बो वृक्षविशेषो येन तत् यथा इन्द्रनीलमणिमयी श्रीविष्णुप्रतिमा

---

1. ख. ग. भैरव ।

भ्रूकुटिपराजितमदनशरासम् ।
तदिषु[1]वृथाकरनयनविलासम् ॥४॥
प्रतिबिम्बितमणिकुण्डलगण्डम् ।
करिकरफणिवरशुभभुजदण्डम् ॥५॥
चूडाशिखरगचपलकलापम् ।
हसितघनाङ्कुरगतहरिचापम् ॥६॥

केनापि हेतुना गच्छति विजयते तथा कदम्बमूलसंचारी कृष्णोऽपि नीरवः इत्यय-मद्भुतोपमा ॥ ३ ॥

भ्रूकुटीति । भ्रूकुट्या पराजितः मदनस्य शरासो धनुर्येन स तथा तम् । तस्य मदनस्य इषून् शरान् वृथा निष्फलं कुर्वन्तीति तदिषुवृथाकराः तथा नयनविलासा लोचने दृष्टो यथा स्यात्तथा तम् ॥ ४ ॥

प्रतीति । प्रतिबिम्बिते प्रतिफलिते मणियुक्तकुण्डले गण्डयोर्यस्य स तथा तम् । करिकरो हस्तिशुण्ढः फणिवरः सर्पश्रेष्ठः ताविव शुभौ शुभगौ भुजदण्डौ यस्य स तथा तम् । कोमलत्वसुवलितेत्योपपत्त्यर्थम् उपमाद्वयमुपात्तम् । दण्डपदं तु तत् स्वरूपार्थकम् । ५ ॥

चूडेति । चूडाशिखरगश्चपलश्चञ्चलः कलापो मयूरपुच्छं यस्य अत्रोप-मामाह । हसितः सदृशीकृतः घनाङ्कुरस्ते अङ्कुराकारमेघखण्डमिलितो हरिचाप इन्द्रधनु-र्येन स तथा तम् ॥ ६ ॥

---

1. ख. ग. तजिषु ।

द्रवितजड़ाजड़मुरलीगानम् ।
खण्डितकुलयुवतीकुलमानम् ॥७॥
इति हरिदयितावचनसुधौघम् ।[1]
शृणुत रघूत्तमभणितममोघम् ॥८॥

सुरवरं जितशम्बरजित्वरं सितरुचिं[2] नवचन्द्रकशेखरम् ।
भुजगवेष्टितचारुकलेवरं भजसि नो किमुमाधवमीश्वरम् ॥८॥

द्रवितेति । द्रविता द्रवीकृता जडाजडाः स्थावरजङ्गमा अविज्ञा वा येन तत् तथाभूतं मुरलीगानं यस्य खण्डितः नाशितः कुलयुवतीनां सत् कुलभूरङ्गनानां कुलस्य समूहस्य मनोऽभिमानो येन स तथा तम् ॥ ७ ॥

इतीति । वचनसुधौघं वाक्यसुधासमूहं शृणुत तद् भक्ता इति शेषः । अमोघमव्यर्थं सफलमित्यर्थः ॥ ८ ॥

सुरवरमिति । अथ पूर्वरागं वर्णयित्वा अष्टाभिः श्लोकैः कासांचित् श्लेषप्रियैः वाग्विलासैः सर्वं समापयति । काचित् कांचित् प्रति श्लेषेण वदति । हे सखि ! अध्याहार्य्यं किमुमाधवं श्रीरुद्रं नो भजसि इत्यन्वयः । उमाधवं कीदृशं सुरवरं सुरश्रेष्ठं पुनः कीदृशं जितः पराभूतः शम्बरजित्वरः प्रद्युम्नो मदन येन स तथा तम् । पुनः कीदृशं सितरुचिं शुक्लकान्तिम् । पुनः कीदृशं नवचन्द्रकशेखरं नवश्चन्द्रकः चन्द्रकला शेखरः शिखरभूषणं यस्य स तथा तम् । भुजगैः सर्पैः वेष्टितं चारु सुन्दरं कलेवरं शरीरं यस्य स तथा तम् । श्रीकृष्णपक्षे माधवं किमु न भजसीति

1. ख. घ. सुखौघं :
2. क. सितरुचिं ।

गरलतारितसर्वशरण्यकं
फणिकभूषणपादसरोरुहम् ।
विलसदभ्रतनुद्युतिमीश्वरं
सखि सदैव भजाम्यघनाशनम् ॥६॥

गां रक्षयन्तं वृषभं क्षयन्तं
वने चरन्तं स्ववने चरन्तम् ।

परिहासाक्षेपः । किंभूतं सुरवरमिति तुल्यार्थं जितशम्बरजित्वरमिति सौन्दर्येणेति शेषः । सितरुचिं नीलकान्ति नवचन्द्रकं नूतनमयूरपिच्छं, भुजगेति भुजगेन कालियेन वेष्टितं कलेवरं यस्य स तथा तम् ईश्वरमित्युभयत्र तुल्यम् ॥ ८ ॥

गरलेति । सखी चोत्तरमाह श्लेषेणैव । गरलेति गरलात् समुद्रोत्थित-विषात् तारिता तद्विषं पीत्वा निस्तारिता सर्वे शरण्याः रक्षणार्हाः येन स तथा तं समासान्तोऽयं ककारः । फणिकौ विचित्रफणिनौ भूषणे नूपुरे इव पादसरोरुहयोर्यस्य तम् । विलसन्ती अभ्रस्यामलस्येव तनुद्युतिर्यस्य तम् ईशमीश्वरं रुद्रं हे सखि सदैव निरन्तरमेव प्रत्यहमेव वा भजामि आराधयामि । अघनाशनं भक्तानां पापनाशनम् । श्रीकृष्णपक्षे अघनाशनमिति विशेष्यम् । गरलात् विषमययमुनाजलात् तारिता उद्जीविता सर्वे शरण्याः रक्षणीयाः गोपालवत्सबालकाः येन तं ककारः पूर्ववत् । श्रीभागवतादौ प्रसिद्धमेव गोपबालकवत्सानां पीतविषमययमुनाजलानां मृतानाम् उज्जीवनम् । फणी कालियस्तस्य कः शिरः तस्य भूषणे पादसरोरुहे यस्य तम् । अभ्रं मेघः शेषं स्फुटम् । ईश्वरम् परमेश्वरं सदैव भजामि कथंभूतं प्राप्नुयामिति भावः ॥ ६ ॥

गामिति । अन्या तु भजनायोग्यं दर्शयन्ती विरोधाभासालङ्कारेण

कामप्रदं कामदहं महेशं
कथं सदानन्दसुतं[1] भजेऽहम् ॥१०॥
वृषेन्द्रयानं विषवाहिपानं विभूतिदेहं वनशैलगेहम् ।
कन्दर्पदर्पाहत[2]लोचनेऽहं वृषाकपिं हन्त कथं भजेहऽम् ॥११॥

श्लेषालंकारेण च प्रतिवचनमाह । महेशं शिवं कथं भजे इत्यन्वयः । गां पृथिवीं स्वर्गं च रक्षयन्तं पालयन्तं वृषभं वाहनरूपं वृषं क्षयन्तं गच्छन्तमारोहयन्तमित्यर्थः । वने मन्दरहिमालयादिविपिने चरन्तं विहरन्तं प्रसिद्धं तु पुनः अवने भवानां प्रीणने चरन्तं वर्त्तमानम् । कामप्रदं भक्तानामभीष्टदातारम् । कामदहं मदनं विदग्धवन्तं सतां च्चानन्दं सौति जनयति । सर्वदा नन्दसुतं तम् । अत्र त्थं विरोध आभासते । यो गोरक्षक स वृषनाशकः यो वनेचरः सोऽवनेचरः यः कामप्रद सः कामदह इत्थमनविम्बितं कोऽपि कं सेवते अहं कथं तं भजे न भजे वा इत्यर्थः । अथच महेशं परमेश्वरं सतां साधुनामेव भक्त्या आनन्ददायकं न तावकम् । शिष्टानां अहं तु गोपालकन्या विशेषानभिज्ञा केन प्रकारेण तं भजे इति दैन्याक्षेपः । विरोधस्तु पूर्वोक्त व्याख्यानेन उक्त एव । श्रीकृष्णपक्षे नन्दसुतं केन प्रकारेण केनोपायेन भजे उपभुंजे इत्यर्थः । तस्य प्राप्त्याभावात् । नन्दसुतं कीदृशं गां धेनुं रक्षयन्तं वृषभं वृषासुरं क्षयन्तं नाशयन्तं नाशकर्त्तारमित्यर्थः । क्षयन्तमित्यत्र शत्रुवर्त्तमानत्वं विवक्षितं कर्त्तृमात्रं विवक्षितां वने श्रीवृन्दावने तन्नामके वने सत्रं पालने कामप्रदमभीष्टदं मुमुक्षूणां तु कामदहं विषयवासनानाशकं महेशं महान्तम् ईश्वरं विरोधाभासस्तु पूर्ववत् ॥ १० ॥

वृषेत्यादि । अन्यातु तथैवोत्तरमाह । वृषेन्द्रेण यानं गमनं यस्य अथवा

---

1. ख हृदाननूसूनं ।
2. ख, ग, घ. कन्दर्पदर्पापह ।

क नु सखि चलितासि कस्य हेतोः
घनरसवासनयाधिकृष्णमेमि ।
अतिरतिसरसा किमेषि कृष्णं
नहि नहि यामि जलाय भानुकन्याम् ॥ १२ ॥

वृषेन्द्रवाहनं यस्य तम् । विषमिदं वह्निरिव स्पर्शमात्रेण दाहकत्वात् । विषवह्निस्तस्य पानं यस्य येन वा विभूतिः भस्मं देहे यस्य तं वनं वा शैलो वा गेहं गृहमिव यस्य तं कन्दर्पदर्पापहा कामहा कामनाशिका लोचनचेष्टामात्रोत्पादितस्य वह्निगतस्य दाहकत्वात् वृषाकपिं श्रीरुद्रं त्वन्तेति सम्बोधने खेदे वा । कथं केनोपायेनाहं गोपकन्या भजे आराधयामि येनाराधनेन प्रीतः स मम मनोऽभीष्टं दद्यादिति भावः। श्रीकृष्णपक्षे तु वृषेन्द्रस्येव यानं गमनं यस्य स तथा तम् । विषमिव वह्निर्दावानलः तस्य पानं येन यस्य वा स तथा तम् । विशिष्टा भूतिः लक्ष्मी देहे यस्य स तथा तम् । वनं श्रीवृन्दावनं शैलो गोवर्द्धनश्च गृहमिव विलासस्थानत्वात् यस्य स तथा तम् । घनशैलगा ईहा लीला यस्य स तथा तम् । कन्दर्पस्य दर्पं सुन्दरत्वमहङ्कारमपहन्ति कन्दर्पदर्पापहा इति लोचनस्यापि इहाङ्कितचेष्टा यस्य स तथा तम् । वृषाकपिं श्रीकृष्णरूपं विष्णुं कथंचन केनोपायेनाहं गोपकन्या भजे पतिवदाराधयामि तत्प्राप्त्यसम्भवान्न सम्भव भवतीति भावः ॥ ११ ॥

क नु सखीत्यादि गोप्यन्तरगोवर्धनविलासमाह। चरणचतुष्टये यथाक्रमं प्रश्नोत्तरे द्रष्टव्ये। घनरसवासनया इति जलाहरणेच्छयेत्यर्थः। अधिकृष्णं कृष्णमधिकृत्य यमुनाया इत्यर्थः । पक्षे घनरसोऽतिशृङ्गारः तद्वासनया तदिच्छया अधिकृष्णं कृष्णमधिकृत्य नान्यत्रेत्यर्थः। तमेवाह। अतीति हसन्ति प्रत्यन्तरमाह । नहि नहीति । कदाचिदपि नेत्यर्थः। अथच नहि नहीति निषेधस्य निषेधः । हे सखि त्वया यदुक्तं

प्रफुल्लनवपद्मिनीविसरगन्धसन्धानकृद्
भ्रमन् स मधुसूदनो[1] मम तु दृष्टिमभ्यागतः ।
विमुद्रितदृगप्यहं तरलहृद्गतास्म्यन्यतो
हरेर्मिलनतोऽविभेः किमु न भृङ्गभीतास्म्यहम् ॥ १३ ॥

तदेवेत्यर्थः । जलाय भानुकन्यां नहि नहीत्यस्यानुषङ्गेनान्वयः यद्वा किमेषि कृष्णमिति पृष्टं स्वयमङ्गीकृतं प्रकाशयन्तीत्याह । नहि नहीति । हे सखि कृष्णमेव गच्छामि । जलाय भानुकन्यां नहि नदिं कदाचिदपि न गच्छामीत्यर्थः ॥ १२ ॥

प्रफुल्लेति । गोप्यन्तरयोर्वचनविलासमाह । पद्मिनीनां स्त्रीविशेषाणां विसरस्य समूहस्य गन्धः सम्बन्धो वा तस्य वा सन्धानं अनुसन्धानं सा कुत्र तिष्ठति इति अन्वेषणकृत् तत् कर्त्ता भ्रमन् सन् स प्रसिद्धः मधुसूदनो भ्रमरः श्रीकृष्णो वा श्रीवृन्दावने इति शेषः । मम तु ममैव दृष्टिं विलोचनं अभ्यागतः साम्मुख्येन न जगाम । विमुद्रितदृक् पद्मभ्रमकृतदृष्टिपतनभयात् लज्जया वा विशेषेण मुद्रिते मुकुलीकृते दृशौ दृष्टा चक्षुषा मया तथा भूताऽहं अन्यतो गतास्मि भ्रमरस्थानात् कृष्णस्थानात् वा भिन्नस्थानं गतास्मीत्यर्थः । पुनः किंभूताहं । तरलहृदा भयान्तर्गलच्चित्ता लज्जया वा इत्युक्तवतीं सखीं सखी हरितात्पर्ये सन्दिहाना कुतुकानीच्छति । हरेः कृष्णस्य मिलनतो नवसङ्गमात् भो सम्बोधने किं प्रश्ने अविभेः भयं प्राप्तासि इति पृष्टा सा पुनराह । नेति त्वया उक्तं नेत्यर्थः । किन्तु भृङ्गात् भ्रमरात् अहं गोपबाला भीतास्मि त्रस्तास्मीत्यर्थः । चक्षु अपि पद्मभ्रमात् भ्रमरः पतिस्यतीतिचिन्तया त्रस्तास्मीति भावः । तथा च भृङ्गात् श्रीकृष्णाख्यात् सङ्गात् न भीतास्मि किन्तु लज्जितास्मीत्यर्थः ॥ १३ ॥

[1]. क. भ्रमन्ति मधुसूदनो ।

यतो नवघनेक्षणान्नयनपद्मसंमुद्रणा-
त्स्फुरत्पुलकमण्डली[1] परिततैव गण्डस्थली[2] ।
उरःस्थलपरिस्खलद्वसनविस्मृतिविस्मृता[3]
ततः परिचितः स्फुटं स्फुरति[4] कृष्णभावस्ततः ॥१४॥

इतोऽत्थमिति चातुरीरचितवाग्विनोदैर्मुदा
हरिं परमसुन्दरं मुहुरुदीक्ष्य साक्षादपि ।

यतो नवघनेत्यादि । सख्यन्तरमाह । ततो यस्मात् नवघनेक्षणात् नवजलदर्शनात् नयनपद्मयोः सम्यक् मुद्रणात् मुद्रीकरणात् स्फुरन्त्यः शोभमाना कम्पमाना वा पुलकमण्डली हृष्टरोमश्रेणी तया परिततेषु व्याप्तेषु गण्डस्थली कपोलस्थानम् । उरःस्थलात् वक्षोदेशात् परिस्खलनात् विगलत् वसनं वस्त्रं तस्मिन् विस्मृतिः अनवधानं विस्मृता बहुकालव्यापितो एवमेव विकारो घनदर्शनजन्यात् श्रीकृष्णस्मरणधिया विना किं भवति नैवेति भावः । परिचितः सुज्ञातः । अत्र श्लोके काचित् मेघदर्शनजनितेदृशविकारं सखीं प्रति अन्यथाजातं कृत्वा प्रकाशयन्ती तत् सख्याः कृष्णविषयरागवशाज्जातस्तादृशविकार इति परिहसन्त्येव यथार्थं कथिता ॥ १४ ॥

इतोत्यादि । इत्यनेन प्रकारेण इत्थमीदृशप्रकारातिचातुरीव विविध

---

1. क. पुलक कुण्डली ।
2. क. रासस्थली ।
3. क. विस्मृत विसृति ।
4. ख. ग. घ. स्फुटं सुमुखी ।

दिनैः कतिपयैरपि स्फुटतरानुरागश्रियं
दधुर्व्रजवधूजना मदनवेदनावर्द्धिनीम् ॥ १५ ॥

इति श्रीमुकुन्दविलासे महाकाव्ये रघूत्तमयतीन्द्रतीर्थपादकृतौ गोपीवाग्विलासप्रकाशो नाम द्वितीयः सर्गः ।

चातुरी तया रचिता कृता ये वाग्विनोदा वचनविलासास्तैः श्रियं सन्तीति शेषं सुगमम् ॥ १५ ॥

इति श्रीमुकुन्दविलासप्रकाशिकायां द्वितीयः सर्गः ।

तृतीयः सर्गः

व्यक्तेऽनुरागे तु परस्परेण
व्यूहं विधायैकधियः स्त्रियस्ताः ।
मुहुर्मुहुः कृष्णकथासुधाब्धौ
सस्नुर्विहन्तुं विरहाग्निदाहम् ॥ १ ॥

कथं पतिर्नो भविता स कृष्णः
सर्वासु चास्मासु सदा सतृष्णः ।
इत्थं स्वचित्तेषु मनःसु तासां
देवर्षिरायात्स निधिः शुभासाम् ॥ २ ॥

द्वितीयसर्गे श्रीकृष्णविषयानुरागः सर्वासां परस्परज्ञानक्रमेण ज्ञात इति वर्ण्यते । इदानीं श्रीकृष्णाभिप्रायचिकीर्षूणां विरहतप्तानां गोपीनां तदुपायप्राप्तिं तृतीयसर्गे वर्णयितुं व्यक्तेऽनुरागेत्यादिना एकेन पद्येन विरहातिशयवैकल्यं तासां वर्णयति । व्यूहं सभारूपसमूहं एकधियः एवंप्रकारे कृष्णप्राप्त्युपाये धीः बुद्धिर्यासां ता एकधियः कृष्णस्य कथागुणकर्मादिकीर्त्तनं सैव सुधाब्धिरमृतसमुद्रः तस्मिन् विरहाग्निदाहं श्रीकृष्णविच्छेदरूपवह्निजन्यतापं केनापि विशेषेण हन्तुं निवारयितुं सस्नुरिव जगाहिरे ॥ १ ॥

कथमित्यादि । स कृष्णः कथं नोऽस्माकं पतिर्भविता । किन्तु सर्वास्वस्मासु सदा सतृष्णः प्रेमातिशयवान् इत्यर्थः । इत्थं चिन्तितेषु चिन्तासहितेषु देवर्षिः नारदः शुभासां दीप्तानां तासां निधिरेकाधिकरणं स आयात् । २ ॥

विष्णोर्गुणं[1] सुस्वरमुद्गिरन्तं
सुधारसासारमिवोत्किरन्तम् ।
वीणां प्रवीणां मृदुवादयन्तं
दूरेऽघपूरानपसादयन्तम् ॥ ३ ॥

तं हाटकस्वच्छजटानिकायं[2]
राकेशपुञ्ज[3]प्रतिकाशकायम् ।
मन्दं हसन्तं पुलकीभवन्तम्
लुलोकिरे ता हरिगानवन्तम् ॥ ४ ॥

विष्णोर्गुणमित्यादि । विष्णोर्गुणं सुस्वरमुद्गिरन्तं गायन्तं वीणां वादयन्तं अघपूरान् पापसमूहान् अपसादयन्तमपगमयन्तं तं नारदं ताः गोप्यः लुलोकिरे ददृशुः ॥ ३ ॥

तं हाटकेति । हाटकं सुवर्णमिव स्वच्छो निर्मलो जटानिकायो जटासमूहो यस्य राकेशः पूर्णचन्द्रः तेषां पुञ्जः समूह इव कायः यस्य पुलकीभवन्तं लोमहर्षवान् भवन्तं हरिनामगानवन्तं तं नारदं लुलोकिरे ददृशुः । युग्मकम् ॥ ४ ॥

---

1. घ. कृष्णोर्गुणं
2. ख. जटाकलापं
3. घ. राकेशचन्द्र

विज्ञाय विज्ञाः[1] श्रुतलक्षणैस्तं
तैस्तैर्गुणैस्ता जगति प्रशस्तम् ।
सद्यः समुत्थाय नताः शिरोभि-
र्विलोलहारोल्लसितैरुरोभिः ॥ ५ ॥

दत्तासनं ताभिरमन्दयत्नं[2]
पाद्यादिभिः[3] स्वच्र्य सुरर्षिरत्नम् ।
तत्पादपद्माम्बु दधे शिरोभिः
विष्णोरिवाङ्घ्रेर्जलमप्सरोभिः ॥ ६ ॥

विज्ञायेत्यादि । श्रुतलक्षणैरिति श्रुतानि च तानि लक्षणानि तैः लोकप्रसिद्धैरित्यर्थः । तैस्तैर्गुणैः नताः प्रणताः प्रणामं कृतवत्यः तैः शिरोभिः भूलग्नशिरोभिरित्यर्थः । तत् कथंभूताः उरोभिरुपलक्षिताः । उरोभिः कथंभूतैः विलोलैश्चञ्चलैः प्रणामक्रियया चञ्चलीकृतैर्हारैर्मुक्तामालाभिः हेतुभिः उल्लसितैः शोभितैः ॥ ५ ॥

दत्तासनमित्यादिः । दत्तासनं आसनस्थितं दत्तम् आसनं यस्मै तद्दत्तासनम् । सुरर्षिरत्नं स्वच्र्य सुष्ठु पूजयित्वा अमन्दयत्नं यथा स्यात्तथा । विष्णोरंघ्रेर्जलं वामनरूपस्य विष्णोः ब्रह्मलोकगतात् अंघ्रेश्चरणात् स्वर्गे यत् जलं अप्सरोभिः यथा परमभक्त्या शिरोभिर्धृतं तथेत्यर्थः ॥ ६ ॥

---

1. ख. ग. विज्ञाः स विज्ञः ।
2. क. ताभिरनन्ययत्नं ।
3. ख. ग पद्यादिभि ।

स कोरकीभावितपाणिपद्मा[1]-
स्ता वीक्ष्य साक्षाद्बहुधेव पद्माः ।
प्राह प्रसन्नो विनयेन नम्राः
संजातरोमाञ्चनिकामकम्राः ॥ ७ ॥

विशन्तु सत्यः सुखमासनस्था
धिनोति मां वो विनयव्यवस्था ।
सुशीलता कं वशयेन्न धीरं
व्यक्तिं तृषार्त्तामिव शीतनीरम् ॥ ८ ॥

गोप्यस्तदाज्ञां शिरसादधाना-
श्चाम्पेयमालामिव मोदमानाः ।

स कोरकीत्यादि । स नारदः ताः कोरकीभावितानि मुकुलमिव सम्भावितानि पाणिपद्मानि करकमलयुगानि याभिः बहुधा पद्मा इव बह्वो लक्ष्मी इव संजातरोमाञ्चेन निकामं सत्यं यथा स्यात्तथा कम्राः कमनीयाः सुन्दर्य्यंतिशयो व्यञ्जितः ॥ ७ ॥

विशन्त्वित्यादि । हे सत्यः साध्व्यः प्रशस्ता अभ्यर्हिता वा सुगममिति क्रियाविशेषणम् । धिनोति प्रीणयति सुशीलता सुन्दरशीलकत्वं वशयेत् वशीकुर्यात् व्यक्तिं जनं शेषं सुगमम् ॥ ८ ॥

गोप्य इत्यादि । तदाज्ञां नारदाज्ञां चाम्पेयमालामिव पुष्पमालामिव

1. ख, ग, पादपद्मा ।

सुचेलसंगोपितगात्रदेशाः
समाविशन् साधु विनीतवेशाः ॥ ६ ॥
अङ्के स बिभ्रन्महतीं महात्मा
स्मिताननो निश्चिततत्त्ववर्त्मा ।
राधां स्वपादप्रहितार्द्रदृष्टिं
कुर्वन्निव प्राह सुधासुवृष्टिम् ॥ १० ॥
पृच्छामि किं वो वृषभानुकन्ये
क्षेमं सदास्तीत्यहमम्ब मन्ये ।
जनेषु यूयं बहुपुण्यशीला
सदैव यत्पश्यथ कृष्णलीलाः[1] ॥ ११ ॥

दधाना मोदमानाः हृष्टाः साधु सुन्दरं यथा स्यात्तथा समाविशन् समुपवेशनं कृतवत्यः ॥ ६ ॥

अङ्के इत्यादि । अङ्के क्रोड़े महतीं वीणां महानात्मा मनो यस्य स महात्मा निश्चितं तत्त्वं ब्रह्मपथो येन स तथा । स्वपादे स्वस्य नारदस्य पादे प्रहिता प्रेरिता आर्द्रा स्निग्धा दृष्टिश्चक्षुर्यथा स्यात्तथा तां राधां सुधावृष्टिं कुर्वन्निव प्राह इत्युत्प्रेक्षालङ्कारः ॥ १० ॥

पृच्छामीति । हे वृषभानुकन्ये राधे वो युष्माकं किं पृच्छामि । यतः क्षेमं कल्याणं निरन्तरमेवास्ति युष्माकमिति शेषः । इति मन्ये जानामि । शेषं सुगमम् ॥ ११ ॥

---

1. ख. ग. कृष्णशीलाः ।

यन्नेति नेति श्रुतिभिः प्रणीतं
परात्परं ब्रह्मवचोऽप्यतीतम् ।
तदेव कृष्णाख्यतनूमुपेतं
विराजते नन्दनिकेतकेतम् ॥ १२ ॥

अशेषसौन्दर्यसुधैकसिन्धौ
कृष्णे परंब्रह्मणि दीनबन्धौ ।
सदा निलीनं हृदयं यदीयं
किं नाम नानन्दमयं तदीयम् ॥ १३ ॥

देवर्षिणेत्थं कथिते हि[1] विष्णौ
गोप्योऽनुरागे पृथुलीभविष्णौ ।

यन्नेतीति । कृष्णलीलादर्शनस्य परममङ्गलतत्त्वहेतुं दर्शयति । यद्ब्रह्म नेति नेति निषेधमुख्येन श्रुतिभिः वेदान्तैः प्रकर्षेण जगदुत्कृष्टत्वेन गीतं प्रतिपादितं न तु साक्षादिदमित्थमिति तदेव ब्रह्म यत्र कृष्णतनुं श्यामसुन्दरशरीरमुपेतं प्राप्तं नट इव वेशं नन्दनिकेतानन्दगृहं तस्मिन् केतो यस्य तत् विराजते, विशेषेण शोभते । अतो युष्माकं परमब्रह्मलीलादर्शनेन निरूपमं भाग्यमितिभावः ॥ १२ ॥

अशेषेति । कृष्णे मनः सम्बन्धे न केवलं भाग्यं किन्तु परमानन्दलाभोऽपि भवति इत्याह । यदीयं तत्सम्बन्धिवस्तु यत् किंचिदपि तत्र नन्दमयमेव न कदाचिद्दुःखहेतुरित्यर्थः अयं भावः । कृष्णे मग्नहृदयस्य पुरुषस्य कृष्णमयमेव जगत् भवति । कृष्णस्यानन्दमयत्वमेवमिति ॥ १३ ॥

---

1. ख. ग. घ. कथिते तु ।

पटेन संगोप्य तु रोमहर्षं
धर्तुं न शेकुर्नयनाम्बुवर्षम् ॥ १४ ॥
विलोक्य ताः कृष्णरसानुरक्ता
महामुनिर्युक्ततमं[1] प्रवक्ता ।
प्रमोदय-मञ्जुगुणैर्महत्या
जगौ जगत्प्रीतिकरं महत्या ॥ १५ ॥

नवमः प्रबन्धः

॥ सिन्धुड़ारागेण गीयते ॥

नन्दसुतं भज भवभयहरणम् ।
करुणामयमर्ति[2]दुर्गतशरणम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

देवर्षिणेत्थमिति । कथिते स्तुते शेषं सुगमम् ॥ १४ ॥

विलोक्येति । युक्ततमं न्यायतमं यथा स्यात्तथा प्रवक्ता प्रकृष्टवक्ता जगत्प्रीतिकरं यथा स्यात्तथा महत्या महत्या वीणया जगौ गानं चकार ॥ १५ ॥

नन्दसुतमित्यादि । नन्दसुतं श्रीकृष्णं तं भज इति शेषः ॥ १ ॥

---

1. क. महामुनिर्व्यक्तितमं ।
2. क. करुणामयमत

कमलाकरकमलाञ्चितचरणम्

वनभुवि गोधनचारणकरणम् ॥ २ ॥

निरुपमरूपविजितशतमदनम् ।

शारदविधुवरसुन्दरवदनम् ॥ ३ ॥

असमसुधारससुमधुरहसनम् ।

घनतुलतनुचपलोपमवसनम् ॥ ४ ॥

गण्डरुचिरमणिकुण्डलचलनम् ।

भ्रूगतिमदनधनुर्मददलनम् ॥ ५ ॥

युवतिमनोरमचलतमनयनम् ।

गजगम[1]चतुरिमशमजयदयनम् ॥ ६ ॥

कमलेत्यादि । खण्डद्वयं सुगमम् ॥ २, ३ ॥

असमेति । न समः न तुल्यः सुधारसो यस्य तत् असमसुधारसं सुमधुरं अनुपममाधुर्यकं हसनं हास्यो यस्य स तथा तं घनतुला मेघोपमा तनुयस्य चपलोपमं विद्युत्सदृशं वसनं यस्य स चासौ सच्चेति स तथा तं यद्वा घनतुलतनौ चपलोपमं वसनं यस्य ॥ ४ ॥

गण्डेति । भ्रूगत्या भ्रूभङ्ग्या मदनस्य धनुर्मददलनं चापकृतगर्वनाशनं येन यस्येति वा ॥ ५ ॥

युवतीति । गजस्य गमश्चतुरिमा गमनचातुरी तस्य शमो शमनं निवारणं

---

1. ख. ग. जगजम

वंशीरवण[1] वशीकृतभुवनम् ।
शिवविधिसंसदि सन्ततनुमनम्[2] ॥ ७ ॥
चरणकमलकृतकालियदमनम् ।
सतत[3] रघूत्तमविरचितनमनम् ॥ ८ ॥
स्वरैः स्फुरद्भिर्विविधैः सनाथया
समूर्च्छनग्रामजुषेण गाथया ।
सुवाद्यवीणोत्थितया हरिप्रियाः
प्रमोदमग्ना जहुरिन्द्रियक्रियाः ॥ १६ ॥

तेन हेतुना जयत उत्कृष्टा भवत् अयनं गमनं यस्य यद्वा गजगमनचतुरिमानं शमयतीति गजगमनचतुरिमशमनं अतएव जयत् परमोत्कृष्टं अयनं यस्य स तथा तम् ॥ ६ ॥

वंशीति । वंशीरवणरवः शिवविध्योः शङ्करब्रह्मणोः संसदि सभायां सततं अविरतं नुमनं स्तुवनं गुणकीर्त्तनं यस्य स तथा तं संततनुमनमित्यनेन शिवविधिसंसदि इत्यर्थः । एकदेशी द्वितीयव्युत्पत्तिवैचित्र्यादभवतीत्यनेनापि एकं द्रष्टव्यम् ॥ ७ ॥

चरणेत्यादि सुगमार्थम् ॥ ८ ॥

स्वरैरिति । सप्तस्वरास्त्रयोग्रामामूर्च्छनास्त्वेकविंशतिः । रागास्त्वेको-

---

1 ख. ग. वंशीस्वरवण ।

2. क. सन्ततनवनं ।

3 ख. ग. सन्तत ।

क्रमेण तस्मिन्महति स्वनान्विते
गोविन्दगीते मुनिना निवर्त्तिते ।
निवृत्तपूर्वेन्द्रियवृन्दचेष्टितं
प्रपेदिरे तास्त्रपयेव वेष्टितम्[1] ॥ १७ ॥

ततो मुनीन्द्रो महतां गुरुः परं
प्राह प्रसन्नः सुमुखाः सुखाकरम्[1] ।
जनार्दनासक्तमना जगत्प्रियः
पितेव पुत्री विनयागतश्रियः ॥ १८ ॥

नपञ्चाशदुद्वाविंशश्रुतिमण्डलम् ॥ इति सङ्गीतशास्त्रप्रतिपाद्यैः स्वरादिभिः सम्बन्धोऽत्र द्रष्टव्यः । ईशगाथया श्रीकृष्णगीतेन सुन्दरं वाद्यं वादनं यस्याः सा सुवाद्या सा चासौ वीणा चेति सुवाद्यवीणा तदुत्थितया तदभिव्यञ्जितया हरिप्रियाः गोप्यः इन्द्रियक्रियाः कर्मेन्द्रियज्ञानेन्द्रियक्रियाः जहुस्तत्यजुः केवलं परमानन्दस्वरूपश्रीकृष्णाकाराकारितमानसाः बभूवुः इति भावः ॥ १६ ॥

क्रमेणेत्यादि । क्रमेण पर्यायेण निवर्त्तिते इत्यन्वयः गोप्यः निवृत्तपूर्वं च तत् इन्द्रियचेष्टितं त्रपया वेष्टितं आवृत्तमिवेत्यर्थः । अहोऽस्माकं बहिरिन्द्रियस्फूर्त्तिः एतावन्तं कालं कापि नासीदिति । मुनिना तु तत् सर्वमुपलब्धं ज्ञातं सर्वा लज्जिता इति भावः ॥ १७ ॥

तत इत्यादि । ततस्तासां बहिरिन्द्रियोपलब्ध्यानन्तरं सुखाकरमिति सुखाकरं चित्तानुकूलमित्यर्थं परमपि प्राहेत्यस्य विशेषणम् । विनयेनागता प्राप्ता श्रीः सम्पत्तिः श्रीकृष्णप्राप्तिलक्षिता याभिस्तास्तथा भाविनिभृतबहूपचारोऽत्र द्रष्टव्यः यद्वा विनयेनागतायाता श्रीः शोभा यासां ता इत्यर्थः ॥ १८ ॥

---

1. क. सुधाकरं ।

अहो मदीयं बत वोऽस्ति[1] दिष्टं
यद्ब्रह्म साक्षादभवतोभिरिष्टम् ।
गोप्यस्तदाप्यं नवोनाभ्युपायं[2]
तदाप्तये यत्नमुशन्त्यमायम् ॥ १६ ॥

अभीष्टदौ तौ जगतामधीशौ
देवैश्च सेव्यौ गिरिजागिरीशौ ।
नरैरनाराध्य न साध्यमास्ते
फलेषु किञ्चिद्भुवने समस्ते ॥ २० ॥

अहो इत्यादि । अहो विस्मये बतेत्यामन्त्रणे मदीयं महत्तरं दिष्टं भाग्यं भाग्यहेतुमाह । यद्ब्रह्मेति ईष्टमिप्सितं हे गोप्यः तत् श्रीकृष्णं परंब्रह्म आप्यंमाप्तुमित्यर्थः । अभ्युपायं प्राप्तसाधनं तद्दाप्तये अमायं निष्कपटं यत्नं साधनविशेषं उशन्ति इच्छन्ति पण्डिता इत्यर्थः ॥ १६ ॥

अभीष्टेति । श्रीकृष्णप्राप्त्युपायमाह । जगतां सर्वजीवानामधीशौ परमेश्वरौ परमेशत्वमेवाह । देवैश्च सेव्याविति देवै ब्रह्मादिभिश्चाकारात् सुतरामन्यैरपि एवंभूतदुर्गाशङ्करौ अनाराध्य असेवितफलेषु सान्निध्यं किञ्चिदपि फलप्राप्तिं नास्तीत्यर्थः ॥ २० ॥

---

1. ख. ग. वत दोऽस्ति ।
घ. व्रतमेऽस्ति ।

2. ख. ग. नवीनाप्युपायं ।

हरेः पतित्वाय यदा प्रकामं[1]
मनो मृगाद्यो[2] यदि वः सकामम्[3] ।
तदा मदादेशमुपेत्य सत्यः
शिवौ समाराध्यत भक्तिमत्यः ॥ २१ ॥

यद्ब्रह्म सर्वेश्वरनामधेयं
गौरीहरिश्चेति तदेव मेयम् ।
भक्तानुरोधात्तदनेकरूपं
फलं प्रदद्याद् भजनानुरूपम् ॥ २२ ॥

हरेरिति । साधारण्येनोक्त्वा विशेषणं वक्ति । पतित्वाय पतिभावं साधयितुं कामं यथेष्टं अत्यन्तं सकाममित्यर्थः । मदादेशं मत्कृतमुपदेशं उपेत्य प्राप्य हे सत्यः हे साध्व्यः भक्तिमत्यः सत्यः शिवौ दुर्गाशङ्करौ समाराध्यत सम्यक् भजत ।

वासुदेवे हरौ ब्रह्म तारिणी प्रकृतिः परा ।
एकमूर्त्तिस्तत्वतोऽसौ पूजादिषु तथा स्मरेत् ॥
यथा कृष्णस्तथा दुर्गा यथा दुर्गा तथा हरिः ।
अभेदात्सर्वसिद्धिःस्याद् भेदान्नरकमाप्नुयात् ॥

इत्यादि शास्त्रसंमतामद्वैतभक्तिमुपदिशति ॥ २१ ॥

यद्ब्रह्मेति । सर्वेश्वर इति नामधेयं संज्ञा यस्य तत्तथा गौरीदुर्गाहरिविष्णुश्रीकृष्णश्चेति देवमिमं ज्ञेयमित्यर्थः । हरिगौर्यो न सर्वेश्वरत्वगतब्रह्मणः

---

1. ख. ग. सदा प्रकामं । घ. सदा सकामं ।
2. क. मृगाङ्को ।
3. ख ग. प्रकामं ।

परस्परं यूयमभेदबुद्ध्या[1]
हरिं हरं गायत चित्तशुद्ध्या ।
तेनैव को नन्दसुतोऽतिकान्तः
स्वयं भविष्यत्यचिरेण कान्तः ॥ २३ ॥

पृथगित्यर्थः । ननु यदीश्वर एक एव स्यात् कर्माभावाच्छरीररहितः एते तु सशरीराः अतः कर्मणश्चेति निर्णीता । तर्हि कथं परमेश्वराद्यभिन्न इति चेत् तत्राह भक्तानुरोधादिति । भक्तानां सेवकानां अनुरोधात् इच्छाविशेषात् तद्ब्रह्म अनेकरूप अनेकानि स्त्रीपुंसाकाराणि रूपाणि शरीराणि यस्य तदनेकरूपं अनेकरूपधरः तस्य प्रयोजनमाह फलप्रदादिति । भक्तानुरूपं यस्य जगत् जनं तथा यथा फलं प्रदद्यादित्यर्थः । अयं भावः शैवशाक्तवैष्णवगणेशगौरीहरिमार्गभेदैः यादृक् यादृक् भजनं यो यः कुरुते तस्मै तस्मै तेन तेन शिवदुर्गादिरूपेण तत् फलं दातुं तादृशं शरीरं भगवता धृतं न तु स्वकर्मभोगार्थं स्वकर्माभावादिति ॥ २२ ॥

परस्परमिति । श्रीकृष्णदुर्गयोरभेदभक्तिमुपदिश्य श्रीकृष्णरुद्रयोरभेदभक्तिमुपदिशति । परस्परमितीतरेतरं अभेदबुद्ध्या हरिशङ्करौ परस्पर अभिन्नौ इति बुद्ध्या गायत स्वरेण कीर्त्तयत चित्तशुद्ध्या मनःशुद्ध्या विशिष्टा सत्य इत्यर्थः । इत्थंभूतलक्षणे तृतीया । तेनैव तादृशगानेनैव नो युष्माकं नन्दसुतः कान्तः पतिर्भविता भविष्यति । कथंभूतः अतिकान्तः अतिसुन्दरः । २३ ॥

---

1. ख. ग. ये यमभेदबुद्ध्या ।

दशमः प्रबन्धः

॥ ललितरागेण गीयते ॥

जय जय हरिहर शङ्कर राम ।
जय गरुड़ध्वज जय वृषभध्वज केशिमथन हतकाम ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

अन्धकसूदन जय मधुसूदन मदनजनक मदनारे ।
मुरहर पुरहर गोवर्द्धनधर गङ्गाधर दनुजारे ॥ २ ॥

जयजयेति । वीणाया उपगायनगीतमुपदिशति आदरे वीप्सा । हरिश्चासौ हरश्चेति कर्मधारयः । यथा कटकी चासौ कुण्डली चेति कटककुण्डली राजा तथा परमेश्वरोऽपि चतुर्भुज-पञ्चानन-शरीरद्वयधारी हरिहरशब्दाभ्यां कटककुण्डलस्थानीयाभ्यां विशिष्यते । एवमन्यत्रापि बोद्धव्यम् । हे हरिहर चतुर्भुज-पञ्चानन-शरीरधारीन् इत्यर्थः । अथत्र भक्तानां दुःखहारकत्वेन हरिहराविति नाम निषेधव्ये नामकीर्त्तने समर्थानां प्रयोगेन पुनरुक्तदोषः । शङ्करेति शं भक्तानां कल्याणं करोतीति शङ्कर हे तथाभूत रामेति रमते योऽनन्ते स तथा न तद् चिदात्मनि इति रामपदेनासौ परंब्रह्माभिधीयत इति शास्त्रात् हे राम गरुड़ध्वजः वृषभो वाहनत्वेन ध्वजो यस्य हे तथाभूत मोहितोऽनभिज्ञानात् स एव गरुड़ध्वजः वृषभध्वज स एवेति त्रिपुरघ्नस्त्रिविक्रमः इति ब्रह्मपुराणवचनात् । केशीमथन केशीनाशन हतकाम कन्दर्पनाशक दुष्टानामभीष्टनाशकेत्यर्थः ॥ १ ॥

अन्धकेति । अन्धकोऽसुरविशेषः मधुश्च तथा तयोः नाशकेत्यर्थः । एकरूपपु एव यथा हस्ताभ्यां कर्मद्वयं करोति तथा त्वमपि शुक्लकृष्णशरीराभ्यां अन्धकं

अर्जुनदैवत जय निहतार्जुन अर्जुनसख गुहबन्धो ।
नृहर उमाधव माधव राघव जय निर्गुणगुणसिन्धो ॥३॥
भूतनाथ रघुनाथ यदूत्तम जय यदुनन्दन शम्भो ।
भेदमतं तु रघूत्तमहृदि गतमघहर न हरसि किं भो ॥४॥

मधुं नाशितवानसीति भावः । मुरहरेति मुरो असुरविशेषः पुरस्त्रिपुरासुरस्तयोः हरणशक्तेत्यर्थः । मदनः प्रद्युम्नः तस्य जनकरूपेण स्मारेस्तत्र शिवरूपेण गोवर्द्धनो यमुनातटप्रकटपर्वतः गङ्गाभागीरथी तयोर्द्धर धारकेत्यर्थः । पुरुषो यथा एकस्यैव पुत्रस्य लालनताडनाभ्यां कर्मभ्यां वा न भिद्यते तथात्वे एकस्य जननमरणाभ्यां वा शरीराभ्यां न भिद्यते इति भावः । एक एव पुरुषो यथा हस्तेन छत्रं शिरसा मालतीमालां धारयति तथा त्वमपि हस्तेन गोवर्द्धनं शिरसा गङ्गां धारितवानसीति भावः । पुरुषो यथा हस्तमस्तकाभ्यां भिन्नाभिन्नमपि भिन्नो न भवतीत्यर्थः ॥ २ ॥

अर्जुनेति । अर्जुनस्य पाण्डवस्य दैवत इष्टदेव निहतः अर्जुनः कार्त्तवीर्यो येन हे परशुराम इत्यर्थः अर्जुनस्य तस्यैव पाण्डवस्य सख मित्रं गुहस्त्वेता युगजातश्चण्डालविशेषः तस्य बन्धो प्रियः । श्रीराम सूर्यो यथा ज्वलनमध्ययोः करसम्बन्धेन नो कुष्यते तथा त्वमपि परमो कृष्णार्जुनपरमनिकृष्टगुहयोः सम्बन्धेन न तथा भवसीति भावः । नृहरे नरसिंह उमाधव गौरीकान्त माधव लक्ष्मीकान्त राघव रघुवंशप्रादुर्भूतः । निर्गुणः प्राकृतगुणरहितः गुणसिन्धो ऐश्वर्यादिगुणसमूहः ॥ ३ ॥

भूतनाथेत्यादि । भूतानां प्राणिनां गणविशेषाणां वा नाथः अधिपतिः । रघुनाथः रघुवंशानां नाथ ईश्वर । यदुभ्यः यदुवंशपुरुषेभ्य उत्तम उत्कृष्टः यदुवंशानन्दकः । शम्भो शङ्करस्य भेदमतं भेदज्ञानं तु वाक्यालङ्कारे रघूत्तमस्य कवेः हृदि मनसि गतं

जगज्जनहितैषिणौ पतितपावनोत्कीर्त्तनौ
परस्पर अतिप्रियौ विसदृशेष्ट[1]लीलामयौ ।
परस्परभिदेक्षणोज्झितजनैकसिद्धिप्रदौ
परस्परसमुद्भवौ भजत माधवोमाधवौ ॥२४॥

स्थितम् । अघहरः भक्तानां व्यसननाशकः अघनाशकः अघनामासुरनाशक इति वा न हरसि न नाशयसि कथं भो भगवन् ॥ २ ॥

जगज्जनेति । गीतवाद्यैस्तद्भक्तिमुपदिश्य पुनरपि श्लोकेन तामुपदिशति पतितानां पावनानि पापनाशकानि उत्कीर्त्तनानि शिवरामकृष्णेत्यादिरूपाणि ययोः तौ परस्परमन्योऽन्यं नतिः भक्तिः प्रिययोस्तौ शिवो विष्णुभक्तः विष्णुश्च शिवभक्त इति पुराणादौ प्रसिद्धम् । विसदृशे परस्परातुल्ये ईषोष्टकतानां प्रियेथास्याले (?) तत् कर्मानुकरणे तन्मयौ तद्बहुलौ विसदृशत्वं च इत्थंभूतगणः नारदादिमुनिगण सर्वे परमं पवित्रं सुगन्धं गन्धं तद्विपरीतं चिताभस्मलेपनौ बहुमूल्यरत्नमाल्यादितुच्छास्थि मालाधरौ पीताम्बरदिगम्बरौ सुकेशजटिलौ इत्यादि परस्परविपरीतचरितत्वेनेति परस्परभेदाभेदस्तस्य ईक्षणं दर्शनं कृष्णमिवाभिन्नः शिवकृष्णाभिन्नः इति दर्शनमित्यर्थः तेनोज्झितास्त्यक्ताः ये जनास्तेषां एका मुख्या याः सिद्धयस्तत् पदौ नत्वन्येषां अदृश-सिद्धिप्रदावित्यर्थः । परस्परस्मात् समुद्भव तदुत्पत्तिर्ययोस्तौ—

क्वचिद् ब्रह्मा क्वचिद् विष्णु क्वचिदुद्रः प्रशस्यते ।
अनेन तेषामाधिक्यमैश्वर्य्यं वातिरिच्यते ॥

तत् कल्पान्त वृत्तान्तमधिकृत्य महर्षिभिः प्रभावः कथ्यते तेषां परस्परसमुद्भवात् इत्यादि

---

1. क. ग. विषदृशेष्ट ।

जगज्जननपालनप्रलयकारिनिष्कारणं
श्रुतिस्मृतिपुराणनित्यपरिचितं परंब्रह्म यत् ।
तदेव हरिशङ्कराम्बुजभवाब्धिजा शैलजा
गिरादितनुधृक् सदा भजत सर्वगं सर्वदम् ॥२५॥

मुनिर्गुरुतमो जगद्धिततमं रहस्यं परं
कृपालुरुपदिश्य ताः सपदि तत्र सोऽन्तर्दधे ।
चमूरुनयनास्ततो दशदिशो निरीक्ष्य स्फुटं
परस्परविलोकिताः परमविस्मिता यज्ञिरे ॥२६॥

इति श्रीमुकुन्दविलासे महाकाव्ये यतीन्द्ररघूत्तमतीर्थपादकृतौ
नारदोपदेशो नाम तृतीयः सर्गः ।

वायवीयपुराणवचनात् अन्योऽन्यमनुरक्तास्ते ह्यन्योऽन्यं प्रणताश्च वै लीलया परमेश्वराः इत्यादि कौर्मपुराणवचनात् भजत अभेदबुद्ध्या सेवध्वं हे गोप्य इति शेषः माधवो-माधवौ विष्णुशङ्करौ ॥ २४ ॥

जगज्जननेति । विष्णुशिवयोरद्वैतभजनमुपदिश्य हर्यादीनां षण्णां तदुपदिशति । अन्येषां देवानामप्युपलक्षणार्थं निष्कारणं कारणमित्यर्थः । श्रुत्यादिभ्यः परिचितं विशेषणे ज्ञानं परं जगदुत्कृष्टकं ब्रह्मव्यापकं ईश्वरादिशब्दप्रतिपाद्यं तदेव नान्यत् । अम्बुजभवो ब्रह्मा अब्धिजा लक्ष्मी शैलजा पार्वती गीः सरस्वती आदिशब्दात्

1, घ. अश्वङ्करे ।

सीता राधादिश्च तनुधृक् तत्तच्छरीरधारी सर्वं जगद् व्यापकम् । गगनवदपरिच्छिन्ना परमात्मा सर्वदं भक्तानां सकलफलदातारं यथा सीतपीतनीलादिविचित्रमणिमाला-स्थमेकमेव सूत्रं तथा दुर्गादिसरस्वत्यान्तेषु शरीरेषु एक एक परमात्मा परमेश्वरादि-शब्दप्रतिपद्यानि राजते तत्रैव दृष्टि निधाय भजनं कुरुत । शरीरभेदाम् भेददर्शनं मा कुरुतेति भावः ॥ २५ ॥

मुनिरिति । मुनिः नारदः ताः विस्मिता आश्चर्य्यबुद्धयः जज्ञिरे जाताः । शेषं स्फुटार्थम् ॥ २६ ॥

इति श्रीमुकुन्दविलासप्रकाशिकायां तृतीयः सर्गः ।

चतुर्थः सर्गः

अथ सपदि तडिद्वद्यातमन्तर्द्धिमेतं
विधिसुतमनिकेतं व्यक्तरोमाञ्चरम्याः ।
अधिधरणिशिरोभिर्जानुभिः पाणिभिस्ताः
सनयनजलधारालोलहाराः प्रणेमुः ॥ १ ॥

उपविविशुरभीष्टं सस्मरुश्चारुचेष्टं
वपुषि पुलकमापुः संदधुः स्वेदविन्दून् ।
मुमुचुरपि दृगम्भः संबभूवुः सकम्पा
निजगदुरनवद्या गद्गदं कृष्णशब्दम् ॥ २ ॥

अथेत्यादि । चतुर्थसर्गे शिवपार्वत्योरर्चनव्रतं श्रीकृष्णप्राप्त्यर्थं गोपीनां वर्णयिष्यन् प्रथमं तासां किञ्चिन्मधुरचरितं त्रिभिः श्लोकैर्वर्णयति । अथ नारदान्तर्द्धानानन्तरं एतं नारदं ताः प्रणेमुः इत्यन्वयः । सपदि झटिति तडिद् विद्युदिव यातं प्राप्तं अन्तर्द्धिमन्तर्द्धानं अनिकेतं सदैकत्रावस्थितिरहितं अधिधरणि धरण्यां शिरस्ताभिर्भूलग्नैरित्यर्थः । सनयनजलधाराः अश्रुधारासहिताः भक्तिप्रेमातिशयवत्यः इति भावः ॥ १ ॥

उपविविशुरित्यादि । प्रणामानन्तरमुपविविशुः । अभीष्टं श्रीकृष्णं सस्मरुःस्मृतवत्यः । वपुषि शरीरे पुलकं रोमहर्षं संबभूवुः अभवन् । गद्गदं स्वरभङ्गसहितम् ॥ २ ॥

क्रमसमुदितलज्जा लब्धधैर्य्याः कुमार्य्यः
परिततहरिभावं गोपिका गोपयन्त्यः ।
स्मितसुललितनेत्राः प्रेक्षिताऽन्योऽन्यवक्त्रा[1]
मुनिभणितमुपायं प्रक्रमं संप्रचक्रुः ॥ ३ ॥

प्रतिदिनमनुदीते भास्करे पुष्कराद्यः
प्रणति[2]कृतमनोज्ञान्योऽन्यहस्ताब्जबन्धाः ।
श्रुतिचपलवतंसा हंसपुर्वी व्रजन्त्य-
स्त्रिपुररिपुमुराय्र्योः[3] संजगुर्नाममालाम् ॥ ४ ॥

क्रमेत्यादि । क्रमेण समुदिता संजाता लज्जा स्वकार्य्यज्ञानभयं यस्यां ताः अतएव लब्धधैर्य्याः कुमार्यो ऽविवाहिता इयं गोपिका इत्यस्य विशेषेणम् । परिततो विस्तृतो व्यक्तो वा यः हरिभावः अश्रु-आदिभिः सह गद्गदभावः कृष्णकीर्त्तनेन या हरिप्रीतिः तां गोपयन्त्यः संवृत्तयन्त्यः गोपिका आभीर्य्यः मुनिभणितं नारदोपदिष्टं उपायमुक्त्वा कृष्णप्राप्त्युपायोद्यमं शिवप्राप्तिभि. जनप्रवृत्तिरूपं संप्रचक्रुः सम्यक् निर्द्देशं प्रकर्षेण चक्रुरित्यर्थः ॥ ३ ॥

प्रतिदिनमिति । नारदोपदिष्टं श्रीकृष्णप्राप्त्युपायं तासां वर्णयति । प्रतिदिनं अनुदिते भास्करे उषसीत्यर्थः । अनुदित इति इदं गताविल्यस्य

---

1. घ. तुष्टा ।

2 ख. ग. प्रणय ।

3. ख. ग. त्रिपुर ।

रविदुहितुररण्ये कार्त्तिके मासि पुण्ये
पुरहरगिरिकन्ये मन्यमाना अभिन्ने ।
व्रतविहितहविष्यास्ता महर्षेः सुशिष्या
विरचितसिकतार्च्चे रर्च्चयामासुरर्च्चे ॥ ५ ॥

कुवलयनयनाभिः शोणिपाणिप्रणीतै-
र्विमलकमलवृन्दैः सादरं दीयमानैः ।
अरुणकमलजातैः पुण्डरीकैरिवाच्छै-
र्मुहुरपि शिवमूर्त्ती रेजतुः पूज्यमाने ॥ ६ ॥

रूपम् । पुष्कराक्ष्यः पङ्कजनयनाः प्रयत्नेन कृतो मनोहरोऽन्योन्यहस्ताब्जबन्धो याभिस्ताः श्रुतिषु आकर्णेषु चपला गमनेन चञ्चला अवतंसाः कुण्डलानि यासां ताः हंसपुत्रीं यमुनां व्रजन्त्यो गच्छन्त्यः नाममालां जय जय हरिहरशङ्करराम इत्यादि नामश्रेणीं माला यथा एकेन सूत्रेण ग्रथिता तथेयं नामश्रेण्यपि संज्ञेन परमात्मना सम्बन्धा इत्यभिप्रायेण मालापदोपादानम् ॥ ४ ॥

रविदुहितुरित्यादि । यमुनाया अरण्ये विपिने तत्कूलस्य वने इत्यन्वयः । पुण्य इति वने मासि वा विशेषणम् । तस्य च पुण्यजल इत्यर्थः । सुन्दर इति वाऽन्यार्थः । शिवदुर्गे अभिन्ने अन्योऽन्यमानौ (?) मन्यमाना जना व्रताय विहितं कृतं हविष्यं श्रुतिस्मृतिशास्त्रोक्तसंयतभोजनं याभिस्ताः । महर्षेः नारदस्य सुशिष्याः सुन्दरशिष्याः यद्दोपदिष्टकारितत्वात् । शिवदुर्गा कथंभूते स्त्रीविरचिते सिकतार्च्चे विरचिते निर्मिते सिकताभिः वालुकाभिरर्च्चे प्रतिमा ययोः ते अर्च्चयामासुः पूजां चक्रुः । पुनः किंभूते अर्च्चे अर्च्चार्हे पूजयितुमुचिते इत्यर्थः ॥ ५ ॥

कुवलयेति । कुवलयनयनाभिः नीलोत्पलनयनाभिः गोपीभिः शोणाक।

वरतनुतनुनद्यां मुद्रिते यद्दृगब्जे
करकमलयुगं च प्रापयत्कोरकत्वम् ।
हृदयगगनमध्ये भक्तिचन्द्रोदयस्य
स्फुटमिदमिह[1] कार्य्यं केन वा नावधार्य्यम्[2] ॥ ७ ॥

गणपतिरविरुद्राम्बाहरिब्रह्मवह्नीन्[3]
प्रचुरसदुपचारैरर्च्चयित्वैकबुद्ध्या ।
अनुदिनमनुरक्ताः पूजयामासुरीशौ
स्तुतिनतिशतयुक्ताः श्रद्धया गोपवध्वः ॥ ८ ॥

ये पाणयो हस्ताः तदग्राणि नीतैः प्रापितैः तद्गतैरित्यर्थः । विमलानि प्रफुल्लानि यानि कुमुदानि तेषां वृन्दैः समूहैः सादरं सगौरवं यथा स्यात् तथा दीयमानैः प्रतिमयोरपि दीयमानानि हस्ताग्रधृतकुमुदवृन्दानि कविरुत्प्रेक्षते । अरुणकमलेषु रक्तपद्मेषु जातानि उत्पन्नानि तैरिव पुण्डरीकैः शुक्लपद्मैः स्वच्छैरमलिनैः शिवमूर्त्ती शिवयोः प्रतिमे रेजतुः शोभामापतुः ॥ ६ ॥

वरतन्विति । वरतनूनां गोपीनां तनुरेव नदी तस्यां शेषं सुगमम् । अत्र साङ्गरूपकालङ्कारः ॥ ७ ॥

गणपतिरित्यादि । गणेशादिसप्तदेवानां पूजनं नित्यमिति तत्तद्दर्शयति । गणपतिः गणेशः रविः सूर्य्यः रुद्रः महेशः अम्बा दुर्गा हरिः विष्णुः ब्रह्मा चतुराननः

---

1. घ. स्पुरमिदमिह ।
2. ख. ग. पुस्तके ६. ७ श्लोकद्वयं ८. ९ संख्यायामुल्लिखितमस्ति ।
3. ख. ग. ब्रह्मन् ।

सद्गुणानां पाणां गणपतिमुखानां मखविधौ
दधौ साहं सोऽहं मतिमिति[1] मुहुर्यां व्रजवधूः ।
न सा साराशाद् य इह भगवान् गोपवनिता
गणेशाद्याः सप्ताप्यजनि जनताया हितकृते ॥ ६ ॥

बहिरग्निः एकबुद्ध्या अनुदिनं प्रत्यहं ईशौ ईशश्च ईशश्च ईशौ पुमान् स्त्रियमित्येकशेषः ।
गौरीशङ्करावित्यर्थः ।

नार्चयेत् यस्तु पुण्यात्मा गणेशं परमेश्वम् ।
नैव सिद्ध्यन्ति कार्याणि नरकं चास्य जायते ॥
शिवं भास्करमग्निं च केशवं कौशिकीमपि ।
मनसा नार्चयन् याति देवलोकादधोगतिम् ॥
वरं देहपरित्यागो वरं नरकसङ्गमः ।
नरैर्वा पूज्य भुंजित देवं वै पञ्चसम्भवः ॥

इत्यादि शास्त्रवृन्दं सप्तदेवार्चनं नित्यत्वे प्रमाणमिति ज्ञेयम् ॥ ८ ॥

सद्गुणानामित्यादि । गोपीरूपेण श्रीकृष्णाख्यं परं ब्रह्मैव देवपूजनं नाम्यं करोतीत्याह । साहं दुर्गाहं सोऽहं गणेशोऽहं शिवोऽहमित्यादिर्मतिः सा मतिः सारोपारोपाहार्यारोपरूपेण । किन्तु तदाहार्यरूपैव तत्र हेतुमाह । यद्यस्मात् भगवान् ब्रह्मैव गणेशाद्यः सप्तदेवताः गोपवनिताः अजनि जाता एता निरूपाणि किमर्थं कृतानीत्यत आह । जनताया हितकृत इति हितं चतुर्वर्गः तत्कृते तत्करणाय॥ ६ ॥

---

1. घ. गतिमिति ।

तालतानस्वरग्राममूर्च्छनाश्रुतिमञ्जुलम्।
शिवयोरेकधिस्तोत्रं गीतं चक्रुः कुमारिकाः ॥ १० ॥

एकादशः प्रबन्धः

॥ मालवगौड़ारागेण गीयते ॥

प्रणयभरेण परस्परसंगतदेहौ ।
भुवनमनोहरसंचरितेहौ ॥
शङ्करसती शं कुरुतं जगदखिलतापहरौ
॥ ध्रुवपदमिदम् ॥ १ ॥

तालतानेति । सङ्गीतशास्त्रप्रतिपाद्यैस्तालादिभिः सम्बन्धोऽत्र द्रष्टव्यः ॥ १० ॥

स्तुतिमाह प्रणयभरेति । ध्रुवपदगतकुरुतमिति मध्यमपुरुषद्विवचनात्। पदेन त्विच्नेन पुमानिति पदेन इत्यादि पदैरन्वयो द्रष्टव्यः। युवां कथंभूतौ । प्रणयभरेण प्रेमातिशयेन परस्परसङ्गतौ संमिलितदेहौ तथाभूतस्तौ परस्परदेहप्रविष्टार्द्धशरीरावित्यर्थः। भुवनमनोहरे संचरिते कृते इहे चेष्टौ याभ्यां तौ तथाभूतौ हे शङ्कर हे सति शं कल्याणं ममेति युवामिति च साम्मुख्ये नैवाक्षिप्यते कुरुतं जनयतमित्यर्थः। जगतां सर्वभक्तानामित्यर्थः। अखिलान् आध्यात्मिकादीन पापान् हरतेति जयेति । तादृश तापहरौ हे तथाभूतौ ॥ १ ॥

जय जलजोद्भव[1] वागधिदैवतमाये ।
जलधिसुताधिपते हरिजाये ॥ २ ॥

जय रघुनन्दन रावणनाशनसीते ।
मुरहररुक्मिणी काञ्चनपोते ॥ ३ ॥

जय धरणीधर रेवतीसंगतरामे ।
जय मकराङ्करते रतकामे ॥ ४ ॥

मिहिरहुताशन[2] तस्य च[3] भार्य्ये ।
निखिलजनाधिपते जगदार्य्ये[4] ॥ ५ ॥

जयेति । जलजोद्भवत्वे हे ब्रह्मन् हे वागधिदैवत हे सरस्वतीमाये मायावती मायाशब्दादर्शादित्वादत् ॥ २ ॥

जय रघुनन्दनेति सुगमम् ॥ ३ ॥

जयेति । हे धरणीधर हे अनन्त, हे रेवती-सङ्गतो रामो यया सा सङ्गतरामा हे तथाभूते मकराङ्क हे मदनरतोऽनुरक्तः काम यस्यां सा हे रतिकामे ॥ ४ ॥

मिहिरेति । मिहिर हे सूर्य्य हुताशनस्य वह्नेः भार्ये छाये स्वाहे इत्यर्थः । हे निखिलजनाधिपते हे सर्वेश्वर जगदार्य्ये जगत्पूज्ये स्वामिनी वा इत्यर्थः ॥ ५ ॥

---

1. क जलोद्भव । घ. जयजयोद्भ ।
2. ख. ग. महिर सुताशन ।
3. क. ख. ग. तस्य तस्य च ।
4. क. हरि जगदार्ये ।

सकलसुरात्मकदैवसन्ततशक्ते ।
रचितरघूत्तमनिर्भिदभक्ते ॥ ६ ॥

गौरीगिरीशकमलामुरवैरिवाणी-
ब्रह्मादिनामनिकरं कृतवान् कृपालुः ।
तां तां तनूमनुगतो नटवद्विहारी
नारी-नरार्द्धवपुरस्तु शिवः शिवाय ॥ ११ ॥

सकलेति । हे सकलसुरात्मक सर्वदेवस्वरूप दैवसन्ततेः देवसमूहस्य शक्तिः प्रेयसी सा हे तादृशी । रचिता रघूत्तमनेन कविना निर्भेदाभेदरहिता भक्तिर्यस्य यस्याः वा सः सा वा । रचितरघूत्तमनिर्भेदभक्तित्वे हे शक्ते हे शिवे ॥ ६ ॥

गौरीत्यादि । गीतार्थं संक्षिप्तश्लोकेन स्फुटमाह । निकरान् समूहान् कृतवान् विख्यातुत्सर्गान् आत्मन् इति शेषः । नटवदिति नटो यथा रामवेशेन सीतावेशेन नरनामात्मन्यपि तां तां तनुं शौर्यादितनुमनुगतः प्राप्तः स्वस्य गौरीत्यादीनि नामानि लोकेषु विख्यापयति । नटस्य तु स्वप्रयोजनार्थं परमेश्वरस्य तु केवलं जीवोपकारार्थं स्वदशावरणमिति दर्शयितुं कृपास्फुरितविशेषेण पुण्यात् नारीनरयोः स्त्रीपुरुषयोः ऊर्द्धेन समांशे एकं वपुर्यस्य स नारिनरार्द्धवपुस्त्रीपुरुषलक्षणकार्द्धशरीरद्वयशरीरकः इत्यर्थः । शिवः परममङ्गलदाता परमेश्वरः शिवाय मङ्गलाय अस्तु भवतु ॥ ११ ॥

द्वादशः प्रबन्धः

॥ मालश्री[1]रागेण गीयते ॥

तव चरणाम्बुजसेवनरङ्गी ।
स भवति सपदि सकलफलसङ्गी ॥
॥ ध्रुवपदमिदम् ॥ १ ॥
जय जय भगवति गौरि नमस्ते ।
बहुभवनेक्षणरचितसमस्ते[2] ॥ २ ॥
विधिविधुशम्भुतनो ततमाये[3]
निखिलहिताय विहितबहुकाये ॥ ३ ॥

तवेति । गौरीस्तुतिमाह । रङ्गी सानुगः स जनः सपदि तत्कालमेव सकलफलेषु धर्मार्थकाममोक्षेषु सक्तो युक्त इत्यर्थः ॥ १ ॥

जय जयेत्यादि । भगवती मैश्वर्यादिषड्गुणवतीति शेषः । बहुभवनेषु ईक्षणेति सृष्टिप्रतिपादकस्य तौ यत् प्रसिद्धं ब्रह्म तत्स्वरूपायास्तव बहुभवनेक्षणः बहुभवनायेक्षणं बहुभवनेक्षणं तेन चरितं जनितं समस्तं जगत् यया सा बहुभवनेक्षणरचितसमस्ता हे तादृशी अयं भावः । परंब्रह्मैव त्वं नटवद्स्त्रीपुरुषादिजगद्रूपासीति ॥ २ ॥

विधीति । मुख्यपुरुषरूपतयाह । विधिश्चतुराननः विधुश्चतुर्भुजः शम्भुः

---

1 ख. ग. मालवश्री ।
2 क. घ. चरितंसमस्ते ।
3 ख. ग ततमाये ।

यत्र तु विकिरसि करुणादृगन्तम्
तमोगुणमपि कुरुषे गुणवन्तम् ॥ ४ ॥
तव पदपङ्कजभजनविमुक्तम् ।
हरिरपि नो कुरुते फलयुक्तम् ॥ ५ ॥
सकृदपि निगदति भवदभिधानम् ।
स न कलयति जननीस्तनपानम् ॥ ६ ॥

पञ्चाननः ते तनवः शरीराणि यस्या सा हे तादृशी । हेतुगर्भविशेषणं सम्बोधनमाह । ततमायेति तता विस्तारिता बहुरूपोकृता माया प्रकृतिर्यया हे तादृशी बहुरूपधारण-प्रयोजनमाह । निखिलहितायेति । निखिलानां सकलजीवानां हिताय इष्टसिद्धये चतुर्वर्गसिद्धये इत्यर्थः ॥ ३ ॥

यत्रेति । ईषद्दयापि परमहितकारिणयाह । यत्र पुरुषे तु एवं विकिरसि विक्षिपसि करुणादृगन्तं करुणाभिव्यञ्जकं लोचनान्तं तं पुरुषं अगुणमपि पाण्डित्यं धनौत्वादिगुणरहितमपि गुणवन्तं भेदगुणयुक्तं कुरुषे ॥ ४ ॥

तव पदेति । त्वद्भक्तिहीनस्य कोऽपि दैवाऽनुकूलो न भवति इत्याह । भजनविमुक्तं भक्तिरहितं पुरुषमिति तत्तदभीष्टफलसहितं नो कुरुते न करिष्यति ॥ ५ ॥

सकृदित्यादि । कीर्त्तनश्रवणादीनां भक्तीनां माहात्म्यमधिकमाह । सकृदपि एकवारमपीत्यर्थः । निगदति कीर्त्तयति भवत्यास्तवाभिधानं नाम न कलयति न करोति स्तन्यपानं अयं भावस्त्वन्नाम सत्कीर्त्तनेनैव निर्गुणमुक्तिं प्राप्नोति किमु सकलभजन-माहात्म्यवक्तव्यमिति वैमुख्यन्यायेन सर्वप्रकारभजनमाहात्म्यं दर्शितम् ।

कृपणे कृपामयि कृपय नितान्तम् ।
विरचय नन्दसुतं मम कान्तम् ॥ ७ ॥

उमेति द्व्यक्षरं नाम योऽहनि समनुस्मरेत् ।
न स्मरेच्चित्रगुप्तस्तं कृतपापमपि द्विजम् ॥
दुर्गानामामृतं पीतं येनेह जगतीतले ।
न जातु जननीस्तन्यं स पिबेत्कुरुसम्भव ॥

इति स्कान्दे अगस्तिं प्रति स्कन्दवचनम् ।

कृते ध्यानेऽधिकारी स्यात् त्रेतायां यज्ञसाधने ।
द्वापरे परिचर्यायां कलौ नामस्तु केवलम् ।
गायन्ति ये जना भक्त्या मम नाम निरन्तरम् ।
न जाने किं करिष्यामि तेषां परमसुन्दरी ॥
कृतादिषु युगे पूर्वे परमं धर्ममित्यपि ।
तथापि वै कलौ प्राप्ते किं ··· मम नियोज्यते ॥
देवादिभक्तिनियमास्तपस्या
यज्ञाश्च तीर्थानि महाव्रतानि ।
योगाः सुदानं सुजपोऽतिधर्म—
स्तथा न मे नाम सुतोयमति (?) ॥

शक्तियामले विजयां प्रति श्री दुर्गावचनम् । इत्यन्यत्रापि दुर्गानाममाहात्म्यं द्रष्टव्यम् ॥ ६ ॥

कृपणेति । कृपणे दुःखिते कृपा दया मन्मथकथा तद्बहुले कृपय कृपां कुरु । नितान्तमत्यन्तं विरचय रचय कुरु । नन्दसुतं श्रीकृष्णं मम गोप्याः बहुपासिकायाः कान्तं पतिम् ॥ ७ ॥

स्वगुणवशीकृतहरिहरदेवे ।
अलघुरघूत्तमकृतपदसेवे ॥ ८ ॥

स्वगुणेति । स्वगुणे स्वस्य आत्मदीयायाः मायायाः गुणा सत्त्वादय तैर्वशीकृतो हरिहरो देवो हरिहरो । परे देवाश्च वा यया हे तादृशि अलघुरिति कविविशेषेण । ननु—यः कृष्णः सैव दुर्गा स्याद् या दुर्गा कृष्ण एव स ।

आवयोरन्तरं नास्ति सत्यं सत्यं वदाम्यहम् ॥

इति नारदीयतन्त्रे नारदवचनात् ।

उमा शङ्करयोर्भेदो नास्त्येव परमार्थतः ।
द्विधासौ रूपमास्थिता स्थित एको महेश्वरः ॥

इति लिङ्गपुराणे व्यासवचनात् ।

विष्णुरुद्रान्तरं चैव श्रीगौर्य्योरन्तरं तथा ।
गङ्गागौर्य्योरन्तरं च यो ब्रूते मूढधीस्तु सः ॥

इति स्कान्दे रुद्रवचनात् ।

दुर्गया सह हरिहरादीनां भेदाभावे सिद्धे कथमिदं स्वगुणवशीकृतहरिहरदेव इति विशेषणं भेदविस्तं संगच्छते इति चेत् शृणु सिद्धान्तं यद् यन्मुहूर्त्तोऽवच्छेदेन परमेश्वरस्य भजनशीलानुद्दिश्य उपदिश्यते तन्मुहूर्त्तावच्छेदेन इतरमूर्त्तिरवच्छिन्न तदापेक्षयापि कं माहात्म्यं पश्यते (?) तथा हिमांशुः तथाह्य मारुतः ।

विष्णोः शरीरग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतः स्वां कः स्तोतुं शक्तिमान् भवेत् ॥

इति ब्रह्मवचनम् । न ज्ञायसे हरिहरादिभिरप्यपारा इति वेदवचनम् तथा च । कालिकापुराणे—

गणेशरविरुद्राम्बाविष्णुपद्मजवह्निषु ।
तनूषु तस्थुषे[1] देवि नमः सर्वेश्वराय ते[2] ॥ १२ ॥

सर्वहास्या सर्वगा दिव्यमूर्त्तिर्नित्या देवी सर्वरूपा पराख्या ।
कृष्णादीनां सर्वदा मोहयित्री सा स्त्रीरूपैः सर्वजन्तोः समन्तात् ॥

इत्यादिवचनं च । देव्याः परममाहात्म्यदर्शकं नैतावताद्यादिरूपायाः दुर्गायास्तस्या एव नन्दा भवति तात्पर्य्याभावात् ऐक्यप्रतिपादकशास्त्रविरोधात् । अन्यथा—

साथ दृष्ट्वा तदा च्छायां विष्णुमायाविमोहिता ।
अपहृतं विरे कुञ्जं मीनातुरोषा विवेश हि ॥

इति कालिकापुराणे श्रीरुद्रवक्षस्थलस्य स्वप्रतिबिम्बस्यान्तरभ्रमवर्णनम् । विष्णुमायाविमोहितेति विशेषणकथनं च दुर्गायास्तदनैश्वर्यप्रमाफलं स्यात् न चेदनिष्टं सैव सर्वेश्वरेश्वरीत्यादि । शास्त्रविरोधात् इत्यलं पल्लवितेन ॥ ८ ॥

गणेशेति । हे देवि सर्वेश्वराय सर्वेषामीश्वरस्वरूपिणे ते तुभ्यं नमः । कथम्भूता त्वं गणेशः विनायकः रविः सूरः रुद्रश्चन्द्रशेखरः अम्बा हैमवती विष्णुर्नारायणः पद्मजः ब्रह्मा वह्निर्वैश्वानरस्तेषां तनूषु शरीरेषु तस्थुषे विद्यमानासि[3] ॥ १२ ॥

---

1. घ. कुरुषे ।
2 ख. ग पुस्तकयोः श्लोकस्यास्य लेखो नास्ति
3. क-घ पुस्तकेषु श्लोकस्यास्य व्याख्या नास्ति ।

या मायया गिरिसुता गिरिशार्द्धदेहा
सेयं परा हरिहरार्द्धवपुर्बभूव ।
ब्रह्मेति शक्तिरिति विष्णुरितीर्य्यते या
सा नः प्रसीदतु सदाशिवयोगमाया ॥ १३ ॥

या माययेति । माया प्रकृतिः योगमाया विष्णुमायादिशब्दाः दुर्गाया एव नामानि । दुर्गातिरिक्ता परमेश्वरमाया नास्ति । दुर्गा परमेश्वरो न भवति विष्णुरेव परमेश्वरः इत्यादि भ्रमवृन्दं निवारयितुं दुर्गामाययोरभेददर्शनपूर्वकं विष्ण्वादिभिरभिन्नत्वं परंब्रह्मस्वरूपकत्वं च दर्शयति । मायया सत्वरजस्तमोरूपाया प्रकृत्या गिरिसुता हिमालयकन्या गिरिशः शिवः तयोरर्द्धं मिलितं देहं शरीरं यस्याः सा गिरिसुता गिरिशार्द्धदेहा सेयं अर्द्धनारीश्वरशरीरधारिण्येव सेयं परा परमेश्वरी यद्वापरे विभिन्नेव परा हरिहरयोः शिवविष्णुशरीरयोर्द्धे मिलिते वपुर्यस्याः सा हरिहरार्द्धं विष्णुः बभूव प्रादुर्भूत् । ब्रह्मेति परमात्मेति शक्तिरिति प्रकृतिरिति विष्णुरिति नारायण इति इर्य्यते कीर्त्यते । एतैर्नामभिरेकैव सा प्रतिपाद्य इत्यर्थः नोऽस्मान प्रसीदतु कृपयतु अनुगृह्णातु वा । सदाशिव रुद्रः तस्य योगमाया भार्य्येत्यर्थः । यद्वा सदाशिवयोगाय श्रीरुद्ररूपस्य स्वस्यैव योगाय सम्बन्धाय माया स्त्री रूपेत्यर्थः अयं भावः । एक एव परमात्मा स्त्रीपुरुषादिशरीरधारी स्त्रीलिङ्गनामानि नटवद्धत्ते । माया प्रकृतिशक्त्यादिनामानि तु द्विधा व्यवस्थापि तानि प्रधानशब्दवाच्यं यद्वस्तु सत्वरजस्तमो रूपं तद्वाचकान्येव भवन्ति । परमात्मावाचकान्यपि भवन्तीति यथा गङ्गायाशब्दास्तन्नदीवाचकाः शब्दादभिन्नादधिष्ठातृदेववाचकाश्च भवतीत्यनेनैव वस्तुनैक्यमितिभावः ॥ १३ ॥

त्रयोदशः प्रबन्धः

॥ गुण्डकिरीरागेण[1] गीयते ॥

कनककिरीटजटामुकुटोर्द्ध्वकमंघ्रिशिरोगतगङ्गम् ।
गोरोचनतिलकार्द्धमिलितकलचन्द्रसकललसदङ्गम् ॥१॥
मानस चिन्तय हरिहरदेवम् ।
चतुराननमुखनिखिलसुरेप्सितपदसरसीरुहसेवम् ।
ध्रुवपदमिदम् ॥ २ ॥
मरकतरजतमुकुरशकलद्वयमिलनहासमुखभासम् ।
भक्तदयोदयसार्द्धनयनयुगमरुणाधरमृदुहासम् ॥ ३ ॥

कनकेत्यादि । सेयं परा हरिहरार्द्धवपुर्वभूवेति यदुक्तं तद्रूपायाः दुर्गायाः स्तुतिमाह । सुवर्णमुकुटजटामुकुटयोरूर्ध्वके मस्तके यस्य स तथा तम् । अंघ्रेश्चरणात् शिरो मस्तकं गता गङ्गा यस्य स तथा तम् । गोरोचना तिलकार्द्धे मिलिता कला अंश एकदेशो यस्य तादृशम् । यश्चन्द्रशकलं चन्द्रखण्डं तेन लसत् दीप्यमानं अङ्गं ललाटं यस्य स तथा तम् । हे मानस एतादृश हरिहरदेवं चिन्तय भावयेत्यर्थः । हरिहर नामा देवः हरिहरदेव कदम्बतरुवत् मध्यपदलोपी कर्मधारयसमासः । पुनः कीदृशं चतुराननमुख्यैर्ब्रह्मादिभिर्निखिलैः सुरैर्देवैः ईप्सिता प्राप्तुमिच्छता न तु प्राप्ता पदसरसीरुहयोश्चरणपद्मयोः सेवा यस्य स तथा तम् । ध्रुवपदमिति प्रतिपदगानानन्तरं गीयमानं यद्वाक्यं तद्ध्रुवपदमिति साङ्गीतिकं ध्रुवपदं स्वरविशेषं विश्रामस्थानमित्यर्थः सर्वगीतेष्विदं बोद्धव्यम् ॥ १-२ ॥

मरकतेति । मरकतो नीलमणिविशेषो रजतं रौप्यं तयोर्पूर्रौ प्रवाहौ

---

1. क. गुण्डकरी ।

मकरमुखाकृतिकुण्डलिकुण्डलमभ्रतडिन्निभकेशम्[1] ।
भानुसुतासुरसिन्धुसमद्युतिमब्धिसुतागिरिजेशम् ॥४॥

तयोः शकलद्वयं खण्डयुगं तस्य मिलनं परस्परसम्बन्धितं तद्भासिनी तत्परिहासिनी मुखभा मुखद्युतिर्यस्य स तथा तम् । मरकतरजताद्र्द्वयैकदर्पणशोभा मुखमित्यर्थः भक्तेति भक्तेषु दया भक्तिः दया तस्याः दयः प्रकाशो यस्मिन् तत् तादृशम् । सार्द्धनयनयुगं अर्द्धाधिकलोचनयुगं यस्य स तथा तम् । अरुणो रक्तेऽधरे मृदुरोपहासो यस्य स तथा तम् । ललाटेऽप्येतद्भागेऽर्कनयनं अधरे तु भागद्वयेऽपि रक्तत्वमितिभावः ॥ ३ ॥

मकरेति । मकरः जलजन्तुविशेषः तन्मुखस्यैव आकृतिः संस्थानं यस्य तन्मकरमुखाकृतिः । कुण्डली सर्पः तौ कुण्डले कर्णभूषणे यस्य स तथा तम् । अभ्रं मेघस्तद्विद्युत् तन्निभास्तत्कान्तयः केशा यस्य स तथा तम । भानुसुता यमुना सुरसिन्धुः गङ्गा तयोर्मिलितयोः समे सदृशे द्युतिः देहकान्तिर्यस्य स तथा तम् । अब्धिसुतायाः लक्ष्म्याः गिरिजा दुर्गा तयोरीशं स्वामिनं पतिमित्यर्थः ।

> यो वै महाविष्णुरितीर्यते तद्बुधैः महादेवमुदाहरन्ति ।
> योऽनन्तमध्ये परिवर्जितः शिवः स श्रीपतिः सोऽपि च पार्वतीपतिः ॥

इति स्कन्दवचनात् । यद्वा अब्धिसुता गिरिजा चेति अब्धिसुता गिरिजा सा चासौ ईशः शिवश्चेति अब्धिसुतागिरिजेशः तम् ।

> विष्णुं रुद्रान्तरं चैव श्रीगौर्य्योरन्तरं तथा ।
> गङ्गागौर्य्योरन्तरं च यो वृते मूढधीस्तु सः ॥

इति स्कन्दवचनात् ।

---

1. क. कुण्डलमभ्रतिडिन्निभकेशं ।
   घ. कुण्डलमद्भुततडिन्निभकेशम् ।

कुसुमनिकरनरकोकस[1]सन्ततवलितविलम्बितमालम् ।
करभकराभभुजव्रजसंलसदरिदरशूलकपालम्[2] ॥ ५ ॥

ननु स्त्रीलिङ्गपुंलिङ्गयोः कर्मधारयो नतृष्टचर (?) इति नाशङ्कनीयम् । विशेषणबहुलमिति सूत्रे लिङ्गनियमाभावात् । न च अद्रिसुतागिरिजेशशब्दानां तरच्छरि ... ... परमेश्वरस्यैकस्यैव वाचकत्वे घटकलशकुम्भशब्दानामिव कर्मधारयो न स्यात् । नहि घटकलशमनयेत्यादिप्रयोगे क्वचिद्दृश्यते इति वाच्यम् । भिन्नप्रवृत्तिनिमित्तयोरभिन्नवस्तुवाचकयोः शिवयोः कर्मधारयनियमात् नीलोत्पलवत् घटकलशौ तु शब्दौ न भिन्नप्रवृत्तिनिमित्तभेदः स्फुट एवास्ति तथाहि गिरिजाशब्देन स्त्रीशरीरविशेषविशिष्टपरमात्मा ईशशब्देन च पुरुषशरीरविशिष्टपरमात्मा शक्त्या बोध्यते । विलक्षणशरीरयोस्तत्तच्छब्दप्रवृत्तिनिमित्तयोर्भेदात् तयोराश्रयस्य तु भेदाभावात् न कर्मधारयो विरोध्यते । ननु गिरिजे शब्दाभ्यां तादृशशरीरविशिष्टपरमात्मारूपमेकं वस्तु पृथक् बोध्यते । नीलोत्पलाभ्यां शब्दाभ्यां तु न तथा पृथक् पृथगेकं वस्तु प्रतिपाद्यते इति चेति किं तेन सामान्याधिकरणहान्यप्रकृतसमास एव न सम्भवति इतिचेत् सूक्ष्ममीक्षसे परमात्मारूपप्रवृत्तिनिमित्तयोर्भेदोऽपि तच्छरीरयोरपि प्रवृत्तिनिमित्तयोर्भेदेन न तद्धानिः । अतो न कर्मधारयः सम्भव इति दिक् । ४ ॥

कुसुमेति । पुष्पसमूहमनुष्यास्थिसमूहाभ्यां वलिता हेतो विलम्बिता माला यस्य स तथा तं पुष्पश्च नरास्थिश्च ताभ्यां अर्द्धार्द्धरूपाभ्यां रचितैकमालामित्यर्थः । करभेति । करभो हस्तीशावः तस्य करभः शुण्डः तदाभस्तत्सदृश संस्थाने तत्तुल्यो भुजव्रजे बाहुचतुष्टये संलसन्तो अरिदरौ चक्रशङ्खौ शूलं कपाले यस्य स तथा तम् ॥ ५ ॥

1. घ. नरकीकश ।
2 ख. घ. दविदर कपालं ।

रत्नविलेशयकृतवलयाङ्गदपादकटककटिबन्धम् ।
कुङ्कुमपङ्कचिताभसितावलीकृततनुलेपनगन्धम् ॥६॥
अर्द्धपीतपटचर्माम्बरधरमर्द्धगरुड़बृषवाहम्[1] ।
सिति[2]करशुण्ढचण्डमदखण्डनजानुयुगलपरिणाहम् ॥७॥
कनकखचितमणिचित्रतनुक[3]फणिनूपुरकृतपदशोभम् ।
अनघरघूत्तमहृदयमधुपकृतचरणसरोरुहलोभम् ॥८॥

रत्नेति । रत्नानि सुवर्णादीनि विलेशयाः सर्पाः तैः कृता निर्मिता वलयाङ्गदपादकटककटीबन्धाः येन स तथा तं कटीबन्धः कटीसूत्रं कुङ्कुमपङ्कचर्चिता भसितावलीः श्मशानभस्मश्रेणी च ते ताभ्यां कृतौ तनुलेपनगन्धौ शरीरलेपननिमित्त-गन्धद्रव्ये येन स तथा तम् ॥ ६ ॥

अर्द्धेति । अर्द्धं समद्वितीयांशः पीतपटो यस्य तदर्द्धपीतपटं तादृशं चर्माम्बरं कृत्तिवाससं धरतीति तादृशस्तं अर्द्धं समः द्वितीयांशः गरुडो यस्य तादृशः वृषः वाहनं यस्य स तथा तम् । सितौ कृष्णशुक्लौ यौ करिणौ शुण्डौ तयोर्यश्चण्डमद उत्कटाहङ्कारः अतिसौन्दर्य्याभिमानस्तस्य खण्डनौ जानुयुगलपरिणाहौ विशालजानूनि यस्य स तथा तम् । कृदभिहितो भावो द्रव्यवत्प्रकाशत इति व्युत्पत्तेः अतिविशालजानु-नोर्वोध्यः ॥ ७ ॥

कनकेति । कनकेन खचिता सम्बलिता मणयः क्षुद्रपद्मरागादि-विविधमणिखण्डाः यत्र चित्रा श्वेतरक्तपीतादिविन्दुयुक्ता तनुर्यस्य स चित्रतनुकः स

---

1. ख. घ. वृषभवाहं ।
2. घ. शिव ।
3. क. चितकतनु ।

नटो यद्वन्नानाकपटकृतवेशा पृथगसौ
तथा त्वं स्त्रीपुंसप्रभृतितनुवृन्दादसि परा।
हितार्थं भक्तानां भवसि बहुरूपा भगवती
प्रपन्नानां कृष्णं रचय न चिरान्नः प्रियतमम् ॥१४॥

चासौ फणी कनकखचितमणिश्रेणिखचिततनुकफणो चेति द्वन्द्वः । तौ नूपुरौ चेति कर्मधारयः। शेषं तुल्यं अनघोऽपापो यो रघूत्तमः कविः तस्य हृदयमेव मधुपो भ्रमरः तेन कृतश्चरणसरोरुहयोर्लोभो यस्य स तथा तम् ॥ ८ ॥

नट इति । पुंलिङ्गेन हरिहराद्येवसदृशशरीरविशिष्टां दुर्गां स्तुत्वा तामेव स्त्रीलिङ्गपदेन स्तुवन्त्यः प्रार्थयन्ति । यद्वत् यथा नानाविधः कपटकृतो मायाकृतवेशः सीतारामादिवेशः तस्मात् पृथक् भिन्ना न तु तर्हि केशस्वरूपः तथा शैवत्वं सम्बोध्य आत्मा परमात्मानमिव 'देवीदासमात्मेति' वदन्ति वेदवादिन इति देवीपुराणवचनात् यद् योगिनो निरालम्बं निष्कलं निर्मलं परमालम्बयन्ती तत्वं त्वं त्वमेव परमेश्वरी इति कालिकापुराणे दक्षवचनात् ।

ईश्वरः सर्वभूतानां त्वमेव ललिते स्वयम् ।
कथं स्त्रीभावमापन्ना कामिस्ते वद सुन्दरी ॥

इति संमोहनतन्त्रे स्त्रीनाट्यं कुर्वन्तीं भवानीं प्रति भगवद्वचनात् ।

शक्तिर्नारायणो ब्रह्मा त्रयतुल्यार्थवाचनम् ।
स्त्रीषु नपुंसकतया भेदः शाब्देन वास्तवः ॥

इति ब्रह्मयामलवचनात् । पराभिन्ना नन्वहं परमेश्वरश्चेत् कथं गिरिकन्या शिवभार्या सुखजननी ईश्वरनारीविदित्याशङ्क्याह । हितार्थमिति । भक्तानामुपासकानां

चतुर्दशः प्रबन्धः

॥ मङ्गलगुर्ज्जरीरागेण गीयते ॥

प्रणतजनप्रियकारिणि भयहारिणि ।
विमलकमलमुखि देवि जय गिरिराजसुते ॥
ध्रुवपदमिदम् ॥१॥

स्मरहरकामदकामिनि गजगामिनि
सुरुचिरकाञ्चनगौरि ॥२॥

सुरगणसम्भवकायिनि वरमानिनि[1]
हतवती महिषवरं तम् ॥३॥

हितार्थं मिष्टशिष्टचयं ईश्वरस्य तव कर्माभावात् बहुरूपा विचित्रा नानाशरीरधारिणी नटवदित्यनुषज्यते तत्रापि भगवतो परमैश्वर्यशालिनो अतएव कृष्णं नन्दनन्दनं योऽस्मात् प्रियतमं पतिं त्वय कुरु ॥ १४ ॥

प्रणतेति । पुन स्तुत्यन्तरमाह । प्रणतानां भक्तानां जनानां प्रियकारिणी अभीष्टजननी तेषामेव भयहारिणी देवी विचित्ररूपावली धारणेन क्रीडनशीले जय सर्वोत्कर्षं प्रकाशय ॥ १ ॥

स्मरहरेति । स्मरहरस्यापि कामदा कन्दर्पजननी तस्यैव कामिनी सा चासौ सा चेति हे तादृशी सुरुचिरं सुन्दरतरं यत् काञ्चनं सुवर्णं तदिव गौरि पीते ॥ २ ॥

सुरगणेति । सुरगणस्य देवसमूहस्य स्वयं धा यस्मात् स चासौ

---

1. क. घ. वरमायिनी ।

अमरचयस्तुतितोषिणि रणरोषिणि
भुवनमनोरमशीले ॥४॥

प्रधनविधौ परिधाविनि रिपुलाविनि
खरतरवरतरवारे ॥५॥

मदमयमुण्डविनाशिनि बहुहासिनि
विरचितचण्डविनाशे ॥६॥

कायनश्चेति सा विद्यते यस्याः हे तादृशी। ननु न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत् अर्थप्रतिपत्तिकर इति व्युत्पत्तिवशात् तादृश विवक्षणात् वरा चासौ मानिनी चेति हे तादृशि ॥ ३ ॥

अमरेति। अमरचयस्य देवसमूहस्य स्तुतौ तुष्टभवितुं शीलमस्याः हेतादृशी। रणे रोष्टुं[1] क्रोष्टुं शीलमस्या हे तादृशी। भुवनानां भुवनस्य जनानां मनोरमं मनः प्रीतिदं शीलं सच्चरितं यस्या हे तादृशि ॥ ४ ॥

प्रधनेति। प्रधनविधौ युद्धविधाने परि सर्वतः शत्रुदिक्षु धाविनी वेशवद्गमनं कर्त्तुं धावनस्य प्रयोजनमाह। रिपुलाविनीति स्फुटम्। खरतरस्तीक्ष्णतरः वरः श्रेष्ठः तरवारः खड्गविशेषो यस्या हे तादृशि ॥ ५ ॥

मदमयेति। मदोमयो मत्ततावहुलो यो मुण्डोऽसुरविशेषः तं विनाशयितुं शीलं यस्याः हे तादृशि। यद्वा तत् विनाशः कार्य्यत्वेन विद्यते। यस्याः हे तादृशि बहुहासिनि अट्टहासिनि ॥ ६ ॥

---

1. ख. ग. रयातोष्टुं।

ससहजशुम्भनिपातिनि[1] वलघातिनि
जगदनुपालिनि कालि ॥७॥

कुरु मम नन्दसुतं पतिमतिसङ्गतिं
अनघरघूत्तमगीते ॥८॥

या पुंरूपवपुर्द्धरा हरिहरा वाख्याभिराख्यायते-
या योषित्तनुमाश्रिता जलधिजा गौर्य्यादि शब्दाह्वया ।
ब्रह्मेति प्रवदन्ति यां भगवतीं वेदान्तसिद्धान्तिनः
सा शक्तिर्बहुशक्तिका प्रणमतां प्रीतिप्रदा पातु नः ॥१५॥

ससहजेति । ससहजेन सहाङ्गेण निशुम्भेन सहितस्य शुम्भस्य विनाशिनी निपातिनी वलघातिनी जगतामनुपालिनी पालनकर्त्री । ननु अशिष्टानां नाशकत्वात् कथं मम जगत् पालनत्वमिति नाशङ्कनीयम् ।

"स्वर्गं प्रयान्तु रिपवो हि समस्त पूता ।
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ।"

इति मार्कण्डेय वचनात् ॥ ७ ॥

कुरु ममेति । स्तुतिप्रयोजनं फलं प्रार्थयते । अति निरन्तरा सङ्गतिमिलनं न काचित् विच्छेदो यस्य तादृशं पतिं कुरु । अनघरघूत्तमेन कविना गीतं गानं यस्य हे तादृशि ॥ ८ ॥

या पुंरूपेत्यादि । वहुशक्तिकेति वह्वो अनन्त शक्तयः तत्तत्कार्यसाधनसामर्थ्यान्निजस्याः सा बहुशक्तिका शेषं व्याख्यातप्रायम् ॥ १५ ॥

---

1. ख. ग. विनाशिनी ।

एवं सव्रतचर्य्यकैः स्तुतिशतैरद्वैतभावान्वितैः
गौरोशङ्करपूजनैश्च भगवान् सन्तोषमासेदिवान् ।
स्वस्यान्यासु तनूषु वल्लवसुता स्वानन्दसन्दोहदो
नाट्येन प्रकटीचकार चरितं पुर्वानुरागोचितम् ॥१६॥

इति श्रीमुकुन्दविलासे महाकाव्ये यतीन्द्ररघूत्तम-तीर्थपादकृतौ
गौरीशङ्करपूजनो नाम चतुर्थः सर्गः ।

एवमित्यादि । अद्वैत फलभवनजनिदर्शयितुमाह । सव्रतचर्य्यकैः स्तुतिशतैः —

हेमन्ते प्रथमे मासि नन्दव्रजकुमारिकाः ।
चेरु हि विष्वांभुजानाः कात्यायन्योचितं व्रतम् ॥

इति श्री भागवतप्रतिपाद्यसहितैः भगवान् श्रीकृष्णः आसेदिवान् प्राप्तवान् । स्वस्य आत्मनः परमात्मस्वरूपस्य अन्यासु पुंरूपस्य श्रीकृष्णाख्यशरीरभिन्नासु तनूषु शरीरेषु गोपकन्यासु आनन्दसन्दोहदः आनन्दसन्दोहं सुखसमूहं ददाति प्रकाशयतीति पूर्वानुरागोचितं पूर्वानुरागयोग्यं चरितं वचनविलासादिचरितं प्रकटीचकार व्यक्तीचकार । ननु एक एव परमात्मा कर्माभावात् लौकिकसुखः तत्साधनेच्छा-रहितश्चेत् कथं तस्य पुर्वानुरागः सम्भवति पूर्वानुरागश्च सङ्गमसुखः तत्साधनेच्छारूपः

तयोर्या सङ्गमात्पूर्वं दर्शनश्रवणादिना ।
रतिरुन्मीलितप्रायः पूर्वरागः स उच्यते ॥

इत्यालंकारीकसंकेतवचनात् इत्याशङ्क्याह नाट्येनेति । नाट्यो नटकर्मणा अनुकरणमात्रेणेत्यर्थः । नटो यथा विशिष्टनायकवेशेन नायिकावेशेन वा शृङ्गारानुराग

तदुचितव्यापारं वाऽनुकरोति सभाजनार्थं यथा जीवाज्ञ······न्वत्येहा विडम्बनामवेहि। यथा नटस्येति श्रीभागवतएकादशस्कन्दे शुकवचनात्। स्त्रीसगतिमिति प्रथयंश्चचारेति नवम-स्कन्धे श्रीरामचन्द्रचरिते शुकवचनात्। का दर्शयन् दैन्य. स्त्रीणां चैव दुरात्मनामिति दशमे रासपञ्चमाध्याय्यां शुकवचनात् नैता परमेश्वरस्य कापि हानिवृद्धिरिति द्रष्टव्यम्।

इति श्रीमुकुन्दविलासप्रकाशिकायां चतुर्थः सर्गः।

1. ख. पाठ: कीटदष्ट:।

पञ्चमः सर्गः

यूनो मनोज्ञनवयौवनभूषितानां
विव्वोक[1] विभ्रमविलासकलायुतानाम् ।
लक्ष्मीविजिष्णुवपुषां ब्रजसुन्दरीणां
संगे सतृष्णहृदयोऽथ बभूव कृष्णः ॥१॥
राधासुधासरसिकां करलोचनाद्यैः
पंकेरुहैः सुललितां कुचकोकरम्याम् ।
सौन्दर्यपङ्ककलितामवगाहमानं
कृष्णो विकष्टुमशकन्न मनोमतङ्गम् ॥२॥

द्वितीयादिभिः सर्गैः गोपीनां पूर्वानुरागं वर्णयित्वा इदानीं शिवपार्वत्योः द्वैतभजनफलं श्रीकृष्णपूर्वानुरागं पञ्चमे वर्णयति । युनोरित्यादि । विव्वोकबिभ्रमविलासाः स्त्रीणामलङ्कारविशेषाः अलङ्कारशास्त्रप्रसिद्धाः । कलानाट्यगीतादियुतानां लक्ष्मीर्विजिष्णु जलधिजातिरिक्तसौन्दर्यकं वपुर्यासां तासां सङ्गे मिलने सतृष्णहृदयः सोत्कण्ठमनाः । १ ॥

राधेति । तत्र प्रथमं राधिकायां अनुरागं दर्शयति । सरसिकां सुखकरां कुचकोरकौ स्तनचक्रवाकौ ताभ्यां रम्यां मंजुलां सौन्दर्यं लावण्यं तदेव पङ्कः कर्दमः तेन कलितां गहनां तद्वत् शेषं स्फुटम् । अत्र साङ्गरूपकालङ्कारः ॥ २ ॥

---

1. ग: विव्योक ।

राधां सुधांशुवदनां मदनाभिरामां
कामप्रियातिरमणीयशरीरशोभाम् ।
संप्रेरयन्[1] सुचरितां[2] स्मितसुन्दरास्यो
नन्दात्मजः[3] प्रियसखं सुबलं बभाषे ॥३॥

पञ्चदशः प्रबन्धः

॥ वसन्तरागेण गीयते ॥

सकलतापहरघनरसपुञ्जा[4] ।
नटखञ्जनयुगमञ्जुलकञ्जा[5] ॥१॥

राधामित्यादि । नायकयोः परस्परयोगत्वं दर्शयति । मदनाभिरामः मदनादतिसुन्दरः कामप्रिया कन्दर्पप्रेयसी रतिः तस्यां सकाशात् अतिरमणीया शरीर-शोभा यस्याः ताम् । सुबलं तन्नामानं शेषं सुगमम् ॥ ३ ॥

सकलेति । राधिकामेवातिशयोक्त्यन्यलङ्कारयुक्तवचसा वर्णयन्नाह । सकलानामवगाहमानानां सकलं वा तापं हरतीति सकलतापहरः तथाभूते घनरसपुञ्जो जलसमूहो निविडशृङ्गारसमूहो वा यस्याः सा । नटौ नृत्यकरौ यौ खंजनौ तयोर्युगं यत्र तादृशं मञ्जुलकञ्जं सुन्दरपद्मं यस्यां सा चञ्चलनयनयुगयुतवदनेत्यर्थः ।

---

1. ग. घ. संधितयन् ।
2. घ स्माचरितां ।
3. क निन्दात्मजं ।
4. घ पुञ्जम् ।
5. घ. कञ्जम् ।

सरसो काचिददृश्यत रम्या ।
सहचर दुरितवतानधिगम्या ॥ २ ॥
॥ ध्रुवपदमिदम् ॥

विकशित[1]बन्धुकबन्धुरभासा ।
सहजसुचिद्विजराजविलासा ॥ ३ ॥

सुरुचिरकोकमिथुनघनसङ्गा ।
श्वसनलघिमचलमृदुलतरङ्गा ॥ ४ ॥

कोकनदोदितमधुकरपाली ।
क्वचन सुकुञ्चितशैवलकाली ॥ ५ ॥

सरसी सरसीतुल्या नायिका काचिद्दर्शनीयेत्यर्थः । अदृश्यतदृष्टा मयेति शेषः । सहचर हे सुबल ! दुरितवता पापवता पुरुषेणानधिगम्याऽप्राप्या इदं पक्षद्वयेऽपि तुल्यम् ॥ १-२ ॥

विकशितेति । विकशितं बन्धुकं बन्धुककुसुमं तेन सुन्दरा बन्धुराभासो यस्या सा प्रफुल्लरक्ताधरशोभितेत्यर्थः ॥ ३ ॥

सुरुचिरेति । सुरुचिरं सुन्दरतरं यत् कोकमिथुनं तस्य घनसङ्गो मिथुनः यस्यां सा निविड़कुचयुगयुक्तेत्यर्थः । श्वसनस्य लघिम्ना स्वल्पतया चलाश्चञ्चलाः मृदुलाः कोमलास्तरङ्गा यस्यां सा मृदुश्वासजाता त्रिवलिकेत्यर्थः ॥ ४ ॥

कोकनदेति । कोकनदाद्रक्तपद्मादुदिता उद्गता मधुकरपाली भ्रमरश्रेणी

---

1. घ. विलसित ।

सुललितपूतपुलिनकमनीया ।
अमलिनशोणनलिनरमणीया ॥ ६ ॥
अतिशयतृषितलसित[1]विषदखण्डा ।
जलजदलालि[2]चापेनसुखण्डा ॥ ७ ॥
इति हरिणोदितममलसमासम् ।
शृणुत रघूत्तमभणितविलासम् ॥ ८ ॥

यस्यां सा युक्ताभिसम्बन्धश्यामलोमलतेत्यर्थः । कवन कस्मिन्नपि प्रवेशो सुकुञ्चिता मुकुलिता शैवालकाली श्यामन्दरकुटिलकृष्णकेशोत्यर्थः ॥ ५ ॥

सुललितेति । सुललितं सुन्दरं पूतं पवित्रं पुलिनं जलोत्थितः स्थलविशेषः तेन कमनोया अतिसुन्दरानन्दस्फुरज्जघनरमणीयेत्यर्थः । अमलिनानि शोणानि रक्तानि यानि नलिनानि पद्मानि तै रमणीया सुन्दरी प्रफुल्लरक्तहस्त-पादेत्यर्थः ॥ ६ ॥

अतिशयेति । अतिशयतृषितैर्जनैर्लक्षितो वाञ्छितो विषदखण्डो मृणाल-खण्डो यस्यां सा अतिशयकामुकः मादृशजनवांछितस्पर्शकवाहुलतेत्यर्थः । जलजदलालिः पद्मदलश्रेणी तद्गता लग्ना फेनानां सुन्दरखण्डां यस्यां सा करपादाङ्गुलिश्रेणी-मिलितसुन्दरनखरश्रेणीत्यर्थः ॥ ७ ॥

इतोति । इतोत्थं हरिणा उदितं कोर्त्तितं अमलसमासं निर्दोषसमास-युक्तं शृणुत हे भक्तिरसिकेति शेषः । भणितविलासं कवितावित्नासं विलसित-काव्यमित्यर्थः ॥ ८ ॥

1. क. लषित ।
2. क. जलदजलालीगफेन ।

अलं सखे ते व्यपदेशभङ्ग्या
मनो हृतं ब्रूहि कथा कृशाङ्ग्या ।
इत्थं स पृष्टः सुवलेन विष्णुः[1]
स्फुटं तमूचे सरसीभविष्णुः ॥ ४ ॥

षोडशः प्रबन्धः

॥ मालवगौडारागेण गीयते ॥

मूर्त्तिमती जगतीमनुविचरति तड़िदिव[2] जलदविहीना ।
कमला कमलवनादुदिता किमु खेलति जगदनधीना[3] ॥१॥

अलमिति । इति गीतं श्रुत्वा सुवलः सहासमाह । ते तव व्यपदेशभङ्गाद् व्याजोक्तिभङ्गादुपमेयभङ्ग्या विना उपमानानि पात्रभत्रा पतङ्गा इत्यर्थः । सरसी भविष्णुः पानैः सरसीभवन्नित्यर्थः । शेषं स्फुटम् ॥ ४ ॥

मूर्त्तीत्यादि । सा गोपकिशोरी काचनाविहिततुलनामा मम श्रीकृष्णस्य मानसचोरीत्यन्वयः । सा कीदृशी भवतीं भूमिं अनुभूत्यामित्यर्थः । विचरतीति जलदविहीना मूर्त्तिमती सशरीरा तड़िदिव । इत्थमद्भुतोपमा उत्प्रेक्षते । कमला

---

1. क. ख. जिष्णुः ।
घ. किमुवलेन विष्णुः ।

2 ख. तदवज ।

3. क. ख. जगदधीना ।

स मम मानसचोरो ।
योगी हृदयमपि सपदि विमोषति[1] काचन गोपकिशोरी ॥२॥
॥ ध्रुवपदमिदम् ॥

यामुनतीरविपिनमधिचञ्चति कुसुमचयं रचयन्ती ।
क्वचिदलिमिथुनविलासविलोकन[2] कुतुकवशाद्जनयन्ती ॥३॥
मुखकमलोपरि पतदलिसंभ्रममनुविमुखी विचलन्ती ।
चञ्चलकुण्डलचपलविलोचन[3] चलदलकाविलसन्ती ॥४॥

कमलवनात् सुवासभूतपद्मवनात् उदिता उद्गता पृथग्भूता किमु इव खेलति क्रीडति। जगदनधीना स्वतन्त्रा योगीनां सिद्धादीनां हृदयं मनः अपि इतरेतरेषां मादृशां नाथेति भावः विमोषति चोरयति ॥ १-२ ॥

यामुनेति। सा पुनः कीदृशी । यमुनाविपिनमधि तन्मध्य इत्यर्थः । चञ्चति कुसुमावचयं पुष्पावचयं रचयन्ती कुर्वती । पुनः कीदृशी क्वचिदपि प्रदेशे अलिमिथुनस्य स्त्रीपुंसरूपभ्रमरयुगलस्य विलासः केलिः तस्य विलोकनं दर्शनं तस्मिन् कुतुकं ईच्छाविशेषः तद्वशात्तद्धेतोः जनयन्ती स्थितेत्यर्थः ॥ ३ ॥

मुखेति। मुखकमलोपरि पतितोऽले भ्रमरात् यः संभ्रमः भयं तमनु तं लक्षीकृत्य तस्मादित्यर्थः। विमुखी इतरदिक्वलितमुखी सती विचलन्ती गच्छन्ती ।

---

1. घ. योजनमपि हृदय दिमोपति ।
2. क. ख. विलोचन ।
3. ग. विलोकन ।

श्रवणसुखदरुतमणिनूपुरयुतपदकमलं क्रमयन्ती[1] ।
कङ्कणकलकलितं करनालककोकनदं भ्रमयन्ती ॥५॥
सुन्दरतनुशुचि[2] वसनभिदुररुचि कुङ्कुमरञ्जितहारा ।
लसदरुणाधरमधुरतरस्मितपरिहसितामृतधारा ॥६॥

पुनः कीदृशी सती विवलन्ती कुण्डलान्तलोचनान्त अलकान्तपदा कर्मधारयः अतएव विलसन्ती शोभमाना ॥ ४ ॥

श्रवणेति । पुनः कीदृशी सातिविलसन्ति श्रवणसुखदानि रुतानि तादृशौ मणियुक्तौ यौ नूपुरौ ताभ्यां युते पदकमले क्रमयन्ती विक्षिपन्ति । पुनः कीदृशी पुनरपि मुखपद्मे भ्रमरपतनशङ्कया कोकनदं रक्तलोलारविन्दं भ्रमयन्ति । कीदृशं यथा स्यात् तथा कङ्कणकलकलितं वलयकलकलयुक्तं करनालकेति करे नालं वृत्तं यस्य तत्तत्करनालकं तच्च तत् कोकनदं चेति कर्मधारयः ॥ ५ ॥

सुन्दरेति । पुनः कीदृशी सुन्दरं तनुः शुचिः शुक्लं यद्वसनं तद्भिन्नेन तद्भेदेन शीला रुचिः कान्तिर्यस्य तादृशः कुङ्कुमरञ्जितः वक्षःस्थलं कुङ्कुमद्रवमण्डितः हारो मुण्डमाला यस्याः । सा पुनः कीदृशी लसति अरुणाधरे मधुरतरं मनोहरतरं यस्मिन् किंचिदु वसनं तेन परिहसिता निकृष्टा कृपणामृतधारा यथा सा अनेनामृतापेक्षयापीत्यधिकलोभस्तदधरे मधुरतरस्मितस्य मनोहरस्य कारणं विशेषयति ॥ ६ ॥

---

1. घ. क्रमयन्ती ।
2. ख. ग. रुचि

कुटिलांगुलियुगलेन तु दृगवधिनीतशिरोवसनान्ता ।
मामवलोक्य तरलनयनाञ्चलमचलदपरनिशिकान्ता[1] ॥७॥

इति वृषभानुसुतावशमाधवभाषितमतिरमणीयम् ।
अनघरघूत्तमभणितमनूत्तममतिरसिकैः रसनीयम् ॥८॥

सखे त्वया या रमणीशिरोमणि
सुवर्णवर्णा सुमुखी सुवर्णिता ।
मन्यामहे सा वृषभानुकन्यका
न काचिदन्या तव चित्तचोरिका ॥५॥

कुटिलेति । कुटिलांगुलियुगलेन वामकरस्य कुञ्चिताभ्यां तर्जन्यंगुष्ठाभ्यां दृगवधि वामलोचनान्तं नीत आकृष्टः शिरोवसनान्तो यया सा एवम्भूता सती तरलनयनाञ्चलं यथा स्यात् तथा मामवलोक्य अपरदिशि मद्विमुखदिशि अवजत् गतवती । अतएव कान्ता कमनीया मनोहरेत्यर्थः ॥ ७ ॥

इतीति । अतः परं कविवचनम् । वृषभानुसुता राधा तस्यां वशः इच्छाविशेषो यस्य स तद्वशः तदधीनो वा यो माधवः श्रीकृष्णस्तेन भाषितं कीर्तितं अतिरमणीयं अतिमनोहरं अनघं पापनाशकं च तत् रघूत्तमेन कविना रघूत्तमस्य कवेर्वा भणितं कवित्वं अनूत्तममत्या तमतिरसिकैरत्यन्तभक्तै रसविद्भिः रसनीयं आस्वाद्यनीयं सुचिन्त्यमित्यर्थः ॥ ८ ॥

सखे इति । श्रीकृष्णात्पीतवचनात् श्रुत्वा तव काचनेत्यनेन अज्ञातनामादिकान्ता इति यदुक्तं सुबलस्तदुपपादयति । सुवर्णिता सुन्दरं यथा भवति तथा

---

1. क. ख. दिशिकान्ता ।

आराध्यतेऽसौ हरिणा गुणाब्धिना
गुणाधिकाराध्यति वा जनार्दनम्।
राध्नोति[1] वा सर्वं जगन्मनोरथं
राधाभिधाभूद्वृषभानुजा ततः ॥६॥

वेदान्तिभिर्या नु चिदित्युदीर्यते
या शाक्तकैः शक्तिरिति प्रकीर्त्यते।
सरस्वती हैमवती हरिप्रिया
राधाभिधा सा वृषभानुनन्दिनी[2] ॥७॥

वर्णिता सा वृषभानुकन्यकेति मन्यामहे मन्येत्यर्थः। अन्या तद्भिन्ना काचिदपि रमणी तव विदग्धशिरोमणेः चित्तस्य चोरिका स्तेयकरी। चौरो यथा केनाप्युपायेन गृहस्थस्य विज्ञातमेव वस्तुजातं अपहरति तद्वदियमपि यत्नेन रक्षितं तव मनोऽपहृत मितिभावः ॥ ५ ॥

आराध्यते इति। अनुष्य कन्यात्वेन व्युत्पादितेन सा परिचीयतेइति आराध्यते सेव्यते हरिणा श्रीकृष्णत्वेन त्वया गुणरत्नाकरेण। पक्षान्तरमाह गुणाधिकाऽतिशयगुणवतो आराध्यते सेवते वा इति जनार्दनं त्वाम्। पक्षान्तरमाह राध्नेति राधयति जनयति सर्वजगतां सर्वजीवानां मनोरथं वांछितं ततः व्युत्पत्तितया वृषभानुजा वृषभानुकन्या राधाभिधा राधानाम्नी अभूत् बभूव। हरिणा आराध्यत इति वर्त्तमानत्वात् निषेध ॥ ६ ।

वेदान्तिभिरित्यादि। तस्याः स्वरूपमाह। चित्तं चैतन्यज्ञानमित्यर्थः।

---

1. क ख. आराध्यति।
2. ख, ग, वृषभानु नन्दनी।

सैषा विवेकान्धजगद्विमोहिनी
भजज्जनानन्दकदम्बदोहिनी ।
स्वमूर्त्तिभेदैरमदैरविस्मिता
विक्रीडति प्राणिहिता शुचिस्मिता ॥८॥

चिती संज्ञान इत्यस्य क्विपि रूपं चित् इति । सम्यक् ज्ञानं च श्रुत्वा बोध्यते उदीर्यते । वर्त्तते शास्त्रे शब्दोपासन विशेषानाह । सरस्वती ब्रह्मभार्या, हैमवती गिरिकन्या, हरिप्रिया लक्ष्मी, सा सैव वृषभानुनन्दिनी नान्येत्यर्थ ॥ ७ ॥

सैषेति । ननु एवं महिमा चेत् इमां कथमेनां सर्वे न जानन्तीत्याशङ्क्याह । सा एषा ब्रह्मस्वरूपा विवेक भविष्यते च तदसौ विवेकशास्त्रबोध्यं परमेश्वरं पश्यन्तं तत्रावज्ञानशून्यं यज्जगत् संसारीमनुष्यवृन्दं तस्य तद् विमोहिनी तद्भ्रान्तिजनिका इयं गोपी काचित् स्त्री कृष्णभिन्ना इत्यादिरूपा स्वविषयकभ्रान्तिजनकेत्यर्थः । स्वमूर्त्तिभेदैः स्वदेहान्तरैः सखीभिः अमदै गर्वरहितैः देहाभिमानशून्यैरित्यर्थः । जीवोपाधिषु देहेष्वेव तथा सम्भवाविस्मिता वृषभानुसुतारूपदेहेऽप्यभिमानरहिता एतादृश तनुसमूहधारणप्रयोजनमाह प्राणीहितेति । प्राणिनां जीवानां हिताहितकर्त्रीत्यर्थः ।

वन्दे नन्दव्रजस्त्रीणां पादरेणुमभिक्ष्णशः ।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥

इति श्रीभागवतपरमोपास्यने श्रीमद् उद्धववचनप्रतिपादितत्वात् । शुचिस्मितेति परमेश्वरावतारलक्षणैककथनं राधादिगोपीनां कृष्णवत् परमेश्वरत्वे मत्स्यपुराणबृहद्गौतमीयतन्त्रशक्तियामलाद्यागमगोपालतपिनीयश्रुतिप्रमृतिषु शास्त्रेषु प्रमाणमनुसन्धेयम् । ग्रन्थबाहुल्यभयादत्र न लिखितम् ॥ ८ ॥

आश्चर्य्यसौन्दर्य्यजुषः सुयोषिताः
परस्परप्रेमरसेन तोषिताः ।
सख्यस्तु तस्या नहि भेदमन्विता
विभ्राजते सा बहुमूर्त्तिसंश्रिता ॥९॥

मित्रेण चित्रं चरितं[1] वचः प्रियं
निशम्य तासां परिचिन्त्य तां श्रियम्[2] ।
करं करेण स्पृशता धृतारिणा
सखायमूचे मधुरं मुरारिणा ॥१०॥

आश्चर्य्येति । सखिभिः सह राधायाः भेदो नास्तीति पुनरपि स्फुटमाह । योषितां तस्या राधायाः नहि नह्येव भेदमन्विता अभेदत्वं प्राप्ताः भेदाभावे हेतुमाह । सा ब्रह्ममूर्त्ति संश्रितेति । सा राधिकैकब्रह्ममूर्त्तिसंश्रिता सखीगणरूपदेह-वृन्दधारिणीत्यर्थः ॥ ९ ॥

मित्रेणेति । मित्रेण सुबलेन सख्या चरितं कृतं श्रियं सौन्दर्य्यम् । धृतारिणेति । धृतमरिं सुदर्शनं येन स तथा तेन यद्वा धृतमत्रस्थितं चक्रमतिचक्रं ब्रह्मरूपं वा येन स तेन मुरारिणा करेण ॥ १० ॥

---

1 क. ख. चरतं ।
घ. रचितं ।
2. घ. प्रियं ।

सप्तदशः प्रबन्धः

॥ मायूररागेण[1] गीयते ॥

प्रियसख[2] कथय कथय सदुपायम् ।
क्षणमपि नहि विस्मरति मनो मम तं रमणीसमुदायम् ।
॥ ध्रुवपदमिदम् ॥१॥

गिरिजायजनकृते यमुनावनकुसुमचयं विदधानम् ।
विधुवरवदनसुधानिकराधिकमृदुमृदुहरिहरगानम्[3] ॥२॥

तासां नयनगते मयि यदजनि किमपि किमपि सुचरित्रम् ।
सन्ततमपि मम चेतसि चिन्तितमुदयति तदतिविचित्रम् ॥३॥

प्रियसखेति । किमुच्यते तदाह कथय कथयेत्यादरेण वीप्सा विस्मये वा सदुपायं सुखोपायं दुःखनिवृत्तेरितिशेषः । क्षणमपि कदापि तं रमणीसमुदायं त्वया वर्णितं सुन्दरीसमूहं मनः विस्मरति ॥ १ ॥

गिरिजेति । यजनकृते पूजनाय यमुनावनात् कुसुमचयमुत्तोलनं विदधानं कुर्वाणं विधोः वरमुत्कृष्टं यद्वदनं तस्मिन् सुधानिकराधिकं अमृतसमूहादप्यधिकं मृदु मृदु स्वल्पं स्वल्पं हरिहरगानं जय जय हरिहरशङ्करामेत्यादिरूपं नारदोपदिष्टं गीतं यस्य स तथा तम् ॥ २ ॥

तासामिति । रमणीनां समुदायस्य चरित्रं संक्षेपेणोक्त्वा प्रत्येकं

---

1. ख. ग. पीठमञ्जर्यां वसन्तेन वा ।
घ. नटरागेण ।

2. घ. प्रियसखि ।

3. क. ख. हरिगानम् ।

कुसुमनिनीषुरुपरि करमतनुत कापि विदितकुचमूला ।
कापि पराञ्च्य मुखं समालोकति[1] कण्टकविधितदुकूला[2] ॥४॥
काचिदरोचत मुखनलिनान्तिकपतदलिन[3] द्रवयन्ती ।
अञ्चलचालनझङ्कृतिकङ्कणकरकमलं भ्रमयन्ती ॥५॥

तद्वक्तुमारभते । नयनगते लोचनविषयीभूते दृष्टे सतीत्यर्थः । भनति जातं किमपि किमपीति विस्मये वीप्सा किमपि विशेषणं वक्तुमशक्यमित्यर्थः । सुचरित्रं सुन्दरचरित्रं सततमपि निरन्तरमपि चेतसि मनसि चिन्तितं भावितं उदयति प्रकाशते तत् पूर्वानुभूतं अतिविचित्रमाश्चर्यमित्यर्थः ॥ ३ ॥

कुसुमेति । कस्याश्चिच्चरितमाह । कुसुमं पुष्पं निनीषु जिघृक्षु उपरि ऊर्ध्वप्रदेशे वृक्षशाखायामित्यर्थः । करं भुजं अतनुत प्रसारितवती कापि गोपी विदितं दृष्टं कुचमूलं यस्याः सा तथा अन्यथा तासां चरितमाह । मुखं पराञ्च्य परावर्त्य समालोकति सम्यक् सुन्दरमालोकति दृष्टवती मामिति शेषः । कण्टकेन विधितं विद्धं दुकूलं सूक्ष्मवस्त्रं यस्या सा तथा ॥ ४ ॥

काचिदिति । अन्यस्याश्चरितमाह । काचिन्नायिका अरोचत अशोभत । कथंभूता सती मुखनलिनान्तिके पतन्तं अलिनं भ्रमरं द्रवयन्ति दूरीकृतवती केन व्यापारेणाह । अञ्चलचालने झंकृतं कङ्कणं यत्र तादृशं करकमलं भ्रमयन्ती घूर्णयन्ती ॥ ५ ॥

---

1. क. घ. समलोकित ।
2. क. घ. विधृतदुकूला ।
3. ख. मुखनलिनान्तिकापितदलिनं ।

जलजमचुम्बदसितरुचि[1] काचन[2] मयि नयनं तु नयन्ती ।
काचन हारमलोकयदाकुलमुरसि पटं[3] घटयन्ती ॥६॥
सहचरिकोरसि काचिदलीयत मधुकरझंकृतिभीता ।
न्यविशत कापि निकुञ्जगृहं प्रति रहसि कयाचन नीता ॥७॥

जलजमिति । इत्यन्यस्याश्चरितमाह । जलजं पद्ममचुम्बत् चुम्बितवती ।
कीदृशं असितरुचि नीलमित्यर्थः । कीदृशी सती मयि मय्येव नयनं नयन्ती प्रेरयन्ती ।
एतेन नीलपद्मसदृशं भवन्मुखं त्वया चुम्बितमिति मां प्रतिव्यञ्जितम् । अन्यस्याश्चरितमाह । काचनेति । काचिदित्यर्थः हारमलोकयत अदर्शयत् मामिति शेषः । केन व्यापारेण तमाह । पुष्पोत्तोलनव्यापारच्छलेन स्खलितं पटं वस्त्रं घटयन्ती अर्पयन्ती ॥ ६ ॥

सहचरीति । अन्यस्याश्चरितमाह । सहचरिका सखी तस्याः उरसि वक्षसि अलीयत श्लिष्टा बभूव । एतेन एवमेवं स्थले कान्ताभावात् विहारो नास्तीति कान्तानुकरणकान्तवत्या सख्या किम्भूता मधुकराणां झंकृतिभिः झङ्कारशब्दैर्भीता त्रस्ता अनेनैव भयत्राता कान्तो मम नास्तीति सखीमेव शरणं वृणोमि इति । अन्यस्याश्चरितमाह । न्यविशत इति । न्यविशत प्रविष्टा बभूव रहसि एकान्ते कयाचन सख्या कान्तवत् परिहसन्त्या नीता आकृष्टा एतेन एवमेवं स्थले कान्ताभावात् विहारो नास्तीति कान्तानुकरणं कारितवत्या सख्या त्वं मम कान्तो भवेति मां प्रति व्यञ्जितम् ॥ ७ ॥

---

1. क. जलजचुम्बदसितरुचि ।
   ख ग. जलजमचुम्बसितरुचि ।
2. ख ग काञ्चन ।
3. घ. घटं ।

इति नवयौवनबहुविधविलसितरसिकरमापतिगीतम् ।
अलघुरघूत्तमभणितममृतमिव सततं कुरुत निपीतम् ॥८॥

यदीदृगीदृक् चरितं नतभ्रुवां
प्रियः प्रियस्यैव समीपसम्भवम् ।
तदा तदाप्त्यै[1] किमुपाय चिन्तया
त्वयि त्वयि प्राप्तवतीरवेहि ताः ॥११॥

इतीति । चरितानां बाहुल्यवर्णने ग्रन्थगौरवभीत्या संक्षिप्याह । इति ईदृशं प्रकारैर्नवयौवनस्य नूतनयुवतिसमूहस्य बहुविधानि नानाप्रकाराणि विलसितानि व्यापारास्तेषु रसिकाः तद्रसवेत्ता यो रमापतिः श्रीकृष्णस्तेन गीतं कथितं अलघु महत् उत्कृष्टमित्यर्थः रघूत्तमेन कविना वर्णितं भणितं अमृतमिव परमोत्कृष्टं माधुर्य्यकं सततं सदा निपीतं कुरुत हे भक्तिरसिका इति शेषः ॥८॥

यदित्यादि । श्रीकृष्णगीतं श्रुत्वा सुबलः सश्वासमुत्तरमाह । यदि यदा इत्यत्र ईदृक् सदृशं चरितं चरित्रं नतभ्रुवां कुटिलभ्रुवां गोपकुमारीणां हे प्रिय हे सखे प्रिय सैव कान्ता सैव समीपे निकटे सम्भवतीति नान्यत्रेति तथा तत् तदा तस्मात् तासां त्वद्विषये प्रेमानुरागनिर्णयादित्यर्थः । तदाप्त्यै तासां प्राप्तये किमुपाय-चिन्तयालमित्यर्थः । त्वया यदुक्तं प्रियसखं कथय कथय सदुपायमिति तच्चिन्त्यं मा कुर्वित्यर्थः । त्वयि तु त्वय्येव अयि भो सखे वः प्राप्तवतीः जातानुरागाः अवेहि यद्वा प्राप्तरतीः प्राप्तशृङ्गारा इत्यर्थः ॥ ११ ॥

---

1. क ख. तदाप्त्यै ।

सखे सखेदं[1] हृदयं तु मा कृथा
न तेन ते किंचिदवेक्ष्यते फलम् ।
चलाचलाक्ष्यस्तव ता[2] यदाप्तये
महे महेशाम्बिकयो सदा रताः ॥१२॥

शिवौ शिवौ ये मनसाप्युपासते
न तेन ते[3] यान्ति सदा कृतार्थताम्[4] ।
महामहानां सुदृशां तयोः कथं
मनो मनोराज्यफलं न लप्स्यते ॥१३॥

सखे इति । तासामेव प्राप्त्युपायप्रगतिः महतीत्याह । सखेदं दैन्यसहितं हृदयं मनः मा कृथाः मा कुरु तेन ते तव किञ्चिदपि फलं नावेक्ष्यत इत्यन्वयः । तत्र युक्तिमाह । चलाचलाक्ष्य गोपकुमार्यः यत् यस्मात् आप्तये प्राप्तये महे महने पूजायां महेशाम्बिकयोः शिवदुर्गयोः सदा निरन्तरं रताः अभिनिविष्टाः ॥ १२ ॥

शिवाविति । ननु मत् प्राप्त्युद्देशे न शिवभजनमपि तासां यदि सफलं न स्यात् अहमपि च त्वद्वचनात् निश्चिन्तचित्त एव तिष्ठामि । तथा कथं तासां प्राप्ति स्यादित्याशङ्क्य प्रत्याचष्टे । शिवा शिवश्च शिवौ कल्याणकरौ ये जना मनसापि न तु कायवचनाभ्यां उपासन्ते सेवन्ते ते जनाः तेन मनसोपासनेन सदा अवश्यं कृतार्थतां

---

1. घ. सखेलि ।
2. ख. चलाचलाक्ष्ययस्तुवति ।
3. ख सतेन तेन ते ।
4. घ. यान्ति कृताकृतार्थतां ।

वने वने यः सुमनः समुच्चयो
गतागतायासजुषां[2] तडित्त्विषाम् ।
घनाघनाकारतनो त्वयेक्षितः
सता स तासां शिवपूजनार्थकः ॥१४॥

वरं वरं लुब्धमुमेश्वरौ रहः
सभां सभां प्राप्य यजन्ति ताः[3] सदा ।

यान्ति यान्त्येवेत्यर्थः । तयोः शिवयोः विषयो महामहानां कायिकवाचिकमानसिकपूजा युक्तानां सुदृशां गोपानां सुधियां सर्वेषां वा मनकर्त्तुः मनोराज्यस्य मनोरथस्य फलं तत्र प्राप्तिरूपं कथं न कल्प्स्यते अपितु प्राप्स्यत्येवेत्यर्थः ॥ १३ ॥

वन इति । ननु शिवपूजनरतानां तासां तत्चिह्नं विज्ञापयति वने वने प्रतिवनं सुमनसां पुष्पाणां समुच्चयः समुत्तोलनं कथंभूतानां गतागतायासजुषां गमनागमनश्रमयुक्तानां पुनः कीदृशानां तडित्त्विषां विद्युदुपमकान्तिनां हे घनाघनकारतनो सजलजलदाकार शरीर एतेन तासां तव योग्यः सङ्गः भविष्यतीति सूचितम् । त्वया ईक्षितो दृष्टः कुसुमचयं विदधानमिह प्रोक्तत्वात् कथंभूतेन सता प्रशस्तेन पण्डितेन वा तथा त्वय्येकानुमितुं शक्यमिति भावः । स कुसुमावचयस्तासां गोपीनां शिवपूजार्थकः शिवयोर्यत् पूजनं तदर्थकः तदुद्देशक इत्यर्थः ॥ १३ ॥

वरमिति । मदुवचने यदि न तेन ते विश्वासस्तदा तासां तत्कर्म प्रत्यक्षं दर्शयामीत्यभिप्रायेणाह । वरं श्रेष्ठं वरं पतिं त्वामेवेत्यर्थः । लब्धुं प्राप्तुरहो

---

1. घ. सः
2. ग. गतायास्तुजुषां ।
3. क ख. जयन्ति ताः ।

तदेतदेवं तु रहस्यमीक्षितुं
सखे सखेलं चल यामुनं वनम् ॥१५॥

इति श्रीमुकुन्दविलासे महाकाव्ये यतीन्द्ररघूत्तमतीर्थपादकृतौ
गोविन्दपूर्वानुरागो नाम पञ्चमः सर्गः ।

निर्जने सभां दीप्तिमतीं सभां समाजं प्राप्य कृत्वा यजन्ति पूजयन्ति । सदा प्रत्यहं तत्पूजनमेवमीदृशं एतदुक्तं रहस्यं गोप्यं रहसि भवं वा ईक्षितुं द्रष्टुं हे सखे सखेलं यथा स्यात् तथा चल गच्छ यामुनं यमुनातीरभवनमित्यर्थः ॥ १५ ॥

इति श्रीमुकुन्दविलासप्रकाशिकायां पञ्चमःसर्गः ।

★

---

4. ख ग मुकुन्दानुरागप्रकटनो ।

षष्ठः सर्गः

सुहृद्वचो[1] विलक्षणं विबुध्य[2] साधुलक्षणम् ।
मृगीदृशां रसादरं[3] हरिश्चचार सादरम्[4] ॥ १ ॥

स धर्मराजसोदरां प्रफुल्लसारसोदराम् ।
प्रफुल्लरोधसं गतः प्रियेण तेन[5] सङ्गतः ॥ २ ॥

सुहृद्वच इत्यादि । तदेवं द्वितीयादिपञ्चमान्तैश्चतुर्भिः सर्गैः गोपीकृष्णानां परस्परपूर्वानुरागवर्णनं विधाय अर्द्धसम्भोगवर्णनप्रायं षष्ठसर्गमारभते । सुहृदः सख्युर्वचः वाक्यं विलक्षणमुत्कृष्टं साधुलक्षणं उत्तमार्थप्रतिपादकं मृगीदृशां विषये रसात् रागात् चचार जगाम गोपीनां स्थानमितिशेषः । सादरं सगौरवमिति क्रियाविशेषणम् ॥ १ ॥

स धर्मराजेति । स श्रीकृष्णः यमुनासमीपमित्यर्थः । तां किंभूतां प्रफुल्लानि सारसानि पद्मानि उदरे मध्ये यस्याः सा तथा ताम् । पुनः किंभूतां प्रसन्नरोधसं सुन्दरतीरामित्यर्थः । २ ॥

---

1. घ. प्रमाणिकावृत्तम् ।
2. ख. ग बुध्य ।
3. घ. सरसादरं ।
4. क हरिस्चकारसादरं ।
   घ. हरिस्चचार सादरं ।
5. ख ग. प्रसन्नरोधसं तत् सखिव्रजेन ।

प्रतीररक्षितताम्बराः स तत्र योषितांवराः ।
जलेषु मग्नकण्ठकाः समैक्षतोपकण्ठकाः[1] ॥ ३ ॥
शिवाद्रिजासभाजनं सचित्रपुष्पभाजनम् ।
कदम्बमूलभूषितं ददर्श दीपभूषितम् ॥ ४ ॥
विमृष्टभूषणाम्बरः स लोकरक्षिताम्बरः ।
समारुरोह भूरुहं कुमारकेलिभूरुहम् ॥ ५ ॥
वने वने विहारिणं हठात्पटापहारिणम्[2] ।
कदम्बभूरुहासिनं मनोज्ञमन्दहासिनम् ॥ ६ ॥

प्रतीरेत्यादि । प्रतीरे तटे रक्षितानि स्थापितानि अम्बराणि वस्त्राणि याभिस्ताः स श्रीकृष्णः तत्र यमुनायाः योषिताम्बराः उत्तमास्त्रो श्रेष्ठायोषितामिति शेषः । विवक्षायां षष्ठी । मग्नाः कण्ठाः यासां ताः मग्नकण्ठकाः जलेष्विति वाह्यान्वयः । समैक्षत् दृष्टवान् उपकण्ठका समीपवर्त्तिनीत्यर्थः ॥ ३ ॥

शिवेत्यादि । शिवाद्रिजयोः सभाजनं पूजनं येन ते तत् शिवाद्रिजा-सभाजनं चित्राणि यानि पुष्पाणि तैः सहितं सचित्रं पुष्पं यत् तद्भाजनं पात्रं चेति तथा तत् । पुनः कीदृशं भाजनं कदम्बमूलभूवि भूषितं स्थितं दीपैः भूषितं शोभितम् ॥ ४ ॥

विमृष्टेति । विमृष्टानि चोरितानि भूषणानि लोकपालानां वरः श्रेष्ठः स भजनीया वा एतेनैवादृशस्य पट्टापहरणं लीलेवेति दर्शितम् । भूरुहं कदम्बवृक्षं कुमाराणां गोपबालानां केलिभूवि रूढं जातम् ॥ ५ ॥

वने इति । वृन्दावनगतद्वादशसु वनेष्वित्यर्थः । हठात् अकस्मात

---

1. घ. समैक्षितोपकण्ठका ।
2. घ. भग्नपटापहारिणं ।

हरिं चमूरुलोचनाः सहासरोषलोचनाः ।
जले स्तनादिगोपिकाः समूचिरेऽथ गोपिकाः ॥ ७ ॥

अष्टादशः प्रबन्धः

॥ भैरवरागेण गीयते ॥

देहि पटं नट नन्दकिशोर ।
याहि न हस रसिकाम्बरचोर ।
॥ ध्रुवपदमिदम् ॥ १ ॥

पट्टापहारिणं कदम्बभूरुहासिनं कदम्बवृक्षं कदम्बोपविष्टमित्यर्थः मनोहरस्मितमित्यर्थः । हरिं समूचिरे इति द्वितीयेनान्वयः ॥ ६ ॥

हरिमिति । चमूरुलोचनाः मृगाक्ष्यः गोप्यः सहासरोषं स्मितक्रोधाभिव्यञ्जकं लोचनदर्शनं नयनक्रिया यासां ताः जले आकण्ठनीरे समूचिरे सम्यक् बभाषिरे इत्यर्थः ॥ ७ ॥

देहीत्यादि । नट हे नर्त्तक एतेन नर्त्तनेनैव सभामनुरंजनप्रसादवस्त्रं नटो गृह्णाति । न बलात्कारेण । नटस्यापि तदेव वस्त्रापहरणमनुचितमिति परिहासो ध्वनितः । याहि अन्यत्र गच्छ । न हस न परिहस । हे रसिक विदग्ध हे अम्बरचोर अनेन विदग्धस्य चौर्यमिति व्यंजितम् । अथच हे वर चोर वरो रमणीयपतिश्चासौ चौरो वसनहारश्चेति स तथा । हे तादृशां रसिकां अपगच्छन् हासपरिहासवेत्तौ मादृशीं हासपरि_ा_ं परिहासं कुरु इदमस्माकमिष्टमेवेतिभावः ॥ १ ॥

चिरमधिरुह्य तु केलिकदम्बम् ।
कथमुपहससि वधूनिकुरम्बम् ॥ २ ॥
व्रजपतितां[1] तव माधव जाने ।
न हर विभूषणधनपरिधाने ॥ ३ ॥
रचयसि किं नु समयमतिजातम् ।
न कुरु सतिपतिभजनविघातम् ॥ ४ ॥

चिरमिति । चिरं बहुक्षणमधिरुह्य आरुह्य केलिकदम्बं क्रीडार्थं कदम्बवृक्षं कथं केन हेतुना तव स्वामीत्वाभावात् स्त्रीष्वस्मासु परिहासाधिकार इत्यर्थः । वधू निकुरम्बं स्वस्त्रीणामस्माकं समूहं अथव केलिकदम्बं क्रीडासमूहं अधिरुह्य अवलम्ब्य कथं केन प्रकारेण स्त्रीवृन्दं परिहससीति वयं न जानीमः अप्रत्यक्षत्वात् तदस्माकं प्रत्यक्षीकुर्वीत्यर्थः ॥ २ ॥

व्रजेति । व्रजस्य गोकुलस्य पतिः पालयिता व्रजपतिः तस्य भावो व्रजपतिः तस्य भावो व्रजपतिता तां तव नन्दनन्दनस्य जाने जानामि । हे माधव लक्ष्मीपते ! अतो विभूषणरूपधनं परिधानं च न हर नहि पालकस्य चौर्यमिति भावः । अथव हे धव हे स्वामिन् मा मां आत्मानं तव सम्बन्धीनं जाने स्वीकरोमीत्यर्थः । त्वं व्रज गच्छ स्वीकुरु इत्यर्थः । अतो न हरेति तुल्यम् ॥ ३ ॥

रचयसीति । नु भोः किं किमर्थं नुदि तर्के वा । उचितसमयं पूजासमयं प्रतिघातं अतीतम् । सतीपतेः श्रीरुद्रस्य भजनविघातं अर्चनप्रतिबन्धं न कुरु । वसनं देहि अन्यत्र याहीत्यर्थः ॥ ४ ॥

---

1. ख. व्रजपतिनां ।

अतिरसमज्जनकृततनुकम्पम् ।
वीक्ष्य कथं तव हृदननुकम्पम् ॥ ५ ॥

इह[1] कति गोपसुता न रमन्ते ।
भूषणवसनहरा[2] वद किं ते ॥ ६ ॥

राजति जगति विषमशरराजे ।
वसनहरो स बिभेषि समाजे ॥ ७ ॥

अतिरसेति । अननुकम्पं निर्दयं तव जनकस्य निर्दयं हसनमनुचितमिति भावः । अथवा अतिरसे अत्यनुरागे मज्जनमावेशः तेन कृतं तनुकम्पं वीक्ष्यावलोक्य कथं मनो निर्दयमिति भावः ॥ ५ ॥

इहेति । यदु यमुनातीरे कति असंख्यकाः गोपसुताः न रमन्ते न विहरन्ति विहरन्त्येवेत्यर्थः । किम्भूताः तद्भूषणवसनदशः किमिति त्वमेव वदेत्यर्थः । ते तथा न, त्वमेव एव तथेति भावः । एतेन वल्लीनां मुख्यस्य तव चौर्यं अत्यन्तमनुचितमिति परिहासो व्यङ्ग्यः । अथवा कति गोपसुताः गोपकुमार्यः मादृश्यः न रमन्ते रमन्ते एवेत्यर्थः । किंभूताः । ते तव भूषणवसनहराङ्किताः इति शेषः । अनेनैताः यदि तव वस्त्रादि हरन्ति तर्हि तासामपि तत् त्वमपि हर न केवलं पत्यास्तव तासां तादृशचेष्टया विना ईदृशचेष्टितं शोभितमितिभावः ॥ ६ ॥

राजतीति । विराजमाने न तु वृद्धादिकुण्ठितशक्तिकत्वेन मलिने विषमशरराजे दुःसहशरप्रयोगिनि राजनि कंसे इत्यर्थः । वसनहरो वस्त्रचोरस्त्वं न न बिभेषि भयं न प्राप्नोषि साक्षेपप्रश्नः । तत्रापि समाजे अस्माकं साक्षादेव

---

1. क. इति ।
2. घ. वसनहता ।

वल्लवयुवतिवचोऽमृतपानम् ।
रसय रघूत्तमविरचितगानम् ॥ ८ ॥

सौहार्दगन्धैः स्मितपुष्पवृन्दै-
र्भ्रूभङ्गिधूपैः सकटाक्षदीपैः ।
वचः सुधापूरनिवेदनीयै-
र्गोपीभिरिष्टो हरिरास तुष्टः ॥ ८ ॥

स्फुरत्पदन्यास[1]विशेषरम्याः
प्रसादमाधुर्यगुणैर्मनोज्ञाः ।
सुकोमलश्लेषरसैर्लसन्तीः
कान्ताः स कान्ता इव वाच उचे ॥ ९ ॥

इत्यर्थः । अनेन तव चौर्यसाक्षिणो वयमेव कंसराजनिकटे तत्तत्कर्म कथयिष्यामः । यथा तव युक्तः दण्डो भविष्यतीति परिहासो व्यङ्ग्यः । अथ विषमशरः कन्दर्पः स एव राजेव राजा वशीकृतसर्वलोकत्वात् अस्मिन् राजनि उद्घोष्यमाने स वसनहरः कामवशात् वसनापहारीत्यर्थः । समाजे स्त्रीसमूहमध्ये न बिभेषि न भयं प्राप्नोसि काममोहित-तत्वादिति भावः ॥ ७ ॥

वल्लवेत्यादि । कविवचनं स्फुटम् ॥ ८ ॥

सौहार्देत्यादि । सौहार्दानि प्रेमाणि तैः पूजितः शेषं स्फुटम् ॥ ८ ॥

स्फुरदित्यादि । सुबन्ततिङन्तानि पदानि तेषां न्यासोऽर्पणं तद्विशेषेण-

---

1. क घ. लसत्पदन्यास ।

ऊनविंशः प्रबन्धः

॥ गुर्जरीरागेण[1] गीयते ॥

राजति कुसुमशरे सति राजनि[1] वृन्दाविपिननिकेते[2] ।
शिरसि वहन्तिास्य नहि शासनमिह ये कथयत के ते ।
हरि, श्रृणुत वचनमनसूयम् ।
प्रतिदिनमेव हा कुसुमं बहुतस्करिका इह यूयम् ॥
॥ ध्रुवपदमिदम् ॥१॥

रम्याः पक्षे पदे वर्णो तुल्यं प्रसादो गुणविशेषः रचनाबोधकत्वरूपः माधुर्यं सौन्दर्यं शेषं स्फुटश्लेषरसैरालिङ्गनरसैः पक्षे अनेकार्थप्रतिपादकैः श्लेषरूपालङ्कार-रसैः लसन्तीः शोभमानाः कान्ता दीप्ताः कान्तिगुणयुक्ता वा । पुनः कान्ता प्रेयसीश्च स श्रीकृष्ण दोषवानुच्चे कीर्तितवान् ॥ १ ॥

राजदि । उक्तश्लेषवचनं दर्शयति । कुसुमशरे मदने शरे अभ्यसिते सति राजनि शासके कथम्भूते वृन्दावनविपिने निकेतो निवासो यस्य तस्मिन् । शिरसि मस्तके धारयन्ति नहि नैव शासनमाज्ञां मिथुनीभावाचरणरूपां ये जना इति शेषः ते के इति अपि तु ब्रह्मादिकीटपर्यन्ताः सर्वे तस्याज्ञां पालयन्तीत्यर्थः । किन्तु सूक्ष्मान् विदः । सुन्दरि ! राधे ! यूयं शृणुत इत्यन्वयः । वचनं वाक्यं अनसूयमसूयारहितं शृणुतेत्यस्य वचनस्य वा विशेषणम् । प्रतिदिनं प्रत्यहमेव

1. क घ. राजति
2. ख. वृन्दावनते ।

रतिपतिनृपतिनिदेशवशेन[1] हि वयमिह न्युवतीनाम् ।
अपि सरसनवसनानि[2] हरेमहि सुमनो हरावतीनां ॥ २ ॥

पटमिच्छथ यदि मदननृपं हृदि कुरुत शरणमविलम्बम् ।
मम वचनेन जलादुपगच्छत तटभुवि केलिकदम्बम् ॥ ३ ॥

हरयापहरथ कुसुमं पुष्पमिह अतो यूयमेव बहुतस्करकार्थः नाहं चौर इति प्रत्युक्तिः ॥ १ ॥

रतीति । आत्मनश्चौरत्वाभावे युक्तिमाह । रतिनिदेशः आज्ञा या युवति श्रीवृन्दावनकुसुममपहरति तस्याः वस्त्राभरणादिग्राह्यादिरूपा तद्वशेन तदधीनतया वयमहं इह वृन्दावनमध्ये इह अधिकारे वा सरस रसना सहितानि वसनानि अपि करेण कञ्चुलिकादिपरिग्रहः हरेमहि आच्छिद्य गृ: ॥ २ ॥

पटमिति । देहि पटमित्यनेन पटप्राप्तीच्छा युष्माकमनादेव ज्ञाता । सा यद्यस्ति तदा मदननृपं हृदि मनसि शरणं अविलम्बमेव कुरुत तस्य मनोभवत्वेन मनस्येव वर्त्तमानत्वात् युक्तं हृदिति । मम कन्दर्पधारिणो वचनेन जलात् जलं परित्यज्य उपगच्छत समीपमायात तटभुवि केलिकदम्बं कदम्बवृक्षं पक्षे केन कदम्बक्रीडावृन्दं उपगच्छत प्राप्नुत । मया समा इहैवेति शेषः ॥ ३ ॥

1. क. ख. ग. निदेशेवशेन ।
2. क. घ. गरसवसनानि ।

यदि नवयौवनमदवशतो ननु[1] कुरुथ वचसि मम हेलाम् ।
दर्पककोपभरे सति यास्यथ विषमदशामतिवेलाम् ॥ ४ ॥

भजनवशीकृतमपि परिपश्यत मनसिजरिपुमसहायम्[2] ।
तं किमु न शृणुथ वैरिभयादल[3]मर्द्धं तनूकृतमायम् ॥ ५ ॥

यदीति । तथापि तास्तथैवस्थिता निरीक्ष्याह । नवयौवने मदोऽभिमानः वयं न युवत्यः इत्याकारकोऽहंकारः तद्वशतस्तद्धेतोः ननु भो नवयुवत्य मम वचसि हेलां अवज्ञां न कुरुथ । दर्पकेत्यादेरेऽन्वयोबोद्धव्यः । दर्पकः कामो राजा तस्य कोपभरे क्रोधातिशये सति यास्यथ प्राप्स्यथ विषमदशां दुर्दशामित्यर्थः । राजपक्षे प्रतिनिग्रहरूपां दशां तदा दर्पककोपभरे इत्यस्य उत्कटकामे सतीत्यर्थः ॥ ३ ॥

भजनेति । नारदः योगार्थं व्यञ्जयन्नाह । भजनेन वशीकृतं स्वेष्टसाधनं स्वानिष्टनिवारणार्थं स्वेवाधीनकृतमपि मनसिजरिपुं श्रीरुद्रं असहायं कामभयनिवारणे साधकं परिपश्यत जानीत सोऽपि कन्दर्पजनितनिग्रहनिवारणं कर्त्तुमसमर्थः । कन्दर्पजितत्वादित्यर्थः तदेव दर्शयति तमिति तं कन्दर्परिपुमपि किं न शृणुथ कीदृशं शृणुवाम इत्याशङ्क्याह । वैरिभयादलमत्यर्थं त्वात् अर्द्धं तनुकृतमायं अर्द्धशरीरीकृतदुर्गां क्षणमपि दुर्गाविच्छेदासहिष्णुतया कन्दर्पपराजितत्वं स्फुटमेव तस्येति भावः ॥ ५ ॥

---

1. ख ग नहि ।
2. ख. रिपुसमुदायं ।
3. ख. वैरिभयादिव ।

शुम्भनिशुम्भमहासुररिपुरपि मदनपराभवदीना ।
किमुपकरिष्यति[1] गिरिजा संप्रति शङ्करवपुषि निलीना ॥६॥

इति गदितामृतमतिरससन्ततिहरिमुखचन्द्रनिरीतम् ।
पिवत रघूत्तमविरचितसंचिति कर्ण[2] चषकमुपनीतम् ॥७॥

शुम्भेति । नन्वस्माकं किं कामराजः करिष्यति श्रीदुर्गा जगज्जयित्री अस्माकं सहायोऽस्तीत्याशङ्क्याह । रिपुविनाशिका एवमपि मदनपराभवे दीना दुःखिता किमपि परं तत् प्रश्ने सम्बोधने वा शङ्करवपुषि शिवशरीरे मिलीनं विलीनं अर्द्धशरीरं प्रवेश्य स्थिता शङ्करपादोपादानां मदनपराभवनिवारणयोग्यत्व दर्शनार्थम् ॥ ६ ॥

इतीत्यादि । गदितं गदनं वचनं कवि वचनं तदेवामृतम् अति अतीता रससन्तति माधुर्यधारा यत्र मुखचन्द्रात् नोरितं निर्गलितं पिवत हे रसिका इति शेषः । पुनः कीदृशं विरचिता कृता रघूत्तमेन कविना संचितः सञ्चयनं युष्मदर्थे यस्य तत् रघूत्तमविरचितसञ्चितम् । कीदृशं सत् पानयोग्यं तत् भवतीति तदाह । कर्णचषकमुपनीतं कर्ण एव चषकं पानपात्रं तदुपनीतं तेन गृहीतम् ॥ ७ ॥

---

1. ख ग. किमुत करिष्यति ।

2. क. विरचितकर्ण ।

इतिहरिपरिहासानन्द[1]संदोहमग्नाः
स्मितविकशितगण्डाः प्रेक्षितान्योऽन्यतुण्डाः[2] ।
भ्रूकुटिशुभसलज्जं वीक्ष्य कृष्णकटाक्षैः ।
शिशिरसलिलसंस्थानोदतिष्ठन्[3] मृगाक्ष्यः[4] ॥१०॥

इति हरीति । भ्रूकुट्यां शुभं सुन्दरं च तत् सलज्जं चेति लज्जाभिव्यञ्जकं चेति तादृशं यथा स्यात् तथा वीक्ष्येत्यन्वयः । कटाक्षैरिति वीक्ष्यतो विशेषणम् । तदप्यभेदेनैव वीक्ष्यतोऽन्वितं नामार्थयोरभेदान्वयो न दृष्टचरमिति नाशङ्कनीयम् । तास्तदुपनयतीत्यादौ तथा दर्शनात् । ननु विशेषणस्य नपुंसकादिनियमात् प्राकृते सन् न भवतीति नाशङ्कनीयम् । अभेदसंसर्गेण क्रियायां यदन्येति तस्यैव तथा नियमात् कटाक्षैः वीक्ष्येत्यत्र तु अभेदप्रकारेण तृतीया । योगेन क्रियायां कटाक्षान्वयात् नोदतिष्ठन् नोत्थितः जलादिति शेषः । मृगाक्ष्य इति वीक्षणे सौन्दर्यं विशेषज्ञापनार्थं विशेषणम् ॥ १० ॥

---

1. ख ग. हरिहासानन्द ।
2 घ प्रेक्षितान्दोलितुण्डा ।
3 घ. संस्थानोपतिष्ठन् ।
4. क. युवत्यः ।

हिमतम[1]जलमग्नाकण्ठगात्राङ्गनानां[2]
विलसदलकरेखा[3] मन्दकम्पा मुखाली[4] ।
मिलितमधुपपाली घोरवातेन धूता
स्फुरदमलसुवर्णाम्भोजराजीव रेजे ॥११॥

हिमेत्यादि । हिमतमं शीतलतमं यज्जलं यमुनाजलं तत्र मग्नानि आकण्ठं कण्ठपर्यन्तानि गात्राणि शरीराणि यासां ताः एवंभूताश्चाङ्गनाश्चेति कर्मधारयः । तासां मुखाली मुखश्रेणी रेजे शुशुभे । कीदृशा केवेति तदाह । विलसन्ती शोभमाना अलकरेखा ललाटस्था चूर्णकुन्तलश्रेणी यस्या सा तथा । पुनः कीदृशा, मन्दः स्वल्पः कम्पो यस्यां सा अलकराजिमृदुकम्पयो विशेषणयो विशेष्यस्य मुखवृन्दस्य उपमाद्वयमाह । मिलिता मधुपालयो भ्रमरश्रेणयो यस्यां सा समासान्तविधेरनित्यत्वात्...क भावः । ननु गोस्त्रियोरुपसर्जनस्येति सूत्रेण गुणीभूतपालीशब्दस्य ह्रस्वत्वे विहिते कथं पुनः दीर्घत्वमिति नाशङ्कनीयं कृदिकारा-दक्तिन इति सूत्रेण पुनरिकारविधानात् । ननु पाल्यः श्रेणयः कोटय इति प्रकृत-दीर्घस्यैवश्रवणात् । [कथं [पुनस्तत् सूत्रविषयोऽयमीकारात् कृदिकारादिति प्रकृत-ह्रस्वादेव कृतसम्बन्धिन इकारात् परस्य दीर्घेणाकारस्यविधानात् इतरे सूक्ष्ममीक्षसे ।

1. क. घ हिमतर ।
2. क घ. कण्ठमालाङ्गनानां ।
3. क. विलसदलकरेखा ।
4. घ. मृणाली ।

अथ नवहरिणाक्षी मन्दमन्दाक्ष[1]लक्ष्मीः
प्रणयिनमुपगन्तुं भीतिमन्तर्वहन्तीः ।
अमृतमिव सुरस्यां भामिवातिप्रसन्नां
श्रुतिमिव ऋतवाच्य[2] वाचमुचे मुकुन्दः ॥१२॥

कृदिकारादक्तिन इति उपलक्षणं बोद्धव्यं तत् न योगविभागा वा तयेति बोध्यम् । धीरघातेन मलयवायुना धूता कम्पिता कारणस्य मन्दत्वेन कार्यस्य कम्पस्यापि सुन्दरं परिलक्ष्यते । स्फुरन्ती याऽमला निर्मला सुवर्णाम्भोजराजिः कनकपद्मश्रेणी तस्या इत्यर्थः ॥ ११ ॥

अथेत्यादि । तासां तथाभावदर्शनानन्तरमित्यर्थः । नवहरिणाक्षीः बालमृगाक्षः मन्दं मनोहरं यन्मन्दाक्षं तेन लक्ष्म्याः श्रियः शोभा या सां ताः । प्रणयिनः प्रियं उपसामित्येन गन्तुं भीतिःभयं अन्तर्मनसि वहन्तीः धारयन्तीः सुरस्यां सुखादनीयां भां चन्द्रालोकं सूर्यालोकं वा अतिप्रसादयुक्तां श्रुतिं वेदं ऋतवाच्यं सत्यार्थं शेषं स्फुटम् ॥ १२ ॥

---

1. क. घ. मुग्धमन्दाक्ष ।
2. क घ. ऋतवाच्यां ।

विंशः प्रबन्धः

॥ विभासरागेण[1] गीयते ॥

हे नवयुवतिनिकाय । सहजमनोरम[2]काय ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

हिमतमजलमिलनेन । किमथ तपो रचनेन ॥ २ ॥

हरगिरिजाभजनेन । मुदमहमगममनेन[3] ॥ ३ ॥

व्रतमपि यदिदमकारि । तन्मम तोषणकारी ॥ ४ ॥

हे नवेति । वाक्यमेव दर्शयति । युवतिनिकाय तरुणीसमूह सहजेन स्वभावेन मनोहरकाय मनोहरशरीरम् ॥ १ ॥

हिमेति । हिमतमस्य अति शीतलस्य जलस्य मिलनेन गात्रशङ्गेन कं जलमित्यर्थः । अथ प्रसादनान्तरं तपो रचनेन तपसो रचना कारणं येन तत्तपो रचनं येन जलमिलनं तेन वैपरित्येन वा विशेषणविशेष्यभावो बोध्यः ॥ २ ॥

हरगिरिजेत्यादि शेषं स्फुटम् ॥ ३-४ ॥

---

1. क. घ सामगडारागेण गियते ।

2 क घ मनोहर ।

3. ख, ग मुदमहमगमगममनेन ।

उपसर मम सविधेहि । निजनिजपटमुपधेहि[1] ॥५॥
न वयमनृतमवदाम । कथयतु सुवल सुदाम ॥ ६ ॥
मदभिमता चरणेन । लसद्वसनाभरणेन ॥ ७ ॥
शिवपरिचरणवलेन । आगतमुचितफलेन ॥ ८ ॥
इति भणितं कुतुकेन[2] । श्रृणुत रघूत्तमकेन ॥ ९ ॥

उपसरेति । उपसरवनमगच्छ । सर्वे धेहि सपीप एव निजनिजपटं परिधेहि धारयेत्यर्थः । अपि चार्थे ॥ ५ ॥

न वयमित्यादि स्फुटम् ॥ ६ ॥

मदभिमतेति । लसता वसनाभरणेन वसनैश्चाभरणैश्चेत्यर्थः । अत्रापि समाहारे णोऽयम् ॥ ७ ॥

शिवेति । शिवयोः परिचरणं परिचर्य्या सेवा तद्बलेन तत्र आगतमुपपन्नं जातमित्यर्थः । भावे क्तः विधानात् उचितफलेन योऽयफलेन मत्प्राप्तिरूपेणेत्यर्थः ॥ ८ ॥

इतीति । श्रृणुत हे भक्त इति शेषः । रघूत्तमेन कविना स्वार्थे कप्रत्ययः यद्वा रघूत्तमस्य कः आत्मस्वरूपः तेनेत्यर्थः उभयथापि तुल्यम् ॥ ९ ॥

---

1. क. निजमपिधेहि ।
 ख ग पटं परिधेहि ।
2. घ. कुतूहलेन ।

हरेर्निदेशं शिरसा दधत्यस्तीराय नीरात्प्रययुर्युवत्यः ।
अङ्गेषु भाजालसुवर्णचेलैरलक्षिताः कृष्णसखैः सखेलैः ॥१३॥

वराङ्गसंवारिकरारविन्दा वराङ्गना[1] नम्रमुखेन्दुवृन्दाः ।
समुत्थिताः शीतजलात्सकम्पाः संरेजुरभ्रादिव मूर्तिशम्याः ॥१४॥

अथ समोत्त सगोपकुमारिकाः सपृथुवेपथुकाः सुकुमारिकाः ।
चपलपल्लवचारुतरोषितः[2] समवदन्मधुरात्मतरुषितः ॥१५॥

हरेरित्यादि । हरेः श्रीकृष्णस्य परमेश्वरस्य निर्देशमाज्ञां शिरसा दधत्य आदरेण धारयन्त्य इत्यर्थः । तीराय तीरे स्थातुं नीरात् जलं विहायसाययुर्गताः अङ्गेषु शरीरेषु कृष्णसखैर्व लक्षितसेवयः । अदर्शने हेतुमाह । भाजालानि सुवर्णचेलानि सुवर्णसूत्रवसनानि तैः हेत्वन्तरमाह । क्रीडान्तरशक्तचित्तैरित्यर्थः ॥ १३ ॥

वराङ्गेत्यादि । वराङ्गसम्वारि योन्याच्छादनकारी अभ्रादिव [मेघादिव मूर्तिशम्याः] शरीरणीविद्युतः शीतजलादिति मेघोऽपि बहुव्रीहिणा विशेषणं बोधव्यम् ॥ १४ ॥

अथेत्यादि । अथ तासां समीपगमनान्तरं श्रीकृष्णः सुकुमारिकाः कोमलाङ्गः चपलाः पल्लवाः श्रीकृष्णाङ्गदोलकेन मरुता यस्य तादृशो यश्चारुतरः सुन्दरकदम्बवृक्षः तस्मिन्नुषितः उपविष्टः । मरुतचञ्चलेति पाठान्तरं सुगमम् ।

---

1. ख. ग वराङ्गनो ।
2. घ. मरुतचञ्चलचारुतरुषितः ।
क मरुदञ्चलतारुतरुषितः ।

हरिहराद्रिसुताद्वयभावनं जगति सिद्धगणोदयभावनम् ।
व्रतमिदं भवतीभिरनुत्तमं[1] व्यरचि[2] दुष्कृतविश्वरनुत्तमम् ॥ १६ ॥
अपटमज्जनजं सुरहेलया शमयताघनघासुरहेलया ।
नमत भालधृताञ्जलिपाशिनं तमवबुध्य हृदा बलिपाणिनम् ।१७।
इति लसन्नयनं[3] मधुसूदनं जलधिजानलिनीमधुसूदनम् ।
अनमताञ्जलिराजितदैवतं मृगदृशो भृशभावितदैवतम् ॥ १८ ॥

हरिहरेत्यादि । हरिहराद्रिसुता अद्वयभावना एकेश्वरचिन्ता यत्र तादृशम् । जगति सकलभक्त-वृन्दे सिद्धगुणाद्य भावन अभीष्टफलसमूहोत्पत्तिजनकं व्रतं पूर्वोक्त-रूपं इदं मनुप्रात्यक्ष्यं व्यरचि अकारि दुष्कृतविस्तरं पापसमूह नुदति नाशयतीति तथा तादृशानां मध्ये उत्कृष्टम् ॥ १६ ॥

अपटेति । एवं व्रतप्रशंसां विधाय तत्र जातच्छिद्रं तन् प्रायश्चितं च आह । अपटं पटाभावः । अप्राप्तोऽव्ययीभावः । अपटेन यन्मज्जनं यमुनावगाहनं तस्माद्‌जातं सुरम्यतलाधिष्ठातुर्वरुणस्य हेलया निमित्तेन यदङ्गपापं शमयत नाशयत । अघासुरहेलया अघासुरघ्नो मम हेलया वाचा तर्हि किं कर्तव्य तदुपदिश इत्यपेक्षायामाह । नमत पाशिनं वरुणं जलाधिष्ठातृदेवं नमस्कुरु अञ्जलिराजि अञ्जलिशोभि यत्कीदृशं यथा स्यात् तथा इति तदाह । भालेषु ललाटेषु धृता अञ्जलयो यस्मिन् यस्मै वा तन् भालधृताञ्जलिः किं कृत्वा हृदा मनसा त्वं वरुणं वलिपाशिनं वलिवन्धुकं श्रीकृष्णं अववुध्य कृत्येत्यर्थः । ॥ १७ ॥

इति लसदिति । यथा स्यात् तथा तदैव उपदेशकालानन्तरमेवेति मधुसूदनं विषेषणम् । भृशमत्यन्तं भावितानि दैवतानि यस्मिन् यं सर्वदैव तत् स्वरुपोऽयं चिन्तितमित्यर्थः ॥ १८ ॥

1. क. भवतीभिरनूतमं
2. क. व्यचरि ।
3. क घ, लसद्वदनं

सकलहृत्कमले सततोषितः परमनिष्कपटव्रततोषितः ।
सवसनानि ददौ वरभाविनीः समवलोक्य पुरो वरभाविनीः ॥ १९ ॥

वसनभूषणवृन्दविभूषिताः सरभसं सधवीप्रविभूषिताः ।
हरिरुवाच सुभक्तिसभाजितः सुनयनाश्चपलावलिभाजितः ॥ २० ॥

सकलेत्यादि । सवसनानि ददौ इत्यन्वयः । किंभूतः । सकलानां भक्तानां हृत्कमले मनः पद्मं सदा उषितः स्थितः, परमं यत् व्रतं शिवदुर्गाविष्णुभजनरूपं तेन तोषित पुरगमनेन सततं तुष्टीकृतपरमनेष्कपटत्व चाद्वैतभावनया शीतादिदुःखसहनेन नग्नतया श्रीकृष्णपुरोगमनेन बोद्धव्यं किं कृत्वा ददौ तदाह । वरभाविनीः समवलोक्य वराश्च भाविन्यश्चेति समवलोक्य सम्यक् दृष्ट्वा पुरः सम्मुखे वरभाविनीः वर आत्मानं श्रीकृष्णमेव भावयितुं शीलं यासां ता अयमेवास्माकं पतिर्भवतु इति भावनावतीरित्यर्थः ॥ १९ ॥

वसनेत्यादि । सरभस सवेगं सत्वरमित्यर्थः यद्वा सहर्षं यथा स्यात् तथा सन् किं भवितुं प्रकृष्टेच्छावशेन सुभक्त्याद्वैतभक्त्या सद्भावितः प्रापितः चपलावले विद्युत्समूहस्य भां शोभां जितवतां ॥ २० ।

---

1. ख. ग. वलीभाषितः,

एकविंशः प्रबन्धः

॥ सामगड़ारागेण[1] गीयते ॥

हरगिरिजाभजनं[2] भवतीनाम् । मामतिवशयति भाववतीनाम् ॥

॥ ध्रुवपदमिदम् ॥ १ ॥

वरतनुगण तव[3] चरितमुदारम्[4] ।सुखयति शङ्करमपि सहदारम्[5] ॥ २॥

हरिहरनाममधुरतरगीतम् | मामतिमदयति मधुवनपीतम्[6] ॥ ३ ॥

हरेति। हरति भवतीनां युष्माकं भाववतीनाम् अद्वैतभक्तिमतीनां अतिवशयति अतिवशीकरोति ॥ १ ॥

हे वरतनुगण तवेति। समुदायस्य एकत्वविवक्षा एकात्माभिप्रायेण वा युस्मच्छब्दस्य हि सम्बोधनात्माभिधेयः प्रकृतेश्च एक एव जगदीश्वरस्य परमात्मा गोपवृन्दशरीरीति नात्र दोषः । चरितं तदाह महन् शङ्करमपि मङ्गलशब्देन शङ्करपदस्य योग्यार्थोऽभिव्यज्यते । तथा च जगतां सुखकरोऽपि शिवः सुखयति सुखी करोति किमुत मादृशमिति-भावः सहदारं सपार्वतीकम् । ॥ २ ॥

हरिहरेति । तासां हरिहरनामगानं अन्येषामपि भक्तानां तत्र प्रवृत्यर्थं स्वप्रीतिजनकमिति कथयति। हरिहरस्य हरिहरयोर्वा नाम हरिहरनाम शिवगोविन्देत्यादि

नामानि तव गोविन्देत्यादि लोके महान्ति च ।

अन्येव मम नामानि नात्र कार्या विचारणा ॥

इति सहस्रनाम भाष्ये श्रीशङ्कराचार्यधृतमहाभारतवचनात्। मधुरतरं यथा स्यात् तथा गीत स्वरयोगेन कीर्त्तितं तत् मधुरं गीतं अतिमदयति अतिप्रीणयति उपमाह मधुवनपीतं नितरां पतिं इव वा शब्दादिव अब्दोऽपि तदर्थो बोद्धव्यः। शास्त्र . पपुरिति कालिदासप्रयोगात् । ॥ ३ ॥

---

1. घ. रागस्योल्लेश्वो नास्ति ।
2. ख. ग. हरिगिरिज़ाभावन
3. (क). वरजनुगण तव ।
   ख, ग. वरतिनुगणरवत् ।
4. क. ख. ग. रचितमुदारं ।
5. क. सहवारम् ।
6. क. कधुवनीपीतं ।

अनुपममधुरिम वो गुणवृन्दम् । न कमतिरमयति जनमति[1]मन्दम् ॥४॥
अभिनवयौवनमिदमतिशोभम् । कं तरुणं न करोति सलोभम् ॥५॥
सन्ततमिच्छथ मम पतिभावम् । तन्मम मतमिति मुञ्चत दावम् ॥६॥
मयि भगवति सतिकृतमतिकामम् । सपदि निबोधत विषयविरामम् ॥७

अनुपमेति । अस्तु तावत् परमार्थकथा प्रत्यक्षं युष्मद्गुणवृन्दमेव जगत् वशीकरोतीत्याह । अनुपमं मधुरिमं लालित्यं यस्य तथा तं वो युष्माकं गुणवृन्दं कं जनं मन्दं अबुद्धमपि अतिरमयति अतिप्रीतयति अपितु सर्वमेव किमुत मादृशं विदग्धमित्यर्थ ॥ ४ ॥

अभिनवेति । गुणानां मध्ये तरुण्यभिमानविषय गुणं स्तौति । सलोभ सभोगतृष्णं शेषं स्फुटम् ॥ ५ ॥

सन्ततमिति । तासामभिप्रेतार्थं स्वीकृतं दर्शयति । सततं मयि ज्ञातानुराग दिवसावधि इच्छथ वांच्छथ पतिभावं तन्मम मतं स्वीकृतमात्यर्थ इत्यतो दावं चिन्ताकृततापं मुञ्चत त्यजत ॥ ६ ॥

मयीति । ननु पतिभावेन त्वां भवतीनामस्माक परमार्थोऽस्ति नास्ति तत् ब्रूहि इत्यपेक्षयामाह भगवती । परं ब्रह्मणीत्यर्थ ब्रह्मेति परमात्मेति भगवानिति शब्द्यत इति श्रीभागवतवचनात् । सति सत्ये सत्यं ज्ञानमनन्तं ब्रह्मेति । ननु श्रीकृष्णस्य ब्रह्म वेति प्रमाणमिति नाशकं नोक्तम् ॥

अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ॥

इति श्रीभागवतवचनात् । अतिकाममत्यन्तं सर्वविषयकामापेक्षया उत्कृष्टं काम

1. क. घ. जनमपि ।

भाविरजनीगणमधिकविलासम्[1] । समनुभवेत मया सह रासम् ॥८॥
निजनिजमन्दिरमयत निकामम् । मम भवतीषु हृदयमविरामम् ॥९॥
इति कमलेशवचनमधुधाराम् । पिवत रघूत्तमसुभणितसाराम्[3] ॥१०॥

येन केनापि रूपेण न केवलं परमेश्वरत्वेन सेवात्वेनैव इत्यर्थः । सपदि झटिति निबोधत निश्चितं जानीत । विषयेभ्यो रूपरसादिमयस्वभावकाम्येभ्यः इन्द्रियादिभ्यः विरामो निवृत्तिर्यस्मात् यत् कामात् विषयविरामस्तम् ॥ ७ ॥

भाविरिति । परमार्थमुक्त्वा लौकिकमाह । भावि भविष्यन् यो रजनीगणस्तं वाप्येत्यर्थः । अधिकविलासं शोभा यस्य राकापतियोगात् सोऽधिकविलासस्तं समनुभवेत सुसंभुञ्जीत रासं रासनामकं विहारविशेषं रसे भावो रासः इति व्युत्पत्या रासपदमिति ध्येयम् ॥ ८ ॥

निजेति । किन्तु अस्माकं पतिपत्नीभावोऽयं रसाधिक्याय संगोप्य एवेत्यभिप्रायेणाह । अयतपातभौवादिकं सायतेरयं प्रयोगः । निकामं यथेष्टं प्रतारणाङ्गना निवृत्यर्थमाह । ममेति अविराममनिवृत्तं युष्माकं यथा मयि मम तथा युष्मासु मनः सकाममिति भावः ॥ ९ ॥

इतीति । तदित्थं प्रेमवन्धमर्यादां वर्णयित्वा परस्परं विरहिण्याः गमनं वर्णयन् कविः सर्गं समापयति ॥ १० ॥

---

1. घ भाविरजिगणसधिक
2. क पुस्तके ८ ९ पदद्वयं नास्ति ।
3. घ सुभाषितसाराम ।

प्रहित्य नवयोषितस्मदतिभक्तिसंयोषित--
स्तरोरुपगतक्षितिः कृतसुरारिजातक्षितिः ।
सधेनुगणरक्षणे सुविपिने विहारक्षणे ।
हरि सखिसमन्वितः परिजगाम गामन्वितः ॥२१॥

अथ प्रियतमोदिता मृगदृशो भृशं मोदिताः
प्रपूज्य गिरिजेश्वरौ त्रिदिवसत्समाजेश्वरौ ।
स्मरज्वरपरायणाः स्मरणनीलनारायणा
मनोरथरसङ्गता निजनिजालय संगताः ॥२२॥

इति श्रीमुकुन्दविलासमहाकाव्ये यतीन्द्र रघूत्तमतीर्थपादकृतौ
गोपीपट्टापहरणो नाम षष्ठः सर्गः ।

प्रहित्येति । श्लोकद्वयेन प्रहित्वाप्रेक्षता अतिभक्त्या तासां नवयोषितामतिभक्त्या संयोषितः प्रीणितः तरोः कदम्बवृक्षात् उपगतक्षितिः प्राप्तधरणीः कृता सुरारीणामसुराणां जातस्य समूहस्य क्षतिः क्षयो येन स तथा स हरिः धेनुपरिरक्षणे गोपरिरक्षणनिमित्तेषु सुविपिने सुन्दरवने विहारेण क्षण उत्सवः सुखविशेषो यस्मिन् तत्तथा तस्मिन् । सखिसमन्वितः सुबलसुदामादिसहित गां धेनुं अन्वितः तत्पश्चाद्गत इत्यर्थः ॥ २१ ॥

अथेत्यादि । अथ श्रीकृष्णगमनान्तरं मोदिता जातहर्षा इत्यर्थः । प्रपूज्य प्रकृष्टं पूजयित्वा अस्माकं पतिः कृष्णः जात इति कृत्वा अत्र पूजाप्रकर्षो जात इति बोद्धव्यः त्रिदिवसदां देवानां समाजस्य ईश्वरौ आराध्यावित्यर्थः । स्मरेति पूजावसरे प्रकृतचिन्तावशात् अधिकेन स्मरेण कामेन ये ज्वरपरायणं मनो यासां तास्तथा । अयते गम्यते सर्वमनेन तदत्ययमिति ज्ञानार्थस्य अयतेः करणार्थप्रत्ययान्त पदमिति बोध्यम् । मनोरथ एव रसः तं गता प्राप्ता यद्वा मनोरथरसं कृष्णसङ्गमं वासनाजलप्राप्तिः । इदं तु स्मरणनिवृत्यर्थं बोध्यम् । शेषं स्फुटम् ॥ २२ ॥

इति श्रीमुकुन्दविलासप्रकाशिकायां षष्ठः सर्गः ।

सप्तमः सर्गः

स्थानप्रयाणशयनाशनभोजनेषु[1]
स्नानाङ्गमार्जनदृगञ्जनभूषणेषु ।
वृत्ताः कथंचिदबला न रसात् क्वचित्ताः
श्रीकान्तकान्तनयनाशुगविद्धचित्ताः ॥१॥
निधाय शाखासु पटान् हसन्तं
स्कन्धे कदम्बस्य मुखं वसन्तम्[2] ।
मनोज्ञमङ्गं मृदु दोलयन्तं
भ्रुवं[3] दृगन्तं च सुनर्त्तयन्तम् ॥ २ ॥

स्थानेत्यादि । सप्तमे गोपगोपी रहस्यं श्रीकृष्णस्य अन्योऽन्यदर्शनोद्दीप्तकामभावर्णयन् प्रथमं गोपीरूपस्य तस्य विरहभङ्गं वर्णयति षड्भिः श्लोकैः । स्थानं भक्त्या भावेन स्थितिः उपवेशनं वा प्रयाणं गमनं शयनं शय्यायामङ्गप्रसारणं अशनं भोजनं भाषणं कथनं अन्यसम्भाषणं वा स्नानं जलमज्जनम् अङ्गमार्जन हरिद्राद्रव्यादिभिस्तनुमलापकर्षणं दृगञ्जनं कज्जलस्य चक्षुषि संयोजनं भूषणमलङ्कारपरिधानः तेषु वृत्ताः प्रवृत्ता कथंचिदिति अभ्यासकृतसंस्कारविशेषणम् । अबला गोप्यः सा तनुरागात् क्वचित् कदाचिदपि ता विरहिण्यः श्रीकान्तः श्रीकृष्णः तस्य कान्तं मनोहरं यन्नयनं तदेवाशुगः बाणः तेन विद्धं चित्तं मनो यासां ताः ॥ १ ॥

निधायेति । अदृष्टं श्रुतरूपं अतः मनोहरं निरन्तरं स्मरन्त्य एव आह्निक कृत्येषु

1. क. घ. भाषणेषु ।
2. क दधन्तम् ।
3. घ. भुवि
4. घ सुनर्तयन्तं ।

चूडाग्रचञ्चत्प्रचलाककान्तं
विशालभालस्फुरितालकान्तम् ।
विलोकहारं चलकुण्डलं तं
दध्युः प्रियं ता अलमुज्जलन्तम् ॥३॥

अलं मृदु स्पर्शपदारविन्दः
कथं वने भ्राम्यति मे मुकुन्दः ।
सदेति चिन्तायुत[1] चेतसस्ताः
कदापि शान्तं न ययुर्विहस्ताः ॥४॥

मनो नाकुर्वते इति दर्शयति । द्वाभ्यां निधायेत्यादि । चूडाग्रे चञ्चला यूनां अङ्गदोलनेन वा चञ्चलनं यत्प्रचलाकं मयूरपुच्छं तेन कान्तं सुन्दरं यद् वा तादृशं प्रचलाकं कान्तं यस्मात् स तथा तम् । चलत्कुण्डलं चञ्चलमकरकुण्डलयुगं तं पूर्वदृष्टं दध्युः धृतवत्यः । प्रियं प्रेमास्पदं ताः विरहिण्यो गोप्यः अलमत्यन्तं ज्वलन्तं शोभमानं यद्वा अलमत्यन्तं दध्युः इत्यन्वयः । शेषं स्फुटम् ॥ २-३ ॥

अलमित्यादि । गतसर्गान्ते स्वप्रेक्षणानन्तरं तथाचरणाय गत इति वर्णितं तदनुस्मृत्य व्याकुलितभावमासां वर्णयति । शान्तिं चित्तस्वास्थ्यं ययुः विहस्ताः व्याकुलाः ॥ ४ ॥

---

1 घ चिन्ताकुल ।

हरेर्दिदृक्षाकुलमानसानां मृगीदृशां कर्मसु सालसानाम् ।
युगानि यत्राजनि पक्ष्मपातः कथंचनासौ दिवसोऽतिजातः ॥५॥
अस्तं प्रयाति सति वामदृशां पतङ्गे
संरागदृष्टिनवकुङ्कुमरञ्जिताङ्गे ।
तापोऽश्लथसहजशीतलतावतीनां[1]
तासां विधूदयमुदां च कुमुद्वतीनाम् ॥ ६ ॥

हरेरित्यादि । कर्मसु गृहकृत्येषु सालसानामालस्यवतीनां यत् दिवसे पक्ष्मपातोऽलक्षितकालोऽपि वहूनि युगानि अजनि जातः कथंचन अतिकष्टेनेत्यर्थः अतिजातोऽतीतः ॥ ५ ॥

अस्तमित्यादि । अस्तमस्ताचलं प्रयाति गच्छति सति पतङ्गे सूर्य्ये सम्यक्रागः संरागः तेन दृष्टिः दर्शनं नयनक्रिया सैव नवकुङ्कुमः कुङ्कुमद्रवः तेन रञ्जितं रक्तीकृतं अङ्गं शरीरं यस्य तथा तस्मिन् तापः ज्वाला अश्लथत् शिथिली बभूव । सहजेन स्वभावेन या शीलता तद्वतीनां तासां विरहिणीनां गोपीनां कुमुद्वतीनां कुमुदिनीनां च श्लेषेण विशेषतामाह । विधूदयमुदामिति । विधो विष्णोश्चन्द्रस्येव उदये मुत् प्रीतिर्यासां तां तथा तासाम् । अत्र गोपीनां कुमुदिनीनां च तापशैथिल्ये कविर्हेतु मुत्प्रेक्षते । सूर्य्यस्य सानुरागः गोपीदृष्टिकुङ्कुमसंयोगमिति द्रष्टव्यम् ॥ ६ ॥

---

1. घ. शीतलाङ्गवतीनां

आहूयनामभिरभिद्रुतधेनुजालं
सम्पाद्य दूरनिनदं शवलं[1] विशालम् ।
शीतं च यामुनजलं परिपाय्य घोषं
कृष्णश्चचाल सवयोगणयुक् सतोषम् ॥ ७ ॥
घोषं सतोषमुपयातुमनंतलीलं
गोधूलिभूषिततनुं हरिनीलनीलम् ।
कृष्णं समीक्ष्य गुणवर्णनीयं[3] चिकीर्षुः
काप्यालिमाह विरहव्यथनं जिहीर्षुः ॥ ८ ॥

आहूयेत्यादि वस्तुतः गोपीनां तापशैथिल्ये श्रीकृष्णगमनसान्निध्यमेव अतस्तदेव वर्णयति । नामभिः हे शामले हे धवले नन्दिनी इत्यादि नामभिरित्यर्थः । अभितो द्रुतं धेनुजालं धेनुवृन्दं गवलं महिषशृङ्गं विशालं महत् शीतं यामुनजलं परिपाय्य च घोषं व्रजं प्रति चचाल जगाम । सवयोगणयुक् वयस्यकुलमितः सतोषं यथा यद्वा घोष व्रजति कथंभूतं शृङ्गं ध्वनिं श्रुत्वा सतोषं तत्पक्षे घोषपदस्य तत्स्थले लक्षणा । सद् गमनं तत् समीपगमनमेवेति बोध्यम् ॥ ७ ॥

घोषमित्यादि । हरिनीलः इन्द्रनीलमणिः स इव नीलः श्यामः तं गुस्ताशग्या इति तदत्र समासः । गुणवर्णनीकां कृष्णवर्णनां आलीं सखीं विरहव्यथनं विरहवेदनां जिहीर्षुः हन्तुमिच्छुरित्यर्थः ॥ ८ ॥

---

1. क. गवलं
घ गहलं
2. क. घ. सवयो पशुयुक् सतोषम्
3. ख. घ. गहलं
घ. गुणवर्णनीकां

द्वाविंशः प्रबन्धः

॥ गौरीरागेण गीयते ॥

यामुन[1] जलजलधरकुवलयकुलनीलोत्पलजिदमलतनुभासम् ।

शारदकलङ्ककलाधरसुन्दरवदनममृतरससुमधुरहासम् ॥

॥ ध्रुवपदम् ॥

लोकय सुन्दरि नन्दकुमारम् ।

व्रजमनुचालितगोधनमनुगतमुपगतयामुनविपिनविहारम् ॥ १ ॥

यामुनेत्यादि । कुवलयं नीलोत्पलं मरकतमणिः तत्जितं तदुत्कृष्टं अमला निर्दोषा स्वच्छा वा तनुभा शरीरदीप्तिर्यस्य स तथा तम् । शरत्कालसम्बन्धी यो कलङ्कः निर्लाञ्छनः कलाधरश्चन्द्रः तस्मादपि सुन्दरं वदनं यस्य स तथा तम् । अमृतरसात् सुमधुरो हासो यस्य स तथा तं कलय पश्य । कीदृशं व्रजमनुलक्षीकृत्य गलितं यद्धेनुवृन्दं तदनुगतं तत्पश्चाद्गतमित्यर्थः । उपरतो निवृत्तो यामुनविपिनविहारो यस्य तम् ॥ १ ॥

---

1. ख. ग. यमुना ।

भ्रूयुगमदनशरासनयोजितनयनशरक्षतयौवतलक्ष्यम् ।
कृतजगदुत्सवमुरलीकलरवयुवतिमनोभवदीपनदक्षम् ॥ २ ॥
बेणुरवणघनगवल[1] कलस्वनगीतकुतुकपरसहचरभङ्गम् ।
मौलिविभूषणगहनकुसुमगणगन्धवशानुगबहुवनभृङ्गम् ॥ ३ ॥
अरुणसितासितविविधपुष्पशततुलसीजलसुललितवनमालम् ।
जलजरजोबृत[2] मधुपचयोपमगोरजरसदलकालकजालम्[3] ॥ ४ ॥

भ्रूयुगेति । भ्रूयुगमेव मदनशरासनं कामकार्मुकं तत्र योजितो यो नयनशरस्तेन क्षतं बिद्धमेव तं युवतिवृन्दमेव लक्ष्यं शरव्यं येन स तं कृतो जगदुत्सवो जगदानन्दविशेषो येन तादृशो मुरलीकलरवस्तेन करणेन युवतिमनोभवस्य युवतिकामस्य दीपने वर्द्धने दक्षः कुशलस्तम् ॥ २ ॥

बेण्विति । बेणुरवणं च घनो गवलकलस्वनश्च गीतं च तेषु कुतुकपराः कौतुकिनो ये सहचरास्तेषु संयोगस्य स तथा तम् । मौलिश्चूडा तस्य विभूषणं अलंकारः यो गहनः तस्यामागतो वनपुष्पवृन्दः तस्य गन्धः सौरभं तद्वशेन तदधीनत्वेन अनुगाः पश्चाद्गामिनो बहवो वनभृङ्गा वनस्य भ्रमरा यस्य स तथा तम् ॥ ३ ॥

अरुणेति । अरुणानि रक्तानि सितानि धवलानि असितानि कृष्णानि विविधानि यानि पुष्पाणि शतानि तुलसी जलानि च तैः सुललिता बनमाला यस्मिन् स तथा तम् । जलजे पद्मे रजोवृतः परागवेष्टित यो मधुपचयस्तेन उपमा यस्य तादृशैर्गोरजैर्गोधूलिभिः लसन् शोभि अलके ललाटे अलकजालं यस्य स तथा तम् ॥ ४ ॥

1. ख· शवत । 2 घ· जलजराजोवृत ।
3. ख· गोरज सलदलिकालकजालं ।

श्रुतिधृतनवदलचलमणिमण्डितविमलफलकसमगण्डम् ।
चित्रवेत्रवरघूर्णनकरकरमङ्गदवलय[1] वलितभुजदण्डम् ॥ ५ ॥
काञ्चनवलयितहरिमणिसंमितपीतवसनयुततनुमतिकान्तम् ।
मरकतखचितविधूपलराजितनीलपटोज्ज्वलवलमनुयान्तम् ॥ ६ ॥

श्रुतीति । श्रुत्योः कर्णयोर्धृतानि यानि नवदलचलकुण्डलानि तैर्मण्डितौ शोभितौ विमलफलकसमौ निर्मलचर्मतुल्यौ गण्डौ यस्य स तथा तम् । चित्रं विचित्रं यद्व्रततिः वेत्ररूपं तस्य घूर्णनं घूर्णना तत्करः करो यस्य स तथा तम् । अङ्गदवलयाभ्याः वलितो भुजदण्डो यस्य स तथा तम् ॥ ५ ॥

काञ्चनेति । काञ्चनेन सुवर्णेन वलयितो मध्यवेष्टितो हरिमणिरिन्द्रनीलमणिस्तत् समीक्ष्य पीतवसनयुता तनुर्यस्य स तथा तम् । अतएव अतिकान्तमतिसुन्दरं यद्वा तादृशी तनुः कान्ता सुन्दरी यस्मात् मरकतेन खचितो मध्ययोजितो यो विधूपलश्चन्द्रकान्तमणिः सद्राजितः शोभितः यो नीलपटोज्वलो वलः नीलाम्बरस्तमनुयान्तं पश्चादागच्छन्तम् ॥ ६ ॥

---

1. ख. ग. करकरवलय ।

स्फटिकपटलतुलरुचिकधेनुकुलमनुगजराज[1] गमनमतिशोभम्[2]
सुयतिरघूत्तमभणितमनुत्तममनवरतं हृदि रसय सलोभम्[3] ॥ ७ ॥

आकूतपिशुनस्मेरकटाक्षैरितरेतरम् ।
आदृताः[4] शौरि[5] सुन्दर्यो ययुर्निजनिजं गृहम्[6] ॥ ८ ॥

स्फटिकेति । स्फटिकं ताटङ्क स्फटिकसमूहस्तेन तद्वल्येोपमा यासां तादृश्यः रुचयः कान्तयो यस्य तादृशं यद्धेनुकुलं धेनुवृन्दं अनु पश्चाद्गतमित्यर्थः । पुनः कीदृशं गजराजस्येव गमनं यस्य स तथा तम् । अतएवातिशोभं अतिशयसुन्दरमित्यर्थः । सुयतीति शोभमाना यतयो यत्र तादृशं यत् रघूत्तमस्य भणितं कवित्वं अनुत्तमं अनवरतं हृदि मनसि रसय भावय सलोभं यथा स्यात् तथा रसिक इति शेषः ॥ ७ ॥

आकूतेति । आकूतस्य मनोगताभिप्रायस्य तस्य पिशुनाः सूचकाः ये स्मरकटाक्षः ईषद्धासोपलक्षितनयनान्तोपदर्शितानीतै इतरेतरं परस्परेण आदृताः गौरवविषयीकृताः शौरि सुन्दर्यः श्रीकृष्णश्च गोप्यश्च निजं निजं स्वं स्वं गृहं ययुरित्यन्वयः ॥ ८ ॥

---

1. क धेनुकुलमनुगतिराज ।
2. घ· स्फटिकपटलरुचिधेनुकुलमनुचार जनमनमतिशोभं ।
3. घ रपमय लोभम् ।
4. ख. आहृताः ।
5. घ. गौरि
6. क· घ· यजुर्निज गृहम् गृहम् ।

अन्योन्यसस्मितालोकैरन्योन्यहृतमानसाः ।
निद्रामापुर्न गोविन्द गोप्यो हृतधना इव ॥ १० ॥
प्रसारि[1] हरिसौभाग्यं दर्शनोद्वेगदायिनीम् ।
सपत्नीमिव तां रात्रिं न सेहे कापि गोपिका ॥ ११ ॥

इति श्रीमुकुन्दविलासमहाकाव्ये यतींद्र रघूत्तमतीर्थपादकृतौ
गोविंदगोपीकामोदूदीपनो नाम सप्तमः सर्गः ।

अन्योऽन्येति । हृतसर्वस्वाः जनाः यथा कृतं तया निद्रां न गच्छन्ति तथा गोविन्द गोप्योऽपि परस्परहृतमनसः परस्परसंगतचिन्तया निद्रां न प्रापुरित्यर्थः ॥ १० ॥

प्रसारीति । आगामी सर्गे गोपीनां विरहबाहुल्यं वर्णयितुं श्लेषेण तत् सूचयति । प्रसारि विस्तृतं हरेश्चन्द्रस्य कृष्णस्य वा यद् भाग्यं सौन्दर्य्यं सुप्रीतिर्वा यस्यां ताः दर्शनेन स्वविषयेन चाक्षुषज्ञानेन उद्वेगदायिनीं भयदां दुःखदां न स्नेहेन क्षान्तवती शेषं स्फुटम् ॥ ११ ॥

इति श्रीमुकुन्दविलासप्रकाशिकायां सप्तमः सर्गः ।

---

1. घ. प्रसाद ।

अष्टमः सर्गः

त्रयोविंशः प्रबन्धः

॥ केदाररागेण गीयते ॥

हे सखि कां नु दिशं प्रविशेयम्। रिपुरिव[1] मामुपतपति निशेयम्।
॥ ध्रुवपदम् ॥

अतिसुभगां हरिपरिमिलनेन। हरिविरहे विरसां मदनेन ॥ १ ॥

हे सखीत्यादि। अष्टमे राधिकादि-गोपीरूपधरस्य श्रीकृष्णस्य ब्रह्मणा श्रीकृष्णरूपविरहेणोद्वेगनाट्यं वर्णयति। ननु प्रश्ने कां दिशं प्रविशेयं प्रविष्टा भवेयं तावदित्यर्थः। रिपुरिव सपत्नी निशा रात्रि इयं प्रत्यक्षा सर्वव्यापिनीत्यर्थः। सपत्नी सादृश्ये श्लिष्टा विशेषणान्याह। अतिसुभगां अतिसुन्दरीं अतिप्रियां वा हरिश्चन्द्रः कृष्णो वा तस्य परिमिलनेन परमसंयोगेन मां कीदृशीं हरिविरहेन विरसां रसरहितां मदनेन हेतुना विरहमदनयोरुभयोरेव वैरस्ये निमित्तत्वं एकाभावात्तवाभावात् ॥ १ ॥

---

1. ख. ग. रिपुमिव।

लसिततरा विधुशिशिरकरेण । हतकुतुकां विधुविरहभरेण ॥२॥
सुषमा मृदुसुरभिश्वसनेन । विकलामधिकघनश्वसनेन ॥३॥
महिता भावलिसमुदयनेन । विरहितां भानिकरेण घनेन ॥४॥
विमलतरा विमलाम्बरकेण[1] । मलिनतरां मलिनाम्बरकेण ॥५॥

लसितेति । लसिततरा शोभिततरा विधोश्चन्द्रस्य कृष्णस्य वा शिशिरेण शीतलेन करेण किरणेन पाणिना मां कीदृशीं हतकुतुकां नष्टकेलिकौतुकां विधोः कृष्णस्य विरहभरेण वियोगातिशयेन ॥ २ ॥

सुषमेति । सुषमा सुन्दरी मनोरमा मृदुना सुरभिणा गन्धबहेन श्वसनेन वायुना निःश्वासेन वा उत्तमस्त्रिया निःश्वासस्य सौरभं कविसंप्रदायं प्रसिद्धं मां कीदृशीं विकलां व्याकुलां अधिकेन दीर्घेण घनेन निविडेन श्वसनेन निःश्वासेन ॥ ३ ॥

महितेति । महिता पूजिता शोभितेत्यर्थः । भानि नक्षत्राणि भादेह दीर्घस्तदावलिस्तत् समूहः तस्य समुदयनेन संकाशेन मां कीदृशीं रहितां शून्यां त्यक्तां भानिकरेण तनुभासां समूहेन तनुशोभावृन्देन घनेन सान्द्रेण ॥ ४ ॥

विमलतरेति । रात्रि सपत्नीव कीदृशी विमलतरा निर्मलतरा विमलाम्बरकेण निर्मलगगनेन वस्त्रेण वा मां कीदृशीं मलिनतरामङ्गमार्जनाभावात् विरहज्वालया अतिशयेनादिनागति मलिनां अतएव मलिनाम्बरकेण मलिनवस्त्रेण उपलक्षिताम् ॥ ५ ॥

---

1. क. विमलाम्बुकरेण ।

रुचिरतराशातपविगमेन[1] । आशातापवतीं नियमेन ॥६॥

ललिता हिमचन्दननिचयेन । दलितां मलयज-तापभयेन ॥७॥

इति हरिविरहिवधूवचनानि । रसय रघूत्तमकृतरचनानि ॥८॥

रुचिरतरेति । रुचिरतराऽतिसुन्दरी आशानामातपविगमेन वाशा कीदृशी आशया प्रियसङ्गवासनया यास्तापस्तद्विगमेन वाशा कीदृशी आशया प्रियसङ्गवासनया यस्तापो दुःखं तद्वतीं तदतिशययुक्तां नियमेन आवश्यकत्वेन यदा यदा आशा क्रियते तदा तदैव फलाभावात् तापवतीमित्यर्थः ॥ ६ ॥

ललितेति । ललिता विलसिता हिममेव चन्दनं हिमचन्दनं तेन पक्षे शीतलचन्दनेन मां कीदृशीं दलितां विदीर्णां मलयजादूयस्तापः दुःखं तद्भयेन ॥ ७ ॥

इतीति । इति कविवचनं रघूत्तमेन कृता रचना निर्माणं येषां तानि ॥ ८ ॥

---

1. ख. विशमेन ।
ख, ग. शीतपविशमेन ।

माधवं माधवं प्राप्य स्मरणातिस्मराधिका[1] ।
कामिनी कामिनी तस्मिन् सखीं प्राह स्म राधिका[2] ॥१॥

चतुर्विंशः प्रबन्धः

॥ केदाररागेण[3] गीयते ॥

हे सखि कामं विषमवशेयम् ।
उपदिश कां नु दिशं प्रविशेयम् ।
॥ ध्रुवपदम् ॥

जगदपि मदयति यो विधुरनिशम् ।
व्यथयति मामतिनिखिलांशनिशम् ॥१॥

गोप्यन्तरस्य वचनमुक्त्वा राधिका वचनं वक्तुमाह । माधवमित्यादि । माधवं श्रीकृष्णं धवं स्वमिनं मा प्राप्य स्मरणेन चिन्तनया योऽतिस्मरः अतिकामः तेन आधिर्मनःपीडा यस्याः सा तथा कामिनी उत्तमस्त्री कामिनी अभिलाषिणी तस्मिन् माधवे सखीं प्राह स्म प्रोवाच । राधिका श्रीराधा ॥ १ ॥

हे सखीत्यादि । विषमदशा दुरवस्था उपदिश शिक्षय शेषं स्फुटम् । दुरवस्थां दर्शयति । यो विधुश्चन्द्रः श्रीकृष्णो वा मदयति हर्षयति अनिश निरन्तरं अतीतक्रियाविशेषणम् । निखिलां सकलां निशं रात्रैर्निशावन् नट शद्वोऽपि हनन्तो द्रष्टव्यः पद्यतन्नामासोदित्यादि सूत्रविवरणे पदादयः पृथक् शद्वा इत्यके इत्युक्तत्वात् । ननु बहिः स्थितौ सत्यां चन्द्रस्य दर्शनं तद्वशात् कृष्णस्मरणं तदन्यतरेण तव दुःखम् । तथा च गृहं दावनं वा प्रविशतश्चन्द्रदर्शनाभावादेव दुःखं न भविष्यतीत्याशंक्याह ॥ १ ॥

---

1. ख. ग. स्मराधिकां ।
2. ख. ग. राधिकां ।
3. ख. ग. तेनैवरागेण ।
घ. रागस्योल्लेखो नास्ति ।

गृहमगृहं मम संप्रति जातम् ।

विदहति वृन्दाबनवनजातम् ॥२॥

प्रभवति कुत्र न चन्दनमहिमा ।

तदपि तपति सखि सुखयति न हिमा[1] ॥३॥

चिरमवहं हृदि हारमुदारम् ।

रचयति स च मम[2] हृदयविदारम् ॥४॥

गृहमिति । गृहमगृहं दुःखहेतुरित्यर्थः । तत्रापि हरिस्मरणसत्वात् वृन्दावने वनजातं भाण्डीरकादिद्वादशवृन्दं तदपि विदहति । विशेषेण तपति तत्रापि हरिस्मरणोद्दीप्तेः ॥ २ ॥

प्रभवतीति । ननु तापनिवृत्तये चन्दनादि शीतलवस्तूपलेपनं तनौ कथं न करोषीत्याह । चन्दनमहिमा चन्दनमहात्म्यं सुखजनकत्वं तापनिवारकत्वं तापनिवारकत्वरूपं कुत्र जनेन प्रभवति न सम्भवति । अपितु मां विहाय सर्वत्रैव संभवतीत्यर्थः । स्वविपयेत्यादि परितमाह । मां तादृशं चन्दनमपि शेषं स्फुटम् ॥ ३ ॥

चिरमिति । अस्तु तावत् साधारणस्य चन्दनस्य कर्त्ता किमधिकमतिप्रियस्यापि दुःखदत्वं जातमित्याह । चिरं दीर्घकालं वनप्रवेशपर्य्यन्तं हृदि वक्षसि अवहमूढवती । उदार महान्तं स च महानपि हारः रचयति करोति । मम चिरसेवितायाः हृदयस्य वक्षसो विदारं विदीर्णतां महानपि रचयति विज्ञायाः ममैव करोति इतः परा का दुर्दशेतिभावः ॥ ४ ॥

1, ख॰ ग॰ तपति सुखयति न महिमा ।

2, क॰ घ॰ स च रचयति ।

अनलमिवैमि सुशीतलमरुतम् ।
श्रुतिमतिरुजयति मधुकरविरुतम् ॥५॥
सुन्दरमजनि विलोचनविरसम् ।
रसना कलयति विषमिव सुरसम् ॥६॥
सौरभमपि नहि[1] विशति सदाहम् ।
इति दुर्गतिमुपयामि सदाहम् ॥७॥
रम्यमरम्यमजनि सखि निखिलम् ।
किमिति गिरा मम विषमयमखिलम् ॥८॥

अनलेति । सर्वेन्द्रियविषय एव सर्वेन्द्रियेषु मां दुःखयन्तीत्याह । पञ्चभिः खण्डैः एमि जानामि । रुजयति व्यथयति ॥ ५ ॥

सुन्दरमिति । सुन्दरं वस्तु अजनि जातम् । विलोचनं विरसयति विरसीकरोतीति तथावत् रसना जिह्वा कलयति जानाति विषमिव गरलमिव सुरसं मधुरं वस्तु ॥ ६ ॥

सौरभमिति । सौरभं पुष्पं चन्दनादिसौगन्ध्यं नवि नासिकायां सदाहं कुर्वत् विशति केनापि दुःख निवृत्तिर्नास्ति प्रत्युतदुःखमेवास्तीति उपसंहरति इतीति । इतीदृशां दुर्गतिं दुर्दशां उपयामि प्राप्नोमि । सदा निरन्तरं अहं राधिका तत्र प्रियसखीति साकूतवचनम् ॥ ७ ॥

रम्यमिति । न केवलं पतनमरुदादय पञ्चैव दुःखदाः किन्तु यावन्तः सुखदा पदार्थाः तावन्त एवेत्याह । रम्यं मनोरमं वस्तु अरम्यं तत् विपरीतं दुःखदमजनि जात हे सखीति वाक्य मध्ये सम्बोधनमिति कातर्येण निखिलं सकलं न केवलं रम्यस्येव दुःखदायकं किन्तु तदभिन्नान्युदासीनान्यपि वस्तूनि दुःखदानीत्याह । किमिति अतिगिराऽत्यन्तवाक्येन विमलमित्यर्थः मम श्रीकृष्णविरहिण्याः विषमयं गरलस्वरूपमखिलं सर्वं वस्तु ॥ ८ ॥

---

1. ख. ग. नवि ।

इतिहरिविरहियुवतिरसवचनम् रसय रघूत्तममधुरितरचनम्[1] ॥६॥
प्रियकटाक्षशराहति[2] जर्जराः पृथुलमन्मथजज्वरजागराः ।
अरसय निशि तापविनाशनं मृगदृशो हरिगानरसायनम्[3] ॥२॥

पञ्चविंशः प्रबन्धः

॥ विहङ्गडारागेण गीयते ॥

तरणीकन्यकातीरचारिणं तरलकुण्डलं चञ्चलेक्षणम्
चरणवारिजभ्राजि नूपुरं चरनगाश्रयं[4] कृष्णमाश्रये ।
॥ ध्रुवपदम् ॥ ॥१॥

इतीति । इत्यादि कविवचनं रसयुक्तवक्यं रघूत्तमेन मधुरिता मधुरीकृता रचना निर्माणं यस्य तत् ॥ ६ ॥

प्रियेत्यादि । विरहविकलानां सर्वेभ्यो विषयेभ्यो दुःखहेतुतया भीतानां केवल हरिनामास्वादनं विनाशरण्यमपि पश्यन्तानां तदाचरणेनैव रात्रियापनं वणयन्नाह पृथुलमन्मथाद् जातो यो ज्वरः सन्तापस्तस्माज्जागरा जागरण निद्राभावो यासां ताः अरसय नास्त्र इतिवत्यः कीर्त्तनश्रवणाभ्यामितिशेष । हरेर्गानं सुस्वरगुणकीर्त्तनं तदेव रसायनं विरहव्याधिभेषजं तत् ॥ २ ॥

तरणीति । गीतरूपश्लोकैर्गानं दर्शयति । चरनगाश्रय चरनगानां स्थावरजङ्गमानां आश्रयं यद्वा चरनगेषु आश्रयो निवासो यस्य स तथा तम् । यद्वा चरैर्वा य·· चञ्चले······नग ···व्यवक्ष··· तदारुणः तं कृष्ण शरणं करोमि ॥ १ ॥

---

1. क· मधुरितारचनं ।
   घ· मधुरितिवचनं ।
2. क. पराहति ।
   ख. शराहति ।
3. ख. पुस्तके श्लोकस्यास्योल्लेखो नास्ति ।
4. घ. रच नगाश्रयं ।

धरवरोद्धरं[1] त्रात गोकुलं धरणीभूषणं श्रीपदाम्बुजम् ।
मुरलीकारवै विश्वमोहनं मुरहरं भजे भक्तवत्सलम् ॥२॥
तरुणतल्लजं श्यामसुन्दरं तरुतलस्थितं वंशीकाधरम् ।
अरुणलोचनं तापमोचनं करुणमाश्रये नन्दनन्दनम् ॥३॥
तरलमञ्जुलस्फारहारकं तरललोचनाचेलहारकम् ।
वरतनूगणप्रेमभाजनं वरतमं भजे सत्सभाजनम् ॥४॥

धरवरेति । धरवरं गोवर्द्धनं गिरिश्रेष्ठं उद्धरतीति तथा तम् । धरणीभूषणे श्रीयुक्ते पदाम्बुजे यस्य स तथा तम् । शेषं स्फुटम् ॥ २ ॥

तरुणेति । तरुणतल्लजं प्रशस्ततरुणमित्यर्थः । ननु एकादशवर्षीयस्स श्रीकृष्णस्य कुतः तारुण्यं प्रशस्तं कुतस्तरां वा तत् प्राशस्त्यमिति नाशङ्कनीयम् । तरुणीषु तथाभावसम्भवेन तदुक्तिसम्भवात् । मल्लानामशनिं नृणां नरवरस्त्रीणां स्मरो मूर्त्तिमानित्यत्र तारुण्यमुक्तम् ॥३॥

तरलेति । तरलो हारमध्यस्थमणिविशेषः प्रकृते कौस्तुभ एव तेन मञ्जुलधारं हारो यस्य स तथा तम् । समासान्त कय । तरललोचनानां चञ्चलाक्षीणां गोपीनां तरलहारकः पटचौरस्तं वरतनुगणाः प्रेमभजनानि यस्य येषां प्रेमभाजनं वा यस्तं वरतममतिश्रेष्ठं भजे सेवे । सत् प्रशस्तः सद्भिः सन्सु वा सभाजनं प्राणिनां सेवनं वा यस्य स तथा तम् ॥ ४॥

---

1. क· धरोत्वरोद्धतं ।

मुदिरसुन्दरं विद्युदम्बरं मुदिरमुत्तमं गोपसुभ्रुवाम् ।
मुदितकारणं भक्तिकारिणां मुदितमाश्रये श्रीनिकेतनम् ॥५॥
मधुसखोपमं केलिलालसं मधुकरत्विष पीतवाससम् ।
मधुरभाषिणं[1] चारुहासिन मधुवनप्रियं[2] कृष्णमाश्रये ।६॥

मुदिर इति । मुदिरः मेघ इव सुन्दरस्तं विद्युदिवाम्बरं हस्तं यस्मिन् स तथा मुदिरं कामुकमुत्तममुत्कृष्टं गोपसुभ्रुवां व्रजसुन्दरीणां सहितं हर्षं कर्तुं शीलमस्य स तथा तम् । भक्ति कारिणां भजनवरण शीलानामितिशेषः मुदितानि हर्षनिमित्तानि भक्तिसुखकारिणां आश्रये भजामि । श्रीनिकेतनं श्रीनिवासं लक्ष्मीनिवासमित्यर्थः ॥ ५ ॥

मधिवति । मधुसखो वसन्तसखो मदनः स उपमा यस्य स तथा तम् । तुल्योपमा शब्दसादृश्यवत्वात् कथं समानाधिकरणबहुव्रीहिरिह संगच्छते इति नाशङ्कनीयम् । तुल्यार्थैरतुलोपमा शद्वयोस्तुल्यार्थतया दर्शितरसे सम्भवति च समानाधिकरणे बहुव्रीहौ व्यधिकरणस्य तस्याश्रयेणानौचित्यात् मधुरं मनोहरं यथा स्यात्तथा भाषितुं शीलमस्येति त तथा तम् । विशेषणान्तर मपीत्थं मधुवनं श्रीवृन्दावनं तदेव प्रिय यस्य स तथा तम् ॥ ६ ॥

---

1. ख. ग. मधुर हासिनं
2. घ. निधुवनप्रियं ।

जनकमुल्लसद्भोगसंपदां जनगणेक्षणप्रीतिवर्द्धनम् ।
घनरसप्रदं तापनाशनं घनमहं सदा[1] कृष्णमाश्रये ॥७॥
विधुरिदृङ्मुदां साधुमुज्वलं विधुमहं भजे तापनुत्तये ।
विधुरिताखिलध्वान्तसञ्चयं विधुतराधिकामानसंज्वरम् ॥८॥

जनकमिति । कृष्णं घनं अहं विरहतापयुक्ता सदा निरन्तरमाश्रये अवलम्बे । ननु किमर्थं कृष्णमेघमवलम्बसे इत्याशङ्क्याह तापनाशनमिति । ननु कृष्णमेघस्यैकेन व्यापारेण तापनाशकत्वमित्यापेक्षयामाह । घनरसप्रदमिति । ननु घनरसदानमात्रेण न क्षुधादितापनाशकत्वं कृष्णस्येत्याशङ्कायामाह । जनकमुल्लसद्भोगसम्पदामिति न केवलं परंपरया तस्य सुखप्रदत्वं साक्षाद् प्रीतिवर्द्धकमाह । जनेति । जनगणानामीक्षणानां नयनानां वा ईक्षणे दर्शनेन वा प्रीतिवर्द्धनं सुखवर्द्धनम् । अत्र तापघनरसशब्दानां श्लेषो द्रष्टव्यः घनरसशब्दस्य कृष्णपक्षे घनानुरागोऽर्थः भोगमदस्य मेघपक्षे अस्यार्थः॥ ७ ॥

विधुरिति । तापनुत्तये ज्वालानाशाय विधुमहं विरहिणी भजे सेवे । विधुं कीदृशं विधुरितो विश्लेषितोऽखिले सर्वत्र ध्वान्तसञ्चयो येन स तथा तम् । पुनः कीदृशं विधुतो दूरीकृतो राधिकाभिमानमभिमानं एव सज्वरः संतापो येन स तथा तम् । पुनः कीदृशं दृङ्मुदामालोचनसुखानां विधुरि विदष्टायां धुरि भारो साधुं निपुणं साधकमित्यर्थः । पुनः कीदृशं उज्वलं दीप्तिमन्तं अत्रविधुरिताध्वान्तविधुतशब्दानां चन्द्रकृष्णौ अन्धकारज्ञाने नक्षत्रविशेषे वृषभानुसुतेति अर्था बोध्या शेषं स्फुटम् । ८ ॥

---

1 क कदा ।

हरिहयस्फुरद्गर्वखर्वकं हरिणलोचनाप्राणवल्लभम् ।
हरितवाससं सुन्दरस्मितं हरिहरात्मकं कृष्णमाश्रये ॥९॥
परविचारिणां ब्रह्म केवलं परमदैवतं भक्तिशालिनाम् ।
परपतिं तथा गोपसुभ्रुवां परमहं भजे कैटभद्रुहम् ॥१०॥

हरिहयेति । हरिहय इन्द्रः तस्य स्फुरन् प्रकाशमानो गर्वोऽहंङ्कारस्तस्य खर्वकं क्षुद्रकरणं गोवर्द्धनधारणेन तन्न भङ्क्ति ध्येयम् । हरिणलोचनानां गोपीनां प्राणेभ्योऽपि वल्लभं यद्वत्तासां प्राण इव वल्लभः 'प्रियस्तं' हरितवाससं पीताम्बरं सुन्दरस्मितं यस्मिन् स तथा तम् । हरिहरात्मकं श्रीहरिहरौ चतुर्भुजपञ्चाननौ आत्मनो मूर्त्तिर्यस्य स तथा तम् । यद्वा हरिहरात्मनोः विष्णुशिवशरीरयो क आत्मा तं यद्वा हरिश्च हरश्च कः आत्मा स्वरूपं यस्य स हरिहरात्मकस्तम् । यद्वा हरिहरात्मा चासौ को ब्रह्मा चेति हरिहरात्मकः विष्णुशिव चतुरा-ननस्वरूपस्तम् । 'त्रयाणामेकभावानां यो न पश्यतिवै भिदाम् । सर्वभूतात्मनां ब्रह्मन् स शान्तिमवगच्छति ॥'' इति श्रीभागवतवचनात् यो वै विष्णु स वै रुद्र यो रुद्रः स पिता महेति "एकमूर्त्तिस्त्रयो देवा रुद्रविष्णुपितामहाः" इति महाभारतवचनात् ॥ ९ ॥

परेत्यादि । परमुत्कृष्टं यद् वस्तु तद् विचारिणां वेदान्तिनां केवलमद्वैतः सजातीयस्य गतभेदशून्यं ब्रह्मभक्तिशालिनां साकारोपासकानां परमदैवतं गोपसुभ्रुवां गोपसुन्दरीणां परपतिमुपपति वेत्यर्थः । पर केवलं जगतः परं विलक्षणं वा कैटभद्रुहं श्रीविष्णुं श्रीकृष्णरूपं भजे सेवे ॥ १० ॥

रतिपतिज्वरव्यस्तचेतसां रतिरसोज्वल कन्दलीदृशाम् ।
यतिमनोरमं गीयतां वचो यतिरघूत्तमोद्गीतमुत्तमम् ॥११॥

इति गुणगणगानं कुवितीनां मुरारे-
रतिरतिपतिवाधावाधनायाङ्गनानाम् ।
अजनि रजनिशेषो भावली मन्दभासः
सकल-कलपतङ्ग पूर्वदिग्रागरङ्गः[1] ॥३॥

रतीति । कवि वचनम् । कन्दल दृशां मृगदृशां यतिमनोरमं यतिर्जिह्वा विरामस्थानैः सुन्दरं यतीनां सन्यासीनां मनोरमं वा यतिश्चासौ रघूत्तमश्चेति स तथा तेन उद्गीत-मुत्कृष्टगीतं इकारन्तयोर्यतिपदयो रूपदानान्न पुनरुक्तिः ॥ ११ ॥

इतीति । अनेन प्रकारेण रजनीशेषोऽजनि । किंभूतः भानां नक्षत्राणामावली समूहः तस्य मदोऽऽल्पोभासो यस्मिन् स तथा । पुनः कीदृशः सकलकलाः कलकल शब्दमाहृताः पतङ्गाः पक्षीणो यस्मिन् स तथा । पुनः कीदृशः पूर्वदिग्भागो रङ्गो रागो रक्तता यस्मिन् स तथा ॥ ३ ॥

---

1. ख ग पूर्वदिग्भागभङ्ग ।

तनुरिव तनुरासीद्यामिनीकामिनीनां
विधुरपि[1] विधुराणां गण्डवत्पाण्डरश्रीः ।
हरिहरिदपि रक्ताद्दृष्टिवज्जाग्रतीना-
मुपवनो पवनोऽभून्नेत्रवन्मन्दमन्दः ॥४॥

विलसदलसगात्रा घूर्णदारक्तनेत्रा
गतनिजनिजशाला वायुपस्पृश्य बालाः ।
तमधिहृदरविन्दं ध्यायमाना मुकुन्दं
व्यधिषत[2] सदनीयं कर्म यत्साधनीयम् ॥५॥

इति श्रीमुकुंदविलासे महाकाव्ये यतींद्ररघूत्तमतीर्थकृतौ
गोपीविरहप्रजागरणो[3] नामाष्टमः सर्गः ।

तनुरित्यादि । तनुमिव शरीरमिव तनु क्षीणा कृशा विधुरपि चन्द्रोऽपि विधुराणां श्रीकृष्णविरहयुक्तानां गोपीनां गण्डवत् कपोलवत् पाण्डरश्रीः रूक्षशुक्लकान्तिरित्यर्थः । हरिः हरिदिक् पूर्वदिगित्यर्थः । दृष्टिवत् चक्षुर्वत् जाग्रतीनां भाववर्तीनां स्वल्पस्वल्पस्पन्दन-शालिनी जागरजन्यानन्देन यानि नेत्राणि उदयन् मन्दमन्दः सालसगतिर्मन्यते ॥ ४ ॥

विलसदित्यादि । वायुपस्पृश्य स्नात्वेत्यर्थः । गता निजनिज शाला याभिस्ताः गतनिज निज शालाः त दृष्टपूर्वं अधिहृदरविन्द चित्तपद्मे ध्यायमानाश्चिन्तयन्त्यः व्यधिषतः अकार्षुः कृतवत्य इत्यर्थः सदनं सदनसम्बन्धि गृहसम्बन्धि कर्म यत्प्राय कर्त्तव्यं शेषं व्यक्तार्थः ॥ ५ ॥

इति श्रीमुकुन्दविलासप्रकाशिकायामष्टमः सर्गः ।

1, ख. ग. विधुरिव विधुराणां ।

2, क. व्यधिगत ।
ख. व्यधिरित ।

3. ख. ग. प्रजागरो ।

नवमः सर्गः

दधिमथनजशब्दैर्गोतर्कैर्गोपीकानां
प्रतिजननिसुरावैर्द्धावतां[1] तर्णकानाम् ।
मधुरमुरलीनादैर्मञ्जुगोदोहघोषै
र्व्रज उषसि विरेजे निर्मिताशेषतोषैः ॥ १ ॥

प्रणयवशयशोदाभोजितोन्मार्जिताङ्गः
कृतनवनटवेशो ध्मातसुध्वानशृङ्गः ।
निरगमयदुपेन्द्रो गोष्ठतश्चारणार्थं ।
करकमलगवेत्रं घूर्णयन् धेनुसार्थम् ॥ २ ॥

दधिमथनेति । दधिमथनकृता ये शब्दा ध्वनिविशेषः तैर्गीतर्कैः शिवत्रिणष्वादिगानैः प्रतिजननी जननीः प्रतिधावतां द्रुतगतिमतां तर्णकानां वत्सानां सरावैरुपलक्षितानां मधुरा मधुरा मनोहरा ये मुरलीनादाः वेणुध्वनयः मञ्जवो मनोहरा ये गोदोहघोषाः भाण्ड मध्यपतितस्तनदुग्धधारासमूहजन्यध्वनयः तैः । व्रजे गोपालनिवासस्थाने उषसि प्रातःकाले विरेजे शुशुभे । दधिमथनशब्दानां तृतीयान्तानां सर्वेषां विशेषणमाह । निर्मितो जनितोऽशेषाणां सर्वेषां तोषोहर्षो यैस्ते तथा तैः ॥ १ ॥

प्रणयेत्यादि । प्रणयवशा या यशोदा श्रीकृष्णजननी नन्दपत्नी तया आदौ भोजितः पश्चादुन्मार्जिताङ्गः यद्वा आदावुन्मार्जिताङ्ग पश्चाद्भोजितः स तथा कृतो नवनटस्येव वेशो यस्य स तथा । ध्मातः शंखतः सुध्वानं सुध्वनिनिकरं शृङ्गं येन स तथा । निरगमयत । उपेन्द्रः श्रीकृष्णः गोष्ठतः गोस्थानात् करकमलाङ्गदक्षिणपाणिपद्मस्थं वेत्रकृतं चित्रवेत्रं घूर्णयन् भ्रामयन् वामहस्तेन शृङ्गं धृत्वा वादयन्नयमिति ध्येयम् । धेनुसार्थं धेनुसमूहं अत्र स्वभावोक्तिरलंकारो ज्ञेयः ॥ २ ॥

---

1 क॰ प्रतिजननीपुरावैर्द्धावतां ।

विलसदधरविम्वं सव्यहस्तेन नीतं
दरकुटिलशिरोधिः शेषभागोपरीतम् ।
प्रतिसखिविदधानोऽरन्यलीलासु रङ्गं
सुमधुरमधिदध्मौ[1] लाङ्गली चारुशृङ्गम् ३

निजनिजजननीभिर्योजितः प्रातराशै-
स्त्वरितगतिविलासैः क्रीडिताविष्कृताशैः ।
पथि सपदि पुरोनिःसारितैर्धेनुजालैः
सहरणित[2] विषाणैर्निर्गतं गोपवालैः ४

विलसदिति । कृष्णं वर्णयित्वा वलभद्रं वर्णयति । विलसदरुणवर्णेन मध्यकुञ्चितत्वादिना च शोभमानमधरविम्वं पक्वविम्वफलवन् रदनछदं नीतं प्राप्तं सव्यहस्तेन वामपाणिना धृत्वेत्यर्थः । शेषभागेन उपरिऊर्ध्वं इतं गतं चारुशृङ्गं सुमधुरं यथा स्यात् तथा । लाङ्गली श्रीवलदेवः अधिकं दध्मौध्मातवान् । कीदृशः दरमल्पं कुटिलो रक्तः शिरोधिः कन्धरो यस्य स दरकुटिलशिरोधिः किं कुर्वन् किं कर्त्तुं दध्मौ तदाह । प्रति सखि सायं प्रति सर्वेषु सखिषु अरण्य लीलासु प्रयोगेषु रङ्गं कुतुकं विदधानः कुर्वन् अत्रापि पूर्वदलंकारः ॥ ३ ॥

निजनिजेति । श्रीकृष्णश्रीवलदेवयोः शृङ्गवादनानन्तरं किं जातं तत् वर्णयति । योजितः कारितः प्रातर्भोजनं प्रातकालभोजनं यैः त्वरितगतिभिः शीघ्रगमनैर्विलासः शोभा येषा ते तथा तैः धेनुजालैः । कीदृशैः पुरो निःसारितैरग्रे निर्गमितैः ॥ ४ ॥

1. क दध्मौ । 2, ख. ग. सहतरणित ।

रचितरुचिरवेशैश्चन्द्रकोन्नद्धकेशै-
र्गवलकलनिनादै[1]रुल्लसद्वेणुवाद्यैः ।
सुवलमुखवयस्यैर्मञ्जुलास्यैः सहास्यैः
सहविहरण[2] तृष्णौ रेजतू रामकृष्णौ ॥ ५ ॥

रचितेत्यादि । चन्द्रकैरुन्नद्धाः ऊर्ध्वीकृत्यवद्धाः केशा यैः ते तथा तैः । गवलकलनिनादैरुपलक्षितैः सुवलमुखवयस्यैः सुवलादिसखैः सह रामकृष्णौ रेजतुः विभ्रमतुः शेषं व्यक्तं रामकृष्णावितिति द्विवचन शरीरापेक्षं न ईश्वराद्धों पक्षं तस्यैकत्वात् । एकस्मिन् परमात्मनि वाधात् । यो वै रामः स वै कृष्ण योरामः कृष्ण एव सः । यस्तयोर्नान्तरं वेत्त इतिस्कन्दवचनात् ननु प्रकृतार्थान्वितत्वंव व्यापकते प्रत्ययानामिति नियमो अस्ति तथाच रामकृष्णाविति द्विवचनार्थमद्वैतम् । रामकृष्णशब्दार्थे एकस्मिन् परमात्मनि वाधात् अन्वयाभावात् स नियमो भग्न इति नाशङ्कनीय तीर्थस्य शरीरद्वयविशिष्टपरमात्मन एकत्वेपि विशेषणयो द्वित्वस्यासम्भवेन तयोरेव प्रकृत्यर्थैकदेशयोरन्वयसम्भ न् यथा घटाकाशौ मठाकशौ इत्यादावाकाशस्य एकत्वेऽपि विशेषणत्वान् तथा प्रयोगः साधुरेव प्रकृतेऽपि बोद्धव्यम् ॥ ५ ॥

---

1 क नादै ।

2 ख. वितरण ।

रजनीरुचिरचेलौ बालमातङ्गखेलौ
मणिरसलसदंशौ पिच्छगुञ्जावतंसौ[1] ।
विधृतगवलवेत्रौ स्मेरवक्त्रौ सुनेत्रौ
हरिमणिसितकृष्णौ रेजतू रामकृष्णौ ॥ ६ ॥

वनभुवि शिशवस्ते साधुसंचार्य ता गाः[2]
सुरसयवसराशिग्राससंजातरागाः[3] ।
विविधबहुविहारा रेमिरे काननान्ते[4]
मृदुमरुति सुचारु छायके तत्र कान्ते[5] ॥ ७ ॥

रजनीत्यादि । रजनी रात्रि हरिद्रे ते इव रुचिरे सुन्दरत्वे नीलपीते चेले वस्त्रे ययोस्तौ तथा । बालमातङ्गाविव खेलौ खेलन्तौ मणिसमूह मुक्तादिरत्नमालाभ्यां लसन्तः अंशाः भुजराशि चत्वारि ययोस्तौ तथा हरिर्मणि चन्द्रकान्तेन्द्रनीलौ ताविव सितकृष्णौ शुक्लनीलौ तथा शेषं स्फुटम् ॥ ६ ॥

वनभुवीति । ते शिशवो रामकृष्णसुबलादयः वनभुवि ताः गाः धेनुः साधु यथा स्यात्तथा । संचार्य्य नवघासभक्षणार्थं प्रयोज्य रेमिरे इत्यन्वयः । गाः कथंभूता सुरसस्य सुमधुरस्य यवसग्रासे नूतनतृणपुञ्जस्य ग्रासे संजातो रागो बुभुक्षा यासां तास्तथा ते तत्र कीदृशः सन्व रेमिरे तदाह । काननान्ते वृन्दावनमध्ये विविधा अनेकप्रकारः बहवो विहारा येषां ते तथा किं भूते काननान्ते मृदुमरुति सुचारुछायके उभयत्र बहुव्रीहिः । कान्ते काननान्ये बहुविहाराः रेमिरे इति पुनरुक्तिर्नाशङ्कनीयम् । मधुरां वाचमूचे इत्यादाविव दोषाभावात् यद्वा रेमिरे प्रीता बभूवुरित्यर्थः ॥ ७ ॥

---

1. क. पिच्छपुच्छावतंसौ ।
2. क. ग. शास्तां ।
3. क. संजातरोगाः ।
4. क. तत्रकान्ते ।
5. क. काननान्ते

शिशुगणरमणीयं गोधनप्राणणीयं[1]
निखिलपतियशोदानन्दनानन्दनीयम् ।
वनवरमभिवीक्ष्य प्रीयमाणोऽतिवेलं
सुवल[2] इदमगायत् केशवान्ते सखेलम्[3] ॥ ८ ॥

शिशुगणेति । श्रीवृन्दावन वर्णयितुमाह । शिशुगणस्य भक्तस्य रमणीयं क्रीडाधिकरणं गोधनस्य प्राणनीयं प्राणिनामधिकरणं यद्वा गोधनं प्राणनीयं येन तत् निखिलपतिश्चासौ यशोदानन्दनश्चेति मासः तस्य नन्दनीयं आनन्दाधिकरणं सततमानन्दो भवतीत्यर्थः । यद्वा तेन आनन्दनीयमानन्दयितव्यम् । यत्र द्विजद्रुममृगा पुलकान्यबिभ्रन्निति श्रीभागवते वनीभूत गुणामध्यानन्दः आनन्देनोक्ते वनवरं वनेभ्यो वरं श्रेष्ठं बनवरं श्रीवृन्दावनं अभिसर्वतो वीक्ष्य दृष्ट्वा प्रीयमाणः प्रीतिमानः सन् इदं वीक्ष्यमाणं अतिवेलमत्यर्थं यथा स्यात् तथा आशयादित्यर्थः केशवान्ते श्रीकृष्णसमीपे सखेलं खेलासहितं यथा स्यात् तथा ॥ ८ ॥

1. क. प्रापणीयम् ।
2. ख. ग. सुवलमिद ।
3. घ. पुस्तके अष्टमसर्गस्य "तनुरिव तनुरोसीद्···पबनोऽभून्नेत्रवन्मन्दमन्दः···श्लोकादारभ्य 'शिशुगण रमणीयं···वनवरमभिवीक्ष्य'···इत्यन्तं यावत् पत्रमेकं विनष्टम् ।

षड्विंशः प्रबन्धः

॥ तोडिरागेण गीयते ॥

राजति वृन्दावनमतिरुचिरम् ।

यदखिलपति मति[1] रमयति सुचिरम् ।

यामुन[2] नलिन वनागतमरुतम् ॥

॥ ध्रुवपदम् ॥

पिकशुकभृङ्गमृगादिक[3] सुरुतम् ॥ १ ॥

विकचविविधकुसुमावलिवलितम् ।

फलभरकृतनतितरुततिललितम् ॥ २ ॥

राजतीति । यत् यस्मात् अखिलपतिमपि सर्वेश्वरमपि श्रीकृष्णरामरूपं सुचिरं रमयति प्राणयति विहारयति वा अतोऽतिरुचिरमित्यर्थः । यमुनेति इत्यादौ बहुव्रीहिः । पिकादिकैः सुरुतं तत् तथा अधिकरणेत्युक्तोऽत्र ज्ञेयः ॥ १ ॥

विकचेति । कुसुमावलिभिर्वलितं वेष्टितं तत्तथा फलभरेण कृतानतिर्यासां तादृशीस्तरुततिभिर्ललितं मनोहरं तत्तथा ॥ २ ॥

---

1. क· पतिरपि ।
2. ख, ग· यमुना ।
3. ख· मृगामृचिरदिन ।

हिममकरन्द[1] वर्षणविततम् ।
तटनटचन्द्रकसन्तति[2] सततम् ॥ ३ ॥

स्थलनलिनीवनरणदलिमिलितम् ।
गोधनसहितहरिणशतचलितम् ॥ ४ ॥

सह तर्णकमृगशावकचरणम् ।
अहि नकुलादिपरस्परशरणम् ॥ ५ ॥

निस्तुलतुलसीसौरभभरितम् ।
स्मरणकृतामपि[3] विधुरितदुरितम् ॥ ६ ॥

हिमेति । हिमस्य शीतस्य मकरन्दस्य पुष्परसस्य वर्षणे वृष्टिभिः वितत सर्वतोव्याप्तं तत्तथा । तटेषु नटा नटन्तो ये चन्द्रकाः मयूरास्तेषां सन्ततिभिः श्रेणीभिःसततं सम्यक् व्याप्त तत्तथा । समुखसर्गस्य मकारलोपोऽत्र ज्ञेयः । यद्वा सन्ततिपर्यन्तो बहुव्रीहिः सततमिति क्रिया विशेषणम् ॥ ३ ॥

स्थलेति । स्थलनलिनीवने रतान्तालये मिलिता यत्र तादृशैरलिभिर्वा मिलितं तत्तथा गोधनेन सहिता सङ्गता मिलिता ये हरिणास्तेषां शतेन चलित यत्र तत्तथा ॥ ४ ॥

सहेति । सहतर्णका गोवत्स सहिता ये मृगशावकाः हरिणशिशवः तेषां चरणं गमनं तृणभक्षणं वा यत्र तत्तथा । अहिनकुलादयः नित्यं वैरिणो ये दन्तवः ते परस्परमन्योन्यं शरणं रक्षणं परे नतु हिंसका यत्र तत्तथा ॥ ५ ॥

निस्तुलेति । निस्तुलं निरुपमं यत्तुलसीसौरभं तस्य भरो विषयः सः जातः इतस्ततः प्रादुर्भूतो यस्मिन् तत्तथा । तारकादित्वादिति स्मरणकृतां चिन्तामात्रकृतां अपि कारेण कौमुदीन्यायेन अन्येषां सेवादिकारिणां का कथेत्यर्थः । विधुरितानि विश्लेषितानि दुरितानि पापानि येन तत्तथा ॥ ६ ॥

---

1. ख. ग. हिममकरन्द । 2. क. तटनट चन्द्रकिशलय । 3. क. स्मरकृतामपि ।

हरिहरपदकपरिस्फुरदचलम् । कन्दर[1] कन्दयवसलसदचलम् ॥७॥
नृप सदनाधिक कुञ्जकभवनम् । अविरतविरतषडुर्मिज[2] दवनम् ॥८॥
निरवधिसत्वनिकरसुखकरणम् । भवतु रघूत्तममानसहरणम् ॥९॥

कृष्णोऽथ सख्युर्विरतौ कथायाः
कृत्वानुकारं विरहव्यथायाः ।
सालंक्रिया सर्वगुणाभिरामां
बभाण वाणीमिवदिव्यरम्याम्[3] ॥६॥

हरिपदेति । हरेः श्रीकृष्णस्य रामकृष्णरूपपदैश्चरणैः पदचिह्नैश्च परितः सर्वतः स्फुरन्ति शोभमाना अचला भूमि यत्र तत्तथा । कन्दराणि गुहाः कन्दाः मूलविशेषाः स्वादवो भक्षणयोग्याः यवसानि तृणानि च तैः लसन् अचलो गोवर्द्धनगिरिः यत्र तत्तथा ॥ ७ ॥

नृपेति । नृपसदना राजगृहादपि अधिकमुत्कृष्टं कुञ्जकभवनं निकुञ्जगृहं यत्र तत्तथा । अविरतं सदा विरतं निवृत्तं तापर्मिजं दवनमुपतापो यत्र तत्तथा । कामक्रोधौ लोभमोहौ क्षुधातृष्णेति षडुर्मयः ॥ ८ ॥

निरवधीति । निरवधि निरन्तरं सत्वनिकरस्य प्राणिसमूहस्य सुखकरणं ये तत्तथा । रघूत्तमस्य कवेर्मानसं हरणं मनोहरं सर्वविषयेभ्यो निवृत्तय स्वविषये मनः स्थापकं भवत्वित्यर्थः ॥ ९ ॥

कृष्ण इति । श्रीकृष्णस्य गोपीविरहवेदनानाट्यं वर्णयितुमाह । अथ विरताविति पौनरुक्त्यदोषाय द्वावर्थौस्त इत्यादि वत । यद्वा अथ सुवलगीतश्रवणानन्तरमित्यर्थः । विरतौ विरामसत्यां अनुकारं नटवदनुकरणं बभाण शेषं व्याख्यातम् । ॥ ६ ॥

1. क. कदर ।
2. क. बिरतडुर्मिज ।
3. ख. ग. दिव्यरामां ।

सप्तत्रिंशः प्रबन्ध

॥ सारङ्गरागेण गीयते ॥

प्रियसख पश्य विधिं मयि वामम् ।
जगदानन्दकवृन्दावनमपि मामुपतपति निकामम् ।
॥ ध्रुवपदम् ॥

नलिनवनादपि[1] मरुदपि जनयति मदनदहनपरिणाहम् ।
सुतनुतनूपमचम्पकततिरपि रचयति लोचनदाहम् ॥ १ ॥

प्रियसख्येत्यादि । प्रियसखेति सम्बोधनेन सुवलस्य अतिविश्वासस्थानतया हरेः निवेदनयोग्यत्वमुक्तम् । वामं प्रतिकूलं विधिमीश्वरं अदृष्टं वा पश्येत्यन्वयः । प्रतिकूलत्यन्वयः । प्रतिकुलत्वफलं दर्शयति । जगदानन्दकं जगत् सुखदं यत् वृन्दावनं त्वया इदानीमपि प्रशस्तं मां गोपीविरहितं नन्दनन्दनं उपतपति दुःखयति । निकाममत्यन्तं नलिनेति एतत्खण्डं स्फुटम् । सुतनूतां तनूपमया कान्त्या सौन्दर्येण सौगन्धेन च तनू सदृशी या चम्पकततिः चम्पकपुष्पश्रेणी सा लोचनदाहं रचयति करोति ॥ १ ॥

---

1. घ. नलिनवनवनागत ।

गोपयुवतिरिव मामिह विध्यति नयनशरैर्मृगपाली ।
स्मरयति मां तु[1] नितम्ववती गतिमलसगहंसवराली[2] ॥ २ ॥
युवतिकुचाविव कोकमिथुनमपि हृदयं हरति मदीयम् ।
भीरुभ्रकुटिरिव मामतिदरयति[3] यामुनलघुलहरीयम् ॥ ३ ॥
सुदतीस्मितमिव सितकुसुमावलीरपि कुरुते मम मोहम् ।
वन्धुककिशलयविम्बदृशा भृशमवलाधरतृषितोऽहम्[4] ॥ ४ ॥
सुमुखीमुखमिव हिमकमलमपि नयति नयनमुपतापम् ।
रमणीगिरमिव मधुरमधुरमपि न सेहे शुकपिकलापम् ॥५॥

गोपेति। मृगपाली मृगश्रेणी स्मरयति सोत्कण्ठं यथा स्यात् तथा स्मारयति । नितम्बवतीनां प्रशस्तातिशयितनितम्बयुक्तानां गतिर्गमनं अलसे सालस्यां अलसेनालस्येन वा गच्छतीति हंसवराणामाली श्रेणी चासौ हंसश्चेति कर्मधारयः ॥ २ ॥

युवतीत्यादि सुगमम् ॥ ३ ॥

सुदतीत्यादि खण्डं स्फुटम् । वन्धुको वन्धुककुसुमं किशलयान् नवदलं विम्बं पक्वविम्बं फलं तेषां दृशां दर्शन भृशमतिशयं अवलाधरतृषितः तरुण्यधरे भृशं तृषितः पिपासुरित्यर्थः ॥ ४ ॥

सुमुखीत्यादि खण्डं सुगमम् । शुकपिकयोर्लापं लपनं शब्दमित्यर्थः ॥ ५ ॥

---

1. घ० मलयहिमांशु ।
2. ख. ग. गतिमलगहंसबराली ।
3. क. घ. मां हरयति ।
4. घ. भृशमधुनाधरतृषितोहं ।
5. क. गिरिमिव ।

दिशिदिशि विततकुसुमशरपञ्जरमजनि लताकुलजालम् ।
काममृगयु रति[1] दारुणमतिरिह हन्ति मनो मृगबालम्[2] ॥ ६ ॥
अतिमनुजानुकरण[3] मिदमच्युतभाषितमतिरमणीयम् ।
सुयतिरघूत्तमभणितमनूत्तममतिरसिकै[4] रसनीयम् ॥ ७ ॥

दिशिदिशीत्यादि स्फुटम्। काममृगयुः काममृगदर्शने मृगवालं इह वृन्दावने हन्ति विद्धं करोति ननु का तस्य सामग्री यया मनो मृगशिशुं वन्दीकृत्य हन्तीत्यपेक्षयामाह। दिशि दिशि सर्वासु दिक्षु विततानि यानि कुसुमानि तान्येव शरणपञ्जरं यत्र तादृशं लताकुल जालं लतासमूहवागुरा अजनि जातं अतो मनो मृगशिशोः पलायनमपि न सम्भवतीति भावः। शिशौ सर्वेषां दया भवति अस्य तु अतिनिष्ठुरत्वात् सापि नास्तीत्याह । अतिदारुणमतिः अतिदारुणा मतिर्यस्य मतिर्बुद्धिर्मनो वा यस्य स तथा ॥ ६ ॥

अतीत्यादि कवि वचनम्। अति अत्यन्तं मनुजानुकरणं मनुष्यानुकरणं मनुष्ये यथा कामातुरः सन् प्रलपति तथा जगदीश्वरस्य कामरहितस्य प्रलपदमनुकरणमेव नटस्येव न तु वास्तवं कामिनां दर्शयन् दैन्यस्त्रीणां चैव दुरात्मतां इति श्री भागवते दशमे शुकवचनात् स्त्री-संशिनां गतिमति ·थमं चचारेति श्रीरामचरिते शुकवचनात् त्वात्मन परस्य तनुभृज्जननां-ध्येह माया विडम्बनमवेहि । यथा नटस्येकादेशे शुकवनात्र इत्यलंविस्तरेण सुयतीति सुन्दरयतिर्यत्र भणिते तत्कविविशेषणं वा शेषं स्फुटम् ॥ ७ ॥

---

1. क· काममृगयरति ।
2. ख· ग· मृगजालं ।
3. ख. ग· अतिमनुजामनुकरण ।
4. क· भणितमनूत्तममरसिके ।

तीरेषु नीरेषु कलिन्दजायां
गोवर्द्धने सानुषु कन्दरायाम् ।
भाण्डीरमुख्योपवनेषु तेषु
प्रकीर्णवृक्षेषु च पुष्पितेषु ॥१०॥

कुञ्जेषु गुञ्जद् भ्रमरव्रजेषु
स्थलेषु निर्धूलिषु मञ्जुलेषु[1]
रेमे रमेशः सखीभिः सुखेषु
प्रशाद्वलेषूत्तमसैकतेषु[2] ॥११॥

तीरेष्विति । रेमे रमेश इति श्लोकोन्वयः । यमुनायां जलेषु तीरेषु चेत्यन्वयः । ननु यमुनाया इति षष्ठी वक्तुमुचितं कथं ··· मुक्ता इति नाशङ्कनीयम् । अधिकरणत्वविवक्षणात् यथा वृक्षमूलेऽग्रे च लतावेष्टितेत्यत्र न विरोधस्तद्वदित्वापीति ध्येयं ननु मूलमग्रं वा वृक्षस्य यथा तथा यमुनायाः नीरमिव तीरं तस्य यमुनामध्यस्थितत्वाभावादिति नाशङ्कनीयम् । गङ्गायां घोषः मत्स्यैस्तः इत्यत्र यथावृत्तिद्वयेन एक एव गङ्गापदेन तीरनीरयोर्बोधस्तथा इहाप्य-विरोधात् यद्वा यमुनायां रेमे इति सामान्येनोक्त्या विशेषमाह । तीरेषु तीरविशेषेषु नीरेषु नानाप्रदेशस्थलेषु इति द्रष्टव्यम् । वर्द्धने इत्यपि तथैव बोध्यं भाण्डीरो वृन्दावनमध्यस्थ वटविशेषः तन्नामा वनमपि बोध्यम् । तन्मुख्यं प्रधानं येषां तादृशेषूपवनेषु द्वादशसंख्यकेषु प्रकीर्णा विस्तीर्णा ये वृक्षास्तेषु पुष्पपुष्पितेषु पुष्पयुक्तेषु इति वृक्षाणां वनानां तरुणामात्मानं यथासम्भवं विशेषणं बोध्यम् ॥ १० ॥

कुञ्जेष्विति । सखीभिः सहचरैः सह सुखेषु सुखकरेषु इति पूर्ववत् सर्वेषां विशेषणम् । प्रशाद्वलेषु उत्तमेषु सैकतेषु वालुकामयेषु ॥ ११ ॥

---

1. घ. मञ्जुलेषु ।

2. ख. पुस्तके श्लोकस्यास्य लेखो नास्ति ।

स्वान्दोलितायां[1] सुखदोलिकायां
गायन् मुकुन्दः सखीभिः सनन्दः ।
उड्डीनपीताञ्चलमौलिपिच्छ
शिखेल खेलासु चकासदिच्छः ॥१२॥

इत्येवमादिं सविधाय खेलां
निभाल्य भानुं गतमस्तबेलाम् ।
धेनूः समाहूय विषाणरावैः
ससार घोषं सह गोपबालैः[2] ॥१३॥

स्वान्दोलितेति । स्वयमान्दोलितायां वृक्षशाखायां आवद्धा ॰लम्वमाना द्विगुणी कृता दृढरज्जुद्वयपातिता आसनविशेषे दोलनक्रियासाधनवस्तुविशेषे कथं भूतायां सुखा सुखकरा दोलिका दोला यस्या सा तथा तस्यां गायन् गीत च गायन् सखीभिः सह उड्डयने उड्डीयमाने पीताञ्चलमौलिपिच्छे यस्मिन् स तथा खेलेन खेलासु क्रीड़ासमूहेषु चकासती उदयन्तीति यस्य त तथा ॥ १२ ॥

इत्येवमिति । भानुं सूर्यं अस्तस्यास्ताचलस्य वेलां सीमां वेला कालं वा गतं प्राप्तं शेषंस्फुटत् । गोपवालैः वालकैः ॥ १३ ॥

---

1. ख. ग. घ. स्यन्दोलितायां ।

2. क॰ घ. शावैः ।

आमोदयुक्ता[1] रसकेलिहीना
मुहुः सकम्पोत्कलिकासु[2] लीना।
विधूदये सन्निहिते तु[3] राधा
कुमुद्वतीव जनि मन्दवाधा ॥१४॥

बंशीविषाणध्वनिभिर्विशालै-
र्गोपालबालैर्धृतगीततालैः।
सहव्रजद्वारि हरिं विशन्तं[4]
दृष्ट्वा जगौ काप्यलमुल्लसन्तम्[5] ॥१५॥

आमोदेति । आमोदेन हर्षेण सौरभेण वा रसेन रागेण केलिः क्रीडा तद्धीना तद्रहिता। अथच रसके जले हीना भ्रमरहीना मुहुः सकम्पा श्रीकृष्णस्मरणादिना जातकम्पा उत्कलिका उत्कर्णा सुलीना अथच उत्कलिकासु सुरतरङ्गेषु लीना अतो मुहुः सकम्पा विधोः श्रीकृष्णस्य चन्द्रस्य वा उदये सति दर्शने सतीत्यर्थः । उदयास्तमये दर्शनादर्शने रवेरिति विष्णुपुराणवचनात्। कुमुद्वतीव मन्दवाधा मन्ददुःखा अजनि वभूव। चन्द्रवक्षे राधा ताराविषेषोऽपि च भार्य्या वोध्या ॥ १४ ॥

वशीति । हरिं दृष्ट्वा कापि गोपी जगौ गीतवती । शेषं स्फुटम् ॥ १५ ॥

1. क. घ आमोदरक्ता।
2. क. मुहुः सुकम्पोत्कलिकासु ।
3. ख. सं नहितेषु।
4. ख. ग. वसन्तं ।
5. घ काप्यलमुज्वलन्तं ।

अष्टाविंशः प्रबन्धः

॥ गौरीरागेण गीयते ॥

पश्य सुमुखि विधुरुदयति[1] सायम् ।
शमयति दिनभवतापनिकायम् ॥ ध्रुवपदम् ॥

कुमुदिनीकामिव मदयति[2] राधाम् ।
दलयति तां प्रति विरहजबाधाम् ॥१॥

गमयति मृदु मृदु शीतलपादम् ।
द्रवयति खुरकृतमवनीविषादम् ॥२॥

पश्येति । हे सखि ! कृष्णचन्द्र उदयति पश्य ।सायं सन्ध्यायां पौर्णमासीरात्रसध्य यामिति वोद्धव्यम् । दिनेभवो दिनभवः तापनिकायः कृष्णदर्शनाभावदुःखसमूहः सूर्य्यातपकृतज्वालासमूहो वा तं शमयति शान्तिं करोति । पुनः किं करोति कुमुदिनीकामिव कुमुदिनीमिव मदयति हर्षयति । राधां वृषभानुसुतां ताराविशेषं वा दलयति नाशयति । तां प्रति तस्या सर्वादुपपदविभक्तयः षष्ठापवादिका इति स्मरणात् । बाधां पीड़ाम् ॥ १ ॥

गमयतीति । पादं चरणं किरणं वा द्रवयति दूरीकरोति । खुरकृतं गवादिपशुखुरकृतं अवनेः पृथिव्याः विषादं दुःखं पृथिव्या हि चन्द्ररश्मि श्रीकृष्णचरणस्पर्शाभ्यां तापनिवृत्तिः सम्भवात् उभयथाऽपविरुद्धम् ॥ २ ॥

---

1. क. विरुदयति ।
2. क. दमयति ।

दधदपि सहजासितममलाङ्गम् ।
रचयति जगति तिमिरभयभङ्गम् ॥३॥

जगदुपकारी कल वलिधारी[1] ।
लोचनसुखकृदनन्तविहारी[2] ॥४॥

परतरुणीमुखरुचिरकलङ्की ।
करजमिलननलिनीकुलशङ्की ॥५॥

दधदिति। दधत् धारयन् सहजासितं स्वभावेन असितं नीलं अमलं स्वच्छं च यदङ्गं शरीरं तत् चन्द्रपक्षे कलङ्कमादाय असितत्वं स्वच्छत्व तु व्यक्तमेव वोध्यम्। एवमपि जगति सर्वत्र तिमिरभयभङ्गम् अन्धकारभयनाशं रचयति। कृष्णपक्षे अज्ञानभङ्गमिति वा ॥ ३ ॥

जगदिति। कलावलिश्चतुःषष्टिः षोड़षकला वा अन्धारी जगदुपकारी चासौ स चेति जगदुपकारीति षोड़शकलाविशेषणं वा पुनः किंभूतः लोचनसुखकृत् लोचनदर्श यसुखं लोचनान जननयनानां सुखं तत्करोतीति तथा सः अनन्ताः विहाराः प्रभावास्ताः सन्त्यस्य इत्यनन्त-विहारी। चन्द्रपक्षे आकाशविहारीत्यर्थः ॥ ४ ॥

परेति। परतरुणीनां गोपीनां मुखेषु रुचिश्चुम्बनेच्छा यस्य स तथाप्यकलङ्की नि कलङ्क जनैरुपासितत्वत्। चन्द्रपक्षे परा श्रेष्ठा या तरुणी तस्याः मुखमिव रुचिरः सुन्दरः किन्तु कलङ्की लाञ्छनवान् सा चासौ स चेति। पुनः कीदृशः करजानं नखानां मिलनं स्तनादिषु यत्संयोजनं तेन नलिनीकुलस्य पद्मिनी स्त्री समूहस्य गोपसमूहस्य या शङ्का सा कर्त्तव्यत या विद्यते यस्य स तथा चन्द्रपक्षे करजकिरणजन्यं यन्नलिनं तेन नलिनकुलशङ्की इति पूर्ववत् वोध्यम्। अयं तु विशेषः नलिनीपदेन पद्ममुखतो यद्वा करजमिल न नलिनकुलशङ्का शङ्कायुक्तं यस्मात् स तथा। नलिनीकुलं शङ्कयितुं शीलमस्य स नलिनी कुलशङ्की करजिमिलनेन नलिनीकुलशङ्की इत्युक्तं विस्तरे। ॥ ५ ॥

---

1 क. कलावतीधारी।
2 ख. ग मुखकृतनन्तविहारी।

सजलाभ्रकगत[1] कान्तिविमोषी ।
स्फटिकपटलशुचिगोगणपोषो[2] ॥६॥
भातिरुचिरहरिदम्बरभासी ।
युवतिमानहरमदनचकासो ॥७॥
इति हरिवर्णनममृतमशेषम् ।
पिवत रघूत्तमरचितमशेषम् ॥८॥
गोविन्दगोपसुन्दर्यो विरहज्वरकर्षिताः ।
अन्योऽन्यमस्मितालोकसुधावर्षेण हर्षिताः ॥१९॥

सजलेति । सजलभ्र सजलमेघ सजलामलं वा जलं चामलं चेत्यर्थः तच्छतं तत् समूहः तस्य कान्तिमोविषी दीप्तिखण्डा स्फटिकानां पटलः समूहः स्फटिकपटलं स इवशुचिः शुक्ला योगं वा धेनूनां रश्मीनां वा गणः तस्य पोषितः बर्द्धकः तत् पालको वा ॥ ६ ॥

भातीति । भात्या भानेन नभेन यत्र चारुचिरं यत् हरिदम्बरं पीताम्बरं अत्युद्दीप्तं चारुर्वा चिराणी हरिदम्बराणी दशानि तेन तैर्वा भासा शोभी यद्वा तत्तानि वा भासयीतु शील यस्य स तथा कृष्णश्चन्द्रो वा युवतीनां मानं प्रियविषये प्रेमरिषं हरती युवतीमानहरः चासौ मदनश्चेति स तथा तं च कामचित्त समापयीतुं शीलं यस्य कृष्णस्य चन्द्रस्य वा स तथा ॥ ७ ॥

इतीति । कविवचनं हरेः कृष्णस्य चन्द्रस्य वर्णन तोवामृतम् अशेषं सर्व सर्वमेव वर्णनमित्यर्थ । तत् पीयत आस्वादयत हे रसिका इति शेषः । शेषं नास्ति यस्य निरन्तर-पानेऽपि इदमक्षय्यमेव तिष्ठतीति अत्याश्चर्य्यम मृतमम्र भावः । रघूत्तमेन यतिना वर्णितमश्लेषमिति भावः ॥ ८ ॥

गोविन्देति स्फुटम् ॥ १९ ॥

---

1. ख ग सजलाभ्रकगत
क सजला भ्रजगत ।

2. क ख गोगणघोषी ।
ग. गोगणगोपी

गोष्ठं विशन्विधुमुखी विरहज्वरार्त्ताः
सोत्कण्ठदृष्टिविषयैरुदितस्ववार्त्ताः ।
द्रागभाविरासपिशुनैरितरावलक्ष्यै-
राश्वासयन्मधुरिपुर्मधुरैः कटाक्षैः ॥ १७ ॥

गोप्योऽपि विश्वस्तहृदोऽतिहृष्टाः
श्रीकृष्णविश्वासनदृष्टिवृष्टाः ।
निशामुखे चन्द्रकयाभिमृष्टा-
श्चण्डांशुभासेव गृहान् प्रविष्टाः ॥ १८ ॥

इति श्रीमुकुन्दविलासे महाकाव्ये श्रीमुकुन्दविरहनटनो नाम नवमः सर्गः ।

गोष्ठमिति । गोष्ठं विशन् मधुरिपुः विधुमुखी आश्वासयदित्यन्वयः । विधुमुखी कीदृशी विरहज्वरार्त्ताः स्फुटमिदम् । पुनः कीदशी सोत्कण्ठा उत्कण्ठाव्यञ्जिका या दृष्टयो ये च विनयाभिनयविशेषास्तैः यद्वा सोत्कण्ठदृष्टानां विनयवियेपचालनानातैरित्यर्थः । इत्यास्ता विपयैरुदिताः कथिता इव स्ववार्त्ता स्वदुःखवृत्तान्तो याभिः तथापि ताः । कैराश्वसयदित्यनेनाह । कटाक्षैः नयनान्तदर्शनैः कथंभूतैः झटिति अद्यरात्रौ भविष्यन् यो रासः तस्य पिशुनैः सूचकैः ननु सहचरैः गोपीसङ्गिनीभिरन्याभिर्वा तदिङ्गितं बुद्धं नेत्याह । इतरावलक्ष्यै इतरेषां गोपीभिन्नानां विलक्ष्यैरबोध्यैः उक्तविशेषणं कटाक्षैरित्यर्थः ॥ १७ ॥

गोप्य इति । विश्वस्तहृदो विश्वासयुक्तमानसः श्रीकृष्णेन कटाक्षे गीत बोधित सङ्गमोऽद्यावश्यं भविष्यतीति निश्चितमनस इत्यर्थः । अथवा अतिहृष्टा तदेवाह । श्रीकृष्णेति । किं च वेशकरणार्थं त्वरितं वा महान् प्रविष्टा तत्र कविरुत्प्रेक्षते । श्रीकृष्णस्य विरहोऽपि चन्द्रकराः तापहेतो भवन्तीति भावेन निशामुखे रात्र्यारम्भे चन्द्रिकया ज्योस्नायाभिमृष्टा कयेवेति तदाह । चण्डांशुभासेव सूर्यातपेनेव अयंभावः वेशादिकरणार्थं त्वरया गृहं निविष्टाः किन्तु चन्द्रीकासमृहमाना एवे त ॥ १८ ॥

इति श्रीमुकुन्दविलासप्रकाशिकायां नवमः सर्ग ।

दशमः सर्गः

सितीतरौ[1] चन्द्रकमौलिमण्डनौ[2]
हरित्पटौ भक्तजनाधिखण्डनौ ।
वृषाकपयीनलिनीमधुव्रतौ
सुरौ भजेऽन्योन्यसभाजनव्रतौ ॥१॥

सितीति । दशमे मुरलीगानाकृष्टैः गोपीगणैः सह तस्यान्योऽन्य वाग्विलासो रासारम्भश्च भण्यते । रासलीलावर्णनमतिदुष्करं मन्यमानो विघ्नशङ्कया ग्रन्थमध्ये पुनः मङ्गलमाचरति। सुरौ भजे इत्यन्वयः कीदृशौ सितीतरौ सितिर्धवलः तदितरस्तद्भिन्नः कृष्णइत्यर्थः। सितिनीलः तदितर शुक्ल इत्यर्थः। सितीतरश्च सिततरश्च तौ सितीतरौ स्वरूपाणामेकशेषमित्यादि सूत्रेण तररुपपदलोपः। चन्द्रकेति चन्द्रकं च मयूरपुच्छं चन्द्रकश्च स्वल्पचन्द्रोऽर्द्धचन्द्रः चन्द्रको मौलिश्च तौ मौलिमस्तकस्थौ मौलिस्तयोर्मण्डने भूषणे मौलिमण्डने चन्द्रके मौलिमण्डने ययोस्तौ चन्द्रकमौलिमण्डनौ। मौलिशब्दस्य तीरे गङ्गाशब्दवन् मस्तके प्रयोगः। चन्द्रमौलिरित्याति प्रयोगस्य शिवदर्शनात् हरित्पटाविति हरित् पीतः पटो यस्य स तथा हरित् दिक्पटोऽम्बरं यस्य स हरित्पटश्च तौ हरित्पटौ। भक्तेति भक्तजनानामाधिः मनस्तापं खण्डयतीति स तथा स च तौ। वृषाकपायी श्रीः सैव नलिनी तस्यां मधुव्रतो भ्रमरः । वृषाकपायी दुर्गा शेषं पूर्ववत्। पुनः कथंभूते अन्योऽन्यं परस्परं यत्सभाजनं भक्तिस्तदेव व्रतं अग्निहोत्रयागं कर्त्तव्यं कर्म ययोस्तौ अन्योन्य सभाजनव्रतौ अत्र सुराविति सामान्यनिर्देशोऽपि विशेषणप्रसिद्धया विशेष्यप्रतीतिरिती ज्ञेयम् ॥१॥

---

1. क. शितीतरौ ।
2. क. मौलिमण्डलौ ।

कृष्णोऽपि मायामवलम्ब्यमानः
काय यशोदाशयने[1] निधानः[2] ।
देहान्तरेणैत्य कदम्बमूलं
जगौ वधूनां हृदयानुकूलम् ॥२॥

कृष्णोऽपीति। गोप्यः निज निज गृहं प्रविश्य अभिसारयोग्यवेशग्रहणमारभमाणा स्थिता इति नवमसूचितमर्थं मनसि कृत्य प्राह। मायां योगमायां दुर्घटघनपटीयसीं अवलम्ब्यमानः आश्रितः तां स्वाभिप्रेते कार्ये नियोजयन्नित्यर्थः। कायं शरीरं निदधानः स्थापयन्।

नेमं विरञ्चो न भवो न श्रीरप्यङ्गसंश्रया।
प्रासादं लेभिरे गोपी यत्तु प्राप विमुक्तिदा॥

इति श्रीभागवते यशोदाया अतिकृपाविषयत्वदर्शनात् सापि दर्शनाभावेन दुःखं न प्राप्नोतु इत्येतदभिप्रायेण यशोदा शयने कायं निदधान इत्युक्तम्। यशोदायाः शतने शय्यायां यशोदामाता शेते इति दर्शितम्। पुत्रसदन इति पाठे शय्यान्तरसम्बन्ध इति बोध्यम्। देहान्तरेणेति सजातीयान्यदेहेनेत्यर्थः एत्य आगत्य कदम्बस्य रासमण्डलमध्यस्थित कदम्बवृक्षस्य मूलं जगौ मुरल्या गीतवानित्यर्थ हृदयानुकूलं मनोऽनुरञ्जनं यथा स्यात् तथा ॥२॥

1. क. यशोदासदने।

2. क. दधान इत्यधिकलेखोऽस्ति।

ऊनत्रिंशः प्रबन्धः

॥ कामोदीरागेण गीयते ॥

भगवति रचयति मुरलीगानम् ।
गोपयुवतिकुलमतिमदनाकुलमकृत[1] चपलमुपयानम् ।
॥ ध्रुवपदम् ॥

विस्मृततत्क्षणनिजनिजकर्मकमघरिपुणा[2] हृतचित्तम् ।
जननीजनकबन्धुगणवारितमपि न कदापि निवृत्तम् ॥२॥

भगवतीति । गानप्रयोजनं दर्शयति । भगवति श्रीकृष्णे रचयति सति मुरलीगानं मुरल्या करणेन गानं सुस्वर शब्दविशेषकीर्त्तनं गोपेत्यादि सुगमम् । अकृत अकार्षित् चपलं तूर्णं उपयानं समीपगमनं अभिसारं कृष्णसखेति शेषः । गोपयुवतिकुलं कीदृशं विस्मृतं तत्क्षणे मुरलीगानश्रवणसमय एव निजं निजं कर्म वेशग्रहणादिरूपं येन तत् तथा विस्मरणेत्यादिमाह । अघरिपुणा श्रीकृष्णेन हृतं चित्तं मनो येन स तथा जननीति । वारितं मा गा इत्यादि रूपेण निवृत्तमानमपि शेषं स्फुटम् ॥ १-२ ॥

---

1. क गोपयुवतिकुलकृत ।
2. ख. ग कर्ममघरिपूणा ।

हारीकृतकिङ्किणीका काचन[1] किङ्किणिकी[2] कृतहारा ।
कापि च नूपुरकरिका कापि च कञ्चुकपाणिरुदारा ॥ ३ ॥
कापि कुसुमधर[3] ललितवामकरगुम्फनगुणपरहस्ता ।
पृषती[4] मुकुरकरा किल काचन काचिदयतकचहस्ता[5] ॥ ४॥

हरीकृतेति । समुदायस्य सामान्य चरितमुक्वा एकैकस्या विशेष चरितं हृतचित्त व-विवन्धन वर्णयति, हारीकृता हारस्थाने कण्ठे निहिता किङ्किणीका क्षुद्रघण्टिका यया सा। तथा हारस्य हारिकतासम्भवेन तत् सदृशीकरणमेव गौण्यावृत्त्या बोधितमिति ध्येयम्। तत्सदृशीकरणं च तदाकारतया तत्स्थाननिधानमेव बोध्यम्। एवमुत्तरत्रापि नूपुरं करे यस्या सा नूपुरकरा सैव नूपुरकरिका स्वार्थे कप्रत्ययविधानात्। कञ्चुकः स्तनगोपनपटविशेषः स पाणौ यस्याः सा उदारा महती भण्यापीत्यर्थः ॥ ३ ॥

कापीति । कापिकुसुमधरोऽङ्गुष्ठतर्जनीमध्यमाभिरङ्गुलीभिः पुष्पैकधरो ललितः सुन्दरो वामकरो यस्याः सा। गुम्फनाय ग्रथनाय गुणं सूत्रं गुम्फनगणसूत्रं तत् परहस्तेऽन्य-हस्ते दक्षि हस्ते तर्जन्यङ्गुष्ठयो र्यस्याः सा चासौ सा चेति कर्मधारयः। पृषती अञ्जनशलाका मुकुरो दर्पणः तौ दक्षिणवामकरयोर्यस्याः सा तथा। किलेति वाक्यालङ्कारे। काचन अपराय-तोऽपरुद्धः कवरीकृतः अर्द्धकवरीकृतः करः हस्तः केशसमूहो यया सा ॥ ४ ॥

---

1. ख. ग. काचित् ।
2. क. किङ्किणी ।
3. क. कुसुनभर ।
4. क. पृषत ।
5. ख. ग काचहस्ता ।

एकवतंसधरा खलु काचन धृतहंसकमणिबन्धा ।
कापि च लीलाकुमुदकरापरकरधृतनीविनिबन्धा ॥ ५ ॥

एकाशयधृतकनकसुभाजनपरकरचन्दनगन्धा ।
क्रमुकमुखी सुमुखी खलु काचन भुजगवल्लीशयसन्धा ॥६॥

एकवतंसेति । काचिदपरा एकोऽद्वितीयो योऽवतंसः तद्धराः तत्कर्णेत्यर्थः यद्वा एकभूगणधरा रकभूषणकर्णा करेण एकभूभणधरेत्यर्थः । काचन अन्या धृतो हंसकः पादवलायो मणिवन्धे करकङ्कणस्थाने यया । काप्यन्या लीलाकमलं करे यस्याः सा चन्द्रवत्यां रजन्यां कमलसौभा यभावात् लीलार्थं कुमुदगृहीतामिव ध्येयमिति सन्निवेशबोध्या । सा कीदृशी परकरेग धृतो नीविनिबन्धो यया सा त्वरागमनेन स्खलितनीविनिबन्धेति वोध्यम् ॥ ५ ॥

एकाशयेति । एका अन्याशयेन वामहस्तेन धृत सुकनकस्य सुवर्णस्य भाजनं सुन्दरपात्रं धुस्तूरकुसुमाकारं चन्दनमात्रमित्यर्थः यया सा । परकरे दक्षिणपाण्यग्रे चन्दनगन्धे यस्याः सा चासौ सा चेति विशेषणयोरपि विशेषणविशेष्यभावकल्पनया कर्मधारयमिति वोध्यम् । कृष्ण शुक्लो पट इत्यादौ मुनिनैव दर्शितत्वात् इतरस्या भङ्गीमाह क्रमुकं गुवाकखण्डं मुखे चर्व्यमाण यस्या सा तथा सुमुखी सुन्दरमुखी खलु काव्यालङ्कारे भुजगवल्ली ताम्बूलपत्र-पुटकं तस्याशयेन करेण सन्धा संधारण यस्या सा तथा ॥ ६ ॥

कापि करेण हरिं वरयितुमिव मल्लीदाम दधाना ।
दधती कापि करेण हृदम्बरमकृत[1] कुचैकपिधाना ॥ ७ ॥
एवमुपागमदखिलपतिं प्रति वल्लवयुवतिरशेषा ।
सुखयतु रसिककुलानि रधूत्तमसरसभणित[2] ततिरेषा ॥८॥
ता निरीक्ष्य रमणी रमणीयाः श्लेषभाषणरसैर्भ्रमणीयाः ।
रुक्षवत् प्रियतमः स्मयमानः संजगाद रचितस्मयमानः ॥ ३ ॥

कापीति । अन्यस्या भङ्गीमाह । कण्ठे परिधारयन्ती मल्ली दाम मल्लीपुस्पमालां करेण दक्षिणहस्तेन दधाना धारयन्ती तत्र कविरुत्प्रेक्षते यत् अपरिधायकरेण धारयन्त्येव समागता तत् श्रीकृष्णं हरिं वरयितुमिव स्वयस्वरीकर्तुमिव । अन्यस्या भङ्गीमाह । हृदम्बरं कञ्चुकं दधती धारयती किदृशी सती धारयन्ती तदाह न कृतं कुचैकस्य द्वितीनकुचस्य पिधानमाच्छादनं यया तथा अत्राप्युत्प्रेक्षालंकारो व्यङ्ग्य स चेत्थं इदानीमेव श्रीकृष्णालिङ्गने कञ्चुकः दूरीकरणीयः कथं सम्यक् पिधेयः इति भावनेव तथा धारयन्तीत्यर्थः ॥ ६ ।

एवमिति । द्वादशभङ्गीभिर्द्वादशनारीणां वर्णयित्वा इतरासामपि तादृश्यो भङ्ग्यो भावनीया इत्यभिप्रायेणाह । एवमित्थं प्रकारैरशेषा सर्वापि वल्लवयुवतिः उपागमदित्यन्वयः । तासामागमनवर्णनं कृत्वा विदग्धानां सुखकरणत्वेन शास्त्रे सुखयत्विति भणितमिति वर्णनाश्रेणी एषा संप्रत्येव तद्वत् शेषं स्फुटम् ॥ ७ ॥

ता इत्यादि । ता मोहितचित्ततया विचित्रभङ्गीभिरागताः रमणीयाः गोपसुन्दरीः निरीक्ष्य स जगाद इत्यन्वयः । रमणीयाः मनोहराः रमयितुं योग्या वा श्लेषभाषणरसैः श्लेषभाषणानि अर्थद्वययुक्त वचनानि तान्येव रसा इव रसास्तैः भ्रमणीयाः भ्रमन्तीः कर्तव्याः प्रियतमोऽपि तद्विषये ... पति प्रीतिमानपि रुक्षवत नतुचा ··· जगाद इत्यस्य विशेषण इषद्धसन् चरितः कृतः स्मयेन स्थितेन मनोगौरवं येन स तथा यद्वा रचितैः स्मयमानैः येन स तथा ॥३ ॥

1. ख. ग. हृदम्बर न कृत ।
2. ख. ग. सरसभणिति ।

त्रिंशः प्रबन्धः

॥ गुर्जरीरागेण गीयते ॥

स्वागतमयि सुदृशो भवतीनाम् ।
किं करवै कथयत सुमतीनाम् ॥ १ ॥
॥ ध्रुवपदम् ॥

व्रजशुभमुतवद तागतिमूलम् ।
दृष्टं वनमुप यामुनकूलम् ॥ २ ॥

स्वागतमित्यादि । शिष्टवचनान्याह । प्रथमपक्षे रूक्षः द्वितीयपक्षस्तु स्निग्ध इति सर्वत्र बोध्यम् । अयि सुदृशः हे सुन्दराक्ष्यः भवतीनां युष्माकं स्वागतं सुखेनागमनमिति प्रश्नः । सम्भोगविलम्बत्वाद्रूक्ष इति ध्येयम् । पक्षे भवतीनामागतं सुखदमित्यर्थः । एतद्वचनं सम्भोगाङ्गत्वात्स्निग्धम् । किं करवै सुमतीनां किं कार्यं करवाणीति कथयत भावि रजनीगणमधिकविलासं सम्भवेत् मया सह रासमिति कार्यस्य स्वयमेव निश्चितत्वात् तत् प्रश्नो रूक्षः पक्षे किं करवै किं करवाणीति लोट् । सेवकीभावाभिलाषः प्रकटीकृतः ॥ १ ॥

व्रजेति । व्रजे च घोषे च शुभं कल्याणं कच्चित् केनाप्यसुरेण नोपद्रवः । उपद्रवस्तु संभाव्यते यस्मादेतावन्तं कालं नागतं नोचेदुपद्रवस्तर्हि अगतिमूलं एतावत् कालं यदि गमनं तस्य मूलं कारणं वदति एतेनागमनविलम्बासहिष्णुता प्रकटनेन स्निग्धता । ईदृशं वचनं श्रुत्वा दुःखेन श्रीवृन्दावनतरुषु चालितदृष्टयस्ताः वनशोभावीक्षणार्थं समागता वयमित्याहुः । दृष्टमिति यमुनाया अदूरभवं यत्कूलं तत् यामुनकूलं तदधिकृत्य यद्वनं भवतीभिर्वीक्ष्यमाणं तद्दृष्टं वीक्षितमेव । अतो वनदर्शने सिद्धे अत्रेह स्थित्या अन्यभिप्रायप्रकटनं रूक्षता ॥ २ ॥

---

1. क घ पत्र विनष्टम् ।

कुसुमितमुडुपतिकरसुविकाशम्[1] ।
मृदुलतरं मृदुचपलपलाशम् ॥ ३ ॥
गतिरहिताभयदा रजनीयम् ।
व्रजमुपयातु[3] नेह वसनीयम् ॥ ४ ॥
अबलानां पतिभजनममायम्[3] ।
परमं धममखिलफलदायम् ॥ ५ ॥

कुसुमितेति । वनं कीदृशं तदाह खण्डयाभ्याम् । कुसुमितेति सुगमम् । पक्षे ईदृशं वन त्यक्त्वा एतावन्तं कालं कथं गृहे स्थितमिति भावव्यञ्जनेन स्निग्धता ॥ ३ ॥

गतिरहितेति । गतिरहिता जनसंचाररहिताभयदाभयहेतुः अतो यूयं कथमागताः व्रजमुपयातु इह रात्रौ वने न वसनीयं न स्थातव्य युष्माभिरिति [illegible]षः । इ त रुक्षम् रुक्षत्वम् । पक्षे गतिरहिता जनसचार र हेता इयं रजनी अत्र कोऽपि कीडामस्माकं न द्रक्ष्यति अतोऽभयवान् । भयदा ज्योत्स्नावन्त्या का न भयदा व्रजं नोपयाति । इहास्मि . व वसनीयं स्थातव्यं स्थातुमुचितं परमसुखहेतुत्वादति स्निग्धता ॥ ४ ॥

अब ति । अबलानां स्त्रीणां पत्या पाणिग्रहणकर्तुः भजनं सेवनं अमायं न कपटं परममुत्कटं धर्मपुण्यसाधनं कर्म अखिलफलादायं सकलाभीष्टसाधकं पाणि ग्रहीतृत्वाभावात् सङ्गमो युष्माकममुचितमिति भावप्रकटनेन रुक्षता पक्षे पत्या ...शेषं तुल्यं तेन स्निग्धत्वं च स्फुटमेव ॥ ॥

1. ख. ग. कर सुविकाशम् ।
2. क. घ. मृद्रुलतरुत ।
3. क व्रजमुपयाति ।
4. ख. अबलानां गतिभजनमगायम् ।

विफलोभयविधलोकजशङ्का ।

परपतिसंगति[1] कातिकलङ्का ॥ ६ ॥

यदि मम रागवशादुपपन्नम् ।

मयि रतजगति यदिदमुपपन्नम्[2] ॥ ७ ॥

श्रवणविचिन्तन कीर्त्तनवृन्दम् ।

उपजनयति मयि[3] भावममन्दम् ॥ ८ ॥

विफलेति । पाणिगृहीता यदि भविष्यति तदा तत्सेवनं विधेयमपि ईदानीं त्वद्भजनमेव कर्त्तव्यमित्याशङ्क्याद् परपतिः पतिभिन्नः पाणिगृहीतृभिन्नगतस्य गतिः संगतिः यद्वा स्व पापि संगतिः संगतिका अतिकलङ्का अतिकुकीर्त्तिः कर्त्तरि पुनः कीदृशी विफला फलशून्या इ यर्थः । पुनः कीदृशी उभयवि लोकजा ईहलोकपरलोकजा शंका यस्यां यतो वा सा तथा । तस्मात् परपतिसंगमो न कर्त्तव्य इति स्फुटमेव रुक्षता । पक्षे परपतिः परमेश्वरोऽहमेव तस्यां संगतिर्का संगति रति कलङ्का कलङ्कमतीता नास्ति कलङ्क यर्थः । परमेश्वरसंगति पुनः कीदृशी विफला उभय वध लोकजा शंका यस्यां सा विफलो भयविधलोकजशङ्का सत्सङ्ग व इह परलोकशंका नास्ति कथनेन स्निग्धता ॥ ६ ॥

यदीति । ननु नास्माभिस्तवसङ्गमार्थमागतं किन्तु परमेश्वरत्वेन भक्त्या दर्शनार्थमेव चेत् कथयि यथ तथापि तज्जातमेव । अतो व्रजमुपयातेति पूर्वकथितत्वात् तदिहापि अनुपद्यत इति रुक्षता पक्षे उपपन्नमुपचितमेव तथाच मद्गमनं युक्तमेवेति कथनेन स्निग्धता ॥ ७ ॥

श्रवणेत । ननु दर्शनमात्रं कृत्वा त्वत्सन्निधौ त्वत्प्रतिमासन्निधाविव भक्त्या रथ स्याना न वयं न गृह यास्याम इति चेत् कथयि यथ तत्रापि शृणुत श्रवणमन्यैः कथ्यमानं सार्थावधारणविचिन्तनं यान कीर्त्त र नाम गुणादिकथनं तेषां वृन्दं समूहः मयि परमेश्वरे मन्दभावमुत्तमभक्तिं उपजनयति काल एव शीघ्रमेव जयतीत्यर्थः ॥ ८ ॥

---

1 ख. ग. परमगति संगति । घ परिणति सङ्गति ।

2 ख. ग. घ त ददमुपपन्नं ।

3 क चिन्तन ।

4. ख. ग. तद्रुपजयतिमयि ।

सन्निधिरपि न तथा कुरुते तम् ।
प्रयत[1] ततो न चिराय निकेतम् ॥ ९ ॥
इति तरुणीरनुहरिरुपहासम्[2] ।
रसय रघूत्तमभणितविलासम् ॥१०॥

सन्निधिरिति । सन्निधिरपि सान्निध्यं तु सन्निधि स्थतिरित्यर्थः । तमुत्तमभावं न कुरुते न जनयति । ततस्तस्मिन् चिराय शीघ्रमेव निकेतं गृहं प्रयत गच्छत । तत्रैव स्थित्वा श्रवणादिभिर्मां भजत इत्यर्थः तथाच स्फुटेन रूक्षता पक्षे सन्निधिरपि श्रवणादिवत्सान्निध्यमपि तं न रचयति अपितु रचयत्येवेति काक्वा नञो विपरीतार्थः । ततो चिराय निकेतं गृहं मत्सन्निधौ स्थितिमुपजात प्राप्नुत यद्वा सान्निध्यमपि तं कुरुते । अतो निकेतं गृहं चिराय चिरकालमेव नोपजात मत्सन्निधावेव यथेप्रभजनं कृत्वा तिष्ठत्यर्थः तथाच स्फुटतामेति स्निग्धता ॥ ९ ॥

इतीति । इत्यादि कविवचनं तरुणीरनु गोपयुवतीः लक्षीकृत्य हरेः श्रीकृष्णस्य परिहासं उपहासवचनमिदं रसय आस्वादय हे रसिकसमूह ईति शेषः । रघूत्तमस्य भणितेभ्यः सकाशात् विशिष्टो लासो दीप्तिः यस्य स तथा तं यद्वा रघूत्तमेन भणिता विलासा यस्य यद्वा रघूत्तमभणितस्यास्य रघूत्तमकाव्यस्य विलसितं भणितमित्यर्थः कृष्णोक्तस्य भावस्य द्रव्यवत् प्रकाशात् ॥ १० ॥

---

1. क अयत ।
2. ख. घ. हरिपरिहासम् ।

गोविन्दवचनं श्रुत्वा परुषं परुषं मनः[1] ।
योषाणां हतयोषाणां बिषादं च विषादकम्[2] ॥ ४ ॥

सकज्जलैरुष्णजलैर्वहन्त्यो नेत्राणि नेत्राणि निषेचयन्त्यः ।
अवाञ्ची कृत्वा वदनानि बाला अवाञ्चीतस्थुर्बहुनिश्वसन्त्यः ॥५ ॥

गोविन्देति । ईदृशं श्लिष्टवचनवृन्दं रासाभिलाषाकुलचित्तयतया स्वाभिप्रेतार्थकत्वेनावधार्य्य तासां कोधदुःखं च जातमित्याह । श्रुत्वा आकर्ण्य मनः रुषं क्रोधं आप इत्यन्वयः वचनं कीदृशं परुषं रुक्षमिति प्रतीयमानं योषाणां योषितां हतयोषाणां हतप्रीतिनां हतसुखानामित्यर्थः। यद्वा हतयोपास्तां हतवन् प्रतीयमानां कृष्णसेवनानामित्यर्थः । मन विषादं गतेत्यन्बयः । विषादं रुषं च वा कीदृशं विषादत्यलं अत्यन्तदुःखदमित्यर्थ ॥४॥

सकज्जलैरिति । क्रोधदुःखयोः फल वर्णयन्नाह । बाला मुखानि अवाञ्चीवदनानि कृत्वा तस्थुरित्यर्थः । कथभूताः नेत्राणि वस्तुविशेषानङ्ग स्थितान् सकज्जलैरुष्णजलैः निषेचयन्त्यः नेत्राणि नयनानि वहन्त्यः धारयन्त्यः पुनः कीदृशः वदनानि यथा स्यात्तथा निश्वसन्त्वः । ननु बहुशब्दस्यसंख्यावाचकत्वेन विशेषणदशायां कृ वसूत्रे वनत्रस्ययः संपद्यते । बहुकृत्वो भूङ्क्त.. इत्यादिवत् बहुकृत्वो निश्वसन्त्यः इत्येववक्तुमुचितमिति चेत् सूक्ष्ममीक्षसे तर्हि बहु इत्यस्य अधिकमित्यत्र ज्ञेयः । यथा सज्ञां मतोऽयं धीर इत्यादौ तथेहापि तथा च प्रयोगः । इदं तु बहुमन्यते ॥ ५ ॥

---

1 क. ग. विषादलम् ।

2 ख. ग. वनः ।

गोप्यस्तदाग्रेण[1] भुवं लिखन्त्यः संकल्पभङ्गं परिचिन्तयन्त्यः ।
बिम्बोष्ठशोषिश्वसनं सृजन्त्यस्तस्थु. कराभ्यां दृगपो[2] मृजन्त्यः ॥६॥
आरक्तनेत्राश्रु विसृज्य रामाः कृष्णं तदर्थोज्झितसर्वकामाः ।
प्रियं प्रियाय प्रियवद्वदन्तं[3] प्रोचु[4] मृदुक्रोधसगद्गदं तम् ॥७॥

गोप्य इत्यादि । तदाग्रेण पदाङ्गुष्ठेनेत्यर्थ । भुवं ननु भूमौ किंचिदन्यल्लिखन्त्यः तत्रापि मम त्वत्स्वभावविशेषणैव तल्लिखन संभवात् संकल्पभङ्गं अभीप्स्य अप्राप्ति-निश्चयात्तत्तद्भङ्गमित्यर्थः । संकल्पतेऽसाविति संकल्प इति व्युत्पत्तेस्तस्य भङ्ग तं परिचिन्तयन्त्य इत्यर्थ । बिम्बोष्टशोषि स्वसनमिति विशेषणेन त तनिश्वासरोधेन अतिदुःखं व्यज्यते । दृशयोऽश्रूणि मृजन्त्योऽपस्मरयन्त्य इत्यर्थ । अत्र स्वभावोक्तिरलङ्कारमिति मधुरो ज्ञेय ॥ ६ ॥

आरक्तेति । अतिनिष्ठुरभाषिणमपि ज्ञात्वाहुः प्रतिहरप्रेमकत्वेन त्यक्तुमशक्ता । क्षमामवलम्ब्य निगूढं किंचित् क्रोधयुक्तं वचनवृन्दमाहुरिति दर्शयितुं कविराह । 'आरक्ते ईषद्रक्ते ये नेत्रे तयोऽश्रूणि विसृज्य चेलाञ्चलेन मुक्त्वा मार्जयित्वा कृष्णं रामाः प्रोचुरित्यन्वयः ताः किंभूताः तदर्थे श्रीकृष्ण निमित्ते उज्झिता स्वकामा सर्वविषयास्तदभिलाषा वा याभिस्ताः तथा किंभूतं प्रियं प्रीतिविषय स्वविषयप्रीतिमन्त्रं वा अप्रियवत् तत् विपरीतवत् वदन्तं भाषमागता कथंभूता प्रियाः कृष्णस्य प्रेयस्यः कृष्णविषये प्रीतिमन्यो वा मृदुना क्रोधेन गद्गदं स्वभाविकस्वरभङ्गसहितं यथा स्यात् तथा प्रोचुरित्यर्थः ॥ ७ ॥

---

1. क. गोप्यतदाग्रेण ।
2. ख. ग. दृशाषो ।
3. ख. ग. प्रिया प्रिया अप्रिय वद
4. ग. घ. प्रोद्व ।

एकत्रिंशः प्रबन्धः

॥ धनाश्रीरागेण गीयते ॥

माधव मा वद परुषमुदन्तम् ।
विषयनिचयमपहाय यतय इव शरणमथा भवन्तम् ॥ १॥
॥ ध्रुवपदम् ॥

आदिपुरुष इव मुक्तिरतानिह भजनो न विसृज कामम् ।
यत्पतिभजनमुदाहृतमिदमपि[1] भवति[2] तदस्तु निकामम् ॥२॥

माधवेति । वचनस्वरूपं दर्शयति । माधवेत्यादिरषृभिः पद्यैः अन्त्यानुप्रास युगलकेन खण्डद्वयेन एकं पदं चरणं पादं इत्यदि गीतविषये परिभाषा ज्ञेयाः। हे माधव हे लक्ष्मीकान्त मा वद परुषं रुक्षं दुःखजनकमि यर्थः उदन्तं वार्त्ता वचनमित्यर्थः। लक्ष्मीकान्त तव अलक्ष्मीकस्येव रुक्षवचनमनुचितभिति भाव। यद्वा हे धव प्रिय परुषं मा वद। प्रियस्य तव अप्रिययस्यैव वचनं अत्यन्तमयोग्यमिति भावः बिषयनिचयं बिषयसमूहं अपहाय त्यक्त्वा यतयः सन्न्यासिन इव भवन्तं त्वन्मात्रशरणं आयाम आश्रयाम आगतवत्यो बर्यमित्यर्थः। नापि सन्न्यासिन विरक्तावयं लक्ष्मीकान्तस्य भवतः काचित् संपत्ति आरूढ्य ग्रहीतुमागताः। यत्परुषं ब्रूपे इति भावः। अतएवादिपुरुषः श्रीनारायणो यथा मुक्तिरतान् भजति तथा नोऽस्मान् भज जपं कुरु प्रीणयेत्यर्थ। प्रीत्यबन्दिन्नक्रियाबिशेषत्स्यैव भजति सेबते सभाजयति इत्यादि धातुप्रतिपाद्यत्वात् कामं यथोचितं यथा भजेत्यर्थः। न बिसृज न उपेक्षस्व। अबलानां भजनमामयमित्यादिना यत् पाणिग्रहीतुरुपपतिभजनमुदाहृतं उपदिषृ इदमपि एवमपि भजनमपि त्वाय बिषये निकामं यथेष्टमस्तु सम्भवत्वित्यर्थः ॥ १-२ ॥

---

1. ख. ग. मुदाहृतमिहमपि ।
2. घ. जीवति ।

आत्मा देहभृतामसि गतिरसि सततहृदय[1] गृहशायी।
इष्टतमोऽसि बन्धुरसि पतिरसि गतभीरभय[2] विधायी ॥३॥

आत्मेति । सम्भवमेव दर्शयति। देहभृतां प्राणिनां सर्वेषां आत्मासि निरुपम विषयत्वादिति भावः । गतिरसि तदवज्ञादिकर्म प्राप्य स्वर्गादिसुखसम्भवेति भावः। एकस्यैवान्यस्याव्यक्तानि भूतानि मातरमुपजीवन्तीति श्रुतेः । स्वर्गादिसुखानां ब्रह्मानन्दानां भूतत्वाद्गतिशब्दवाच्यं तत्तत्सुखमपि न ततोऽभिन्नम्। अस्तु त्वद्भजनेन पतिभजनं तत्फलं स्वर्गादिप्राप्तिश्च सिद्ध्येदिति भावः। पतिरपि पतित्वेऽपि न बहुसाधनं लभते त्वं न वेत्याहुः। सततं यथा स्यात्तथा हृदयगृहे मनोमन्दिरे शयितुं शीलमस्येति स तथा त्वम्। आत्मत्वे हेतुमाह । इष्टतमोऽसीति सर्वापेक्षयाप्यधिकप्रीतिविपयोऽपीत्यर्थः । अत्रश्रुतिरप्यस्ति। अस्त्रीणां भजनीयान्तरमपि त्वमेवेत्याहुः। बन्धुरसि बन्धुदेवरादिः पतिः पाणिग्रहीतृत्वाद्यद्वा बन्धुभ्रातादिः पतिरीश्वरः पतिः स्वामी वा 'धव एव सन्ततमिच्छथ मम पतिभाव तन्मम मतमिति मुञ्च तदा वयमिति बहूक्तपूर्ववचने पतिभावस्यास्मासु स्वीकृतत्वात् न केवलं पाणिग्रहीतृत्वमात्रेण कश्चित् पतिर्भवति । तथात्वे शिशोरपि मातृहस्तावलम्बेन तथात्वात् प्रसङ्गात् पतिपत्नीभावस्य स्वीकारविशेषेणैव सिद्धत्वादिति भावः तथाच त्वद्भिन्न पत्याः सङ्गम एव नास्ति कस्य भजनं कर्त्तव्यमिति आक्षेपो व्यङ्ग्य किंच—

अ···कस्य पतित्वमेव न सम्भवति

स वै पतिः स्यादकुतो भयः स्वयं समं ततः पाति भयातुरं जनम्॥ इति पञ्चमस्कन्धे ल मीवचनेन पति वविधानात् इत्याशयेनाह पतिभिरिति । पतिरसीत्यस्य विशेषणद्वयं गतिभिरभयविधायीति ॥ ३ ॥

---

1. क. मद्धृदय।
2. क गतभीहृदय ।

प्रणयं त्वयि विदधति सुधियोऽनिशमात्मनि सन्ततकान्ते ।
पतितनयादिसदार्त्तिदवस्तुनि जहति रतिं नियतान्ते ॥ ४ ॥
पाणियुगं[1] गृहकर्मणि न विशति हृदयं भवदपनीतम् ।
पदयुगलं वत पदमपि न चलति तव पदसविधमतीतम् ॥ ५ ॥

प्रणयमिति। अतएव सुधियः पण्डिताः वेदपुराणादितत्वज्ञाः त्वयि सर्वात्मके परमेश्वरे प्रणयं प्रेमं अनिशं निरवधि विदधति कुर्वन्ति । त्वयि कथंभूते आत्मनि स्वस्मिन्नेव श्रुतिकर्तुः स्वरूपे एवेत्यर्थः। तत्वमसि अहं ब्रह्म इत्यादि श्रुतिभ्यः आत्मत्वे लिङ्गमाह सन्ततकान्त इति। सन्ततं निरन्तरं कान्ते प्रियेत्यर्थः । इदानीमेव तदस्माभि साक्षादनुभूतं कुर्वन्नैरप त्वय्री। ध्रुवत्वादिभावः त्वन् प्रीतिं कुर्वन्तो जना इति जडवस्तु जाते प्रीतिं त्यजन्तीत्याहुः । पतितनयादिति पतिः पालयिता धवो वा तनयाः पुत्राः आदिशब्दात् तदपत्यभृत्यगृहक्षेत्रधनादिपरिग्रहः। तादृशं सदार्त्तिदं यद्वस्तु तस्मिन् रति त्यजन्ति कथंभूते वस्तूनि नियतान्ते नियतो निश्चितो अन्ते जातो यस्मिन् यद्वा ते पूर्वोक्ता साधवः नियता स्वामिनिष्ठं रतिं जहतीत्यर्थ। अहो त्वत्प्रेममहात्म्यमितिभावः ॥ ४ ॥

पाणियुगमिति। नवेदं परमहंस मन शिवतत्वज्ञानं चेत् युष्माकं उपस्थितं तर्हि अलं मम साकारभजनेन औदासिन्येन पित्रादि गृहे वेव प्रवाहपतितं कर्म अभिमान तथा कुर्वत्यो न कथं तिष्ठथ इत्याशङ्क्याह पाणियुग करद्वयं गृहकर्मणि न विशति न प्रवर्त्तते । अत्र हेतुमाह भवता त्वया श्रीकृष्णेन हृदयं मनः अपनीयमपहृतमित्यर्थः यदीत्यर्थ यदुक्तं व्रजमुपजाहीति तदपि अतएव न सम्भवतीत्याहुः । पदेति पदयुगलं चरणद्वयं वतेति खेद सम्बोधने वा पदमपि पदपरिमितस्थानमपि न चलति न गच्छति। पदयुगलं किं भूतं तव पदसविधं त्वच्चरणसान्निध्यगतमित्यर्थः सविधशब्दश्च निकटवर्त्ती सविध वाचकत्वात् पदपरिमितस्थानम्। कथं भूतं अतीतं अतिक्रान्तं यद्वा अति अत्यन्तं तव सविधं समीपं इतं प्राप्तं पदयुगलं पदमपि न चलतीत्यर्थः ॥ ५ ॥

---

1. क. पाणिगुगं ।

कथमुपयाम गृहं दुरवग्रह वद ननु किं करणीयम् ।
वरद न वारय कृपय कृपामय पदयुगमनुसरणीयम्[1] ॥ ६ ॥

अखिलविमोहनरूपविलोकनमुरलीहृतहृतचित्ता ।
त्रिषु भुवनेषु च का कुलजा वद पालितकौलिकवृत्ता ॥ ७ ॥

निरुपमरूपमतुलमुरलीकलगानमिदं च सुतानम् ।
अपि जडधीषु तरुषु पशुपक्षीषु जनयति पुलकवितानम् ॥ ८ ॥

कथमिति । तवज्ञानत्व सर्वेऽसर्वे वा प्रारब्धकर्मणो वैचित्र्यादस्माकमीदृशी दशा उपस्थिता । अतः किं करणीयमित्याहुः । कथं केन प्रकारेण गृहमुपयाम । गमनसाधनयोर्मनश्चरणयोः प्रतिबन्धकत्वात् इत्यर्थः । दुःखेन अवगृह्यते प्राप्यत इति दुरवग्रहः हे दुरवग्रह दुष्प्राप वद उपदिश । किं करणीयं किं कर्त्तव्यं ममाकं कर्मणो वैचित्र्यात् त्वमपि भजनमननोर्जहासेत्यतः वन् कृपया संपद्यतामित्याह । वरदेति हे वरद भक्ताभीष्टद न वारय न निषेधय न निवर्त्तय कृपय कृपां कुरु हे कृपामय भक्तदुःखासहिष्णो कृपामयस्य तव दुःखिनीनामस्माकं दुःखनिवारणोपायभजननिवारणमनुचितमिति भावः भजनमेव प्रार्थयन्ते पदयुगमनुसरणीयमिति त्वच्चरणारविन्दद्वयं अनुसरणीयं भजनीयमस्माकमिति शेषः ॥ ६ ॥

अखिलेति । ननूत्तमनारीणां युष्माकं मया न स्वीकारे कृतेऽपि उपायेन पितॄन् विज्ञाप्य विधिना दत्तायाः पार्वत्या हिमालयदत्ताया इव शिवेन सह विवाहो युक्त इति चेदाशङ्क्याह तत्र शृणु स यं पार्वतीवदस्माकमपि तथा कर्तुमुचितम् । किन्तु तादृशमया यत्र स्थातुं अशक्नुम इत्याहु अखिलानां समस्तानां विमोहनं मोहजनकं यत्रूपसौन्दर्यं तस्य विलोकनं दर्शनं मुरल्या हृतं ताभ्यां हृतचित्तं यस्या सा तथा ईदृशी का कुलजा त्रिषु भुवनेषु मध्ये पालिता कौलिकपूजा रक्षितकुलधर्माविति धर्मानधितिष्ठतीति शेषः । इति वद त्वमेव कथय तन् किमस्माभिर्वक्तव्यमिति भावः ॥ ७ ॥

निरुपमेति । जनानामपि तव त्रैलोक्यनिरुपमगुणोदयेन वशीकृतया अधैर्या भवति किमु । अपि मम विशेषणमित्याहु निरुपमेति स्फुटम् । पुलकवितानं पुलकसमूहम् ॥ ८ ॥

---

1 क. मनुचरणीयम् ।

व्रजभयहरणकृते धृततनुरसि हरिरिव सुरगणगोपी ।
मौलिषु धेहि करं प्रतिजीवतु विरहहताखिलगोपी ॥ ९ ॥
इति वनितागणकातरभाषणनिशमनसुन्दरहासी ।
हरिरुदयेत रघूत्तमचेतसि बृन्दाविपिनविलासी । ॥ १० ॥

एवमाकुलितभाषितोत्तरा: संपरीक्ष्य नव योषितोत्तराः ।
रेमेयाभिरिव जातकामक: सस्मितसपरिभूतकामकः ॥ ८ ॥

इति श्रीमुकुन्दविलासे महाकाव्ये रघूत्तमतीर्थपादकृतौ
गोपीगोविन्दवाग्विलासारम्भो[1] नाम दशमः सर्गः ।

व्रजेति । अतो धैर्योऽपि न वचमवज्ञेथाः अस्मदर्थे तवावतार इति सदृष्टान्तमाहुः व्रजस्य व्रजस्थलसर्वलोकस्य यद्भयहरणं दुःखनाशनं तत्कृते तन्निमित्तं तत्करणाय वा धृततनुरसि धारितशरीरोऽसि सुरगणगोपी हरिर्नारायण इव अयं भावः । सुरगणरक्षणार्थं यथा चतुर्भुजशरीरधारी त्वमेव तथास्माकं रक्षणार्थं मुरलीधारी द्विभुजनन्दनन्दनतनुधार्यसि । अतोऽस्माकं दुःखहरणे विलम्बोऽन्याय्य इति । दुःखहरणोपायं व्यक्तमेव प्रार्थयते मौलिष्विति । मौलिषु मस्तकेषु करं पाणिपद्मं धेहि निधेहि अर्पय ततः किमित्याह । विरहहताखिलगोपी त्वद्विरहेण विप्रलम्भेन हता मृतप्राया अखिलगोपी प्रतिजीवतु पुनर्जीवती भवतु इत्यर्थः ॥ ९ ॥

इतीति । इत्यादि कविवचनम् निशमनं श्रवणं तेन सुन्दरहासी शेषं स्फुटम् ॥ १० ॥

एवमित्यादि । एभिः प्रकारैः आकुलितं यथास्यात्तथा भाषितं कृतं उत्तरं याभिः उत्तरं प्रतिवाक्यं तास्तथाभूताः संपरीक्ष्य सम्यक् भक्तानुरागाद्यां परीक्षाभिः सह रेमे क्रीडां चक्रे । कथं भूतः सन् रेमे तत्राह । जात कामक इव कामुक पुरुषानु करणं नाट्यन् कुर्वन्नित्यर्थ अनुकरणं लक्षणं दर्शयति । सस्मितेति परिभूतो वशीकृतकामविषयमात्रवासना येन स्वजन-वर्णत्वात् स जातकामक इत्यपि कामदं चिरं सामान्येच्छापरं इति न पौनरुक्त्यम् ॥ ८ ॥

इति श्रीमुकुन्दविलासप्रकाशिकायां दशमः सर्गः ।

---

1. क. वागविलासारासारम्भो ।

एकादशः सर्गः

अथ निखिलपतेर्मनुष्यलीलाः सकलजनाततापपापनाशाः[1] ।
अजसुतसहिताविमानसंस्था व्रजमनु खे ययुरीक्षितुं सुधाशाः ॥१॥

हरिहरिततिभिर्विराजमाने त्रिगुणहरौ हरिणा हरिप्रियाणाम् ।
हरिरभिमिषितुं[2] समैदनन्ते हरिभगिनीविपिने सरासलीलाम् ॥२॥

अथनिखिलपतेरिति । रतान्ते सूचितां रासलीलां देवान् प्रति नारद अथ रासारम्भानन्तरं व्रजमनुव्रजं लक्षीकृत्य यत्खमाकाशं तस्मिन् सुधाशाः देवाः ययुरित्यन्वयः । किं कर्तुं ययुस्तदाह । निखिलपतेः श्रीकृष्णस्य मनुष्यलीलाः ईक्षितुं द्रष्टुं लीलाः कीदृशीः सकलजनानां आततानि विस्तीर्णानि यानि पापानि दुःखादिदुरितानि तेषां नाशा याभ्यः तास्तथा सुधाशाः कथंभूताः अजसुतेन नारदेन सहिताः युक्ताः पुनः कीदृशाः विमानेषु देवरथेषु संस्था तिष्ठन्तः ॥ १ ॥

हरिरित्यादि । देवानां गतिमुक्त्वा इन्द्रस्य प्रस्थानत्वात् पृथक्कृतरीतिमाह । प्रसिद्धः हरिरिन्द्रः हरिभगिनीविपिने यमभगिन्याः यमुनायः वनो हरिणा श्रीकृष्णेन सह हरिप्रियाणां लक्ष्मीनां रासलीलामभिमिषितुं अनन्ते आकाशे समैत् समागतवान् इत्यन्वयः । वने कथंभूते त्रिगुणहरौ त्रिगुणः शैत्यसौगन्ध्यमान्द्य गुणविशिष्टो हरिर्वायुर्यत्र तत् त्रिगुण हरिः तस्मिन् त्रिगुणहरौ त्रिगुणहारिणि पुनः कीदृशं हरेश्चन्द्रस्य हरीणां रश्मीनां ततिभिः श्रेणीभिः विराजमानं विशिष्टशोभावति ॥ २ ॥

---

1. क. जगास्तततापपापनाशाः ।
2. ध. हरिरभिमिक्षितुं ।

वनमिदमतिनन्दनं हरेस्तत्सुरसरितो रुचिरा हरेः सुतेयम् ।
विहरति हरिरेष पश्य साक्षादिति हरिभाः स मुनिर्जगौ[2] महेन्द्रम् ॥३॥

क्वनु ननु विपिनं यदेव वृन्दावनमिति कुत्र कलिन्दकन्यका सा[3] ।
विलसति वद कुत्र केशवो वा किमपि मुने न वय विलोकयामः ॥४॥

वनमिति । श्रीकृष्णलीलादर्शनं तदत्यन्तभक्तिं विना देवानामपि न भवति तादृक् भक्तौ सत्यां तु भवतीति दर्शयितुं नारदेन्द्रवचनानि वक्तुं श्लोकानाह । हे हरे । हे इन्द्र, तत् प्रसिद्धं वृन्दावननामकं पुरोवर्तिनं वनं अतिनन्दनं नन्दननामकं तद्वनमति कान्त गुणैरित्यर्थः । हरेः सूर्यस्य सुता कन्या यमुना इयं पुरोवर्तिनि सुरसरितो मन्दाकिन्याः सकाशादपि रुचिरा सुन्दरी त्यर्थः । हरिः कृष्ण एष पुरोवर्ती । एतत्सर्वं साक्षात्पश्य इति एतानि वाक्यानि स मुनिर्नारदः महेन्द्रमिन्द्रं जगौ जगाद । मुनिः किदृश हरिभाः हरेश्चन्द्रस्य भा इव भा कान्तिर्यस्य स हरिभा ॥ ३ ॥

क्वन्विति । इति नारदेन सादृश्यमान किञ्चिदपि पश्यन् इन्द्र उवाच । क्वनु कुत्रनु ननु भोः नारद यदेव वृन्दावनमिति तत् कुत्रेत्यर्थः । ननु प्रश्ने कालिन्दी वा यमुना कुत्र केशवो वा कुत्र विलसति तत् सर्वं वद । ननु उक्तमेव इत्याशङ्क्याह वयमिन्द्रादयो देवा । किमपि किञ्चिदपि हे मुने ननु विलोकयामः नैव पश्यामः ॥ ४ ॥

---

1. ग. वल ।
घ वनमिति दमतिनन्दनं ।

2. ख. ग हरिभिः सुमुनिर्जगौ ।
घ हरि भो मुनिर्जगौ ।

3. घ. कुत कलिन्दकासा ।

इति सुरनिकरेण कृष्णमायाविमुषितशेमुषिणा निवेदितार्थः ।
विधिसुत उदितस्मितोऽवभाषे शरणमुपेत हरिं हृदेति देवान् ॥५॥
पौत्रेण शौरे रचितोपदेशः संशुद्धचेतास्स सुरः सुरेशः[1] ।
संचिन्त्य चित्ते धृतगोपवेशं बहिर्लुलोके सरसं रमेशम् ॥ ६ ॥
तान्दृष्टकृष्णान् सविशेषतृष्णान् हरेश्चरित्रं मिषितुं विचित्रम् ।
भक्त्या पराभूय परेशमायां मुनिर्जगौ ग्लौसमभाः[2] सभायाम् ॥७॥

इति सुरेति । सुरनिकरेण देवसमूहेन इति एभिः प्रकारैः निवेदितार्थः विज्ञापितस्य प्रयोजनः सन् विधिसुतो नारदः देवान् अवभाषे इत्यन्वयः । सुरनिकरेण किंभूतेन तदाह । कृष्णमायया या विमुषिता खण्डिता शेमुषी विवेकं यस्य स तथा तेन किं अवभाषे तदाह । हृदा मनसा हरिं कृष्णं ज्ञानदत्वेनाश्रयं उपेत प्राप्त इत्यर्थः ॥ ५ ॥

पौत्रणेति । ततश्च नारदोपदिष्टमार्गे देवास्तत सर्वमत्यन्नित्याह । शौरेः श्रीविष्णो पौत्रेण नारदेन रचितः कृतः उपदेशः यस्यै स रचितोपदेशः सन् संशुद्धचेता सम्यक् शुद्धचित्तः सुरेशः ससुरो देवगणसहितः संचिन्त्य सम्यग्बुध्या वा चित्ते मनसि लक्ष्मीकान्तं रमेश इत्यनेन रमाभिः साहित्यमपि दर्शने सूचितम् ॥ ६ ॥

तान्दृष्टेति । ततश्च रासलीलां दैवैर्वीक्ष्यमाणां नारदो वीणायां देवसभायां गीतवानिति दर्शयितुमाह । तानिन्द्रादीन् दृष्टकृष्णान् । पुनः कथभूतान् सविशेषतृष्णान् सधिकाभिलाषमीक्षितुं द्रष्टुं विचित्रमद्भुतं भक्त्या पराभूय परेशस्य श्रीकृष्णस्य मायां परेशमायां मुनिः नारदो जगौ वीणया उपगीतवान् । कुत्र जगौ तदाह । देवसभायां कीदृशं ग्लौसमया ग्लावा चन्द्रेण समाभा शोभा यस्य स तथा ॥ ७ ॥

---

1. ग. सशुद्धचेतास्ससुरः ।
घ. सशुद्धचेता सुसुरस्वरेण ।

2. ख. ग. समभिः
घ. समता ।

द्वात्रिंशः प्रबन्धः

1

॥ कल्याणरागेण गीयते ॥

गोपीनिकरससंख्यकतनुधर उपगतमदनविलासे ।
दयितावदनविलोकनसस्मित उदितमनोहरहासे ।
हरिरिह विहरति युवतिसमाजे ।
एकैकान्तरमरकतमणिवरकनकमणितति[2] विराजे ॥
॥ ध्रुवपदम् ॥

गोपीनिकरेति । नारदगीतां त्रिभिः गीतैं रासलीलां वर्णयति । तत्र प्रथम गीतं गोपीकृष्णोभयप्रधानवर्णनं द्वितीयं कृष्णप्रधानविरहवर्णन तृतीयं राधाप्रधानवर्णनमिति बोध्यम्। हरिरिह विहरति युवतिसमाजेति ध्रुवपदगीतम्। विशेष्य विशेषणाभ्यां सकल प्रथमान्त सप्तम्यन्तयोरन्वयोऽनुसन्धेयः। हरिः कीदृशः युवतिसमाजे कीदृशे तदाह खण्डाभ्यां चतुर्भिर्विशेषणैः गोपीनां निकरः समूहस्तैः ससंख्यकाः समानसंख्यका यास्तु तनवः शरीराणि तद्धरः इन्द्रनीलमणिकाश्रेणीधरैः कपूत्रभिव एक एव भगवान् सर्वतनुषु मनःसु वर्तत इति ध्येयम्। उपगत उपयातः मदनविलासो यस्य समाजस्य स तथास्मिन् यद्वा उपगतो प्राप्तो मदनविलासो येन दयितानां यानि वदनानि तेषां यत् विलोकनं दर्शनविशेषस्तेन सस्मितो जात मृदुहासः स तथा यद्वा दयिता भर्यत् स्वमुखदर्शनं तेन सस्मित इत्यर्थः। समाजे कीदृशे उदितेत्यादि स्फुटम्। हरि. श्रीकृष्ण इह प्रसिद्धे युवतिसमाजे गोपीसमूहमध्ये विहरति क्रीडति। हरिसहितं युवतिसमाजमुपभिनोति खण्डकेन । एकैकस्याः कनकमणेरन्तरं बहिरुत्तरो मरकतमणिवरो यस्यां कनकमणिततौ सा एकैकान्तर मरकतमणिवरा चासौ कनकमणिवरश्रेति कर्मधारयः सैव विराजे विशेषण शोभमाने पचादित्वादत्र अच् प्रत्यय द्रष्टव्यः यद्वा तव विराजे। विराजमानं यस्येति स तथा तस्मिन् घञन्ते विराजपदे कुत्वाशङ्का न कर्त्तव्यनिष्ठा निट् एव कुत्वविधानात् ।

---

1. क. रागस्योल्लेखो नास्ति ।
2. घ.एकैकान्तर मणिवर मरकतमणितति ।

घनमण्डलतुलतनुरतिमञ्जुलचपलाकुलसमकाये ।
तरुणतमालपालिरिव विलसति[1] कनकलतासमुदाये ॥ २ ॥

वनिताबाहुलताश्चितकन्धर ईशभुजालसदंशे[2] ।
नर्त्तनसुचपलकुण्डल उपचितनटनसुनटदवतंसे ॥ ३ ॥

घनेति । पुनश्चरणै केन चतुर्भिर्विशेषणैस्तौ विशिनष्टि घनमण्डलं मेघखण्डसमूहः तत्तुला तत्सादृश्यस्तनवो यस्य स तथा अति मञ्जु ... ति सुगमम् । तरुणाः ये तमालास्तापिच्छाः घन भ ... विशेषाः चेष्टापालिः श्रेणी सर्वारण्यभूम्याहुः कथयन्ति द्विरूपतामित्यनुशासनात् द्रुमोऽपि द्रष्टव्यः । विलसति शोभमाने कनकलतासमूहमये ॥ २ ॥

वनितेति । पुनश्चरणैकेन चतुर्भिर्विशेषणैः विशिनष्टि । वनितानां जनितानुरागयोषितां बहुलताभिरश्चिता पूजिता शोभिता कन्धरा यस्य स तथा ईशस्य श्रीकृष्णस्य भुजाभिलम्बनशोभमाना अंशाः भुजशिरांसि कन्धरा वा । यस्य युवतिसमाजस्य तस्मिन् नर्त्तनेन सुन्दरं यथा स्यात् तथा । चपले चञ्चले कुण्डले मकरकुण्डले यस्य स तथा उपचितं अधिकं जातं वा यन्नटनं नृत्यं तेन नटन्तो नृत्यन्त इव सुचञ्चला अवतंसा मणिमयविचित्रकुण्डलानि यस्य स तथातस्मिन् ॥ ३ ॥

---

1. क. विमृशति ।
2. क. कलरव इश भुजालसदंसे
घ. कन्धर उपहृता लसदंसे ।

ललितललितकर[1] पल्लवकम्पिनि चित्रचित्रपदचारे ।
कुटिलकुटिलतनुमध्यमशोभिनि चलचलमञ्जुलहारे[2] ॥ ४ ॥
चरणाभरणसकिङ्किणीकङ्कणमञ्जुलकलकलजाले ।
प्रियतमसंगतगानसमनुगतगीतमिलितकरताले[3] ॥ ५ ॥

ललितेति । परस्पर स्कन्धासक्तभुजानां गोपीकृष्णानां नृत्यकौशलं दर्शयित्वा युवतिसमाजस्य कौशलं त्रिभिः खण्डैर्वर्णयति । ललितललितं अतिमनोहरं यथा स्यात् तथा करपल्लवान् कम्पयितुं शीलं यस्य विशेषेण स्वभावात् एव वा यस्मिन् यत्र अतिमनोहरकम्पवति विचित्रं चित्रं विलक्षणविलक्षणं अद्भुताद्भुतं वा पदानां चारं चलनं यस्य स तथा तस्मिन् कुटिलकुटिलं नृत्यगतिभिरतिवक्रं यन्मध्यमं तेन शोभावति चलचला कुण्डलहारा यस्मिन् स तथा तस्मिन् ॥ ४ ॥

चरणेति । चरणाभरणानि सकिङ्किणानि वलदमध्यवलयविशेषाणि च तेषां मनोहरं कलकलाजालं यत्र स तथा तस्मिन् । कङ्कणानां सामानाधिकरण्येन किङ्किणीसाहित्य बोध्यम् । कलकलरावस्य गमनधर्मत्वेऽपि गृहे शब्दः पर्वते शब्दः इत्यादिवत् युवतिसमाजस्य अधिकरणत्वं बोध्यम् । नृत्यकौशलं दर्शयित्वा त्रिभिः खण्डैः गीतकौशलं वर्णयति प्रियतमेति प्रियतमस्य सततं सम्यग्विस्तृतं वा यद्गान तत् सततं घनीभूतं सम्यग्विस्तृतं वा यद्गानं समनुगतं सम्यक् अनुगतं यत् स्वकीयगीतं तन्मिलितास्तालाः करतलध्वनिः ध्वनिविशेषो यस्य यस्मिन् वा स तथा तस्मिन् ॥ ५ ॥

1. घ. ललितलुलितकर ।
2. घ चलाचल कुंजकुटीरे ।
3. क. घ. पदस्यास्य उल्लेखो नास्ति ।

मृदुमृदुहसनचपलचपलेक्षणरचितरुचिरमुखदृष्टौ[1] ।
प्रियमुरलीकलरवमिलितध्रुवगीतकृतामृतवृष्टौ[2] । ॥ ६ ॥
काममपि सुनटनभङ्गीजनितरतिमकृतभुजान्तरनीताम् ।
कांचिदचुम्बदलंरसयितुमिव गानरसं प्रियगीताम् ॥ ७ ॥

मृद्विति । मृदुमृदुहसनैः कोमलाल्पहासैः चपलचपलैः वीक्षणैः अतिचञ्चललोचनैः रचिता कृता रुचिरस्य प्रियस्य श्रीकृष्णस्य मुखदृष्टिर्मुखदर्शनं येन स तथा तस्मिन् । इद तु गीतरसकालीनत्वात् कौशलार्थं बोध्यम् । गीतान्तरकौशलं दर्शयन् खण्डैकेन प्रियस्य मुरल्या कलरवैः मधुरध्वनिभिः मिलिततालतानादिभियुक्तं यत्र तं गीतं तेन कृतामृतवृष्टिर्येनस्यति तथा तस्मिन् । अमृतवृष्टिमत्यन्तमधुरगीतकौशलमिति बोध्यम् । खण्डान्तराणां प्रत्येकगानानन्तरं यत् पुनः पुनर्गीयमानत्वात् गीतं तद्ध्रुवमित्युच्यते । तस्य गानमेव ध्रुवगीतमिति ॥ ६ ॥

कामपीति । युवतीनृत्यगीतकौशलं वर्णयित्वा तेन रञ्जितस्य नायकशिरोमणेः श्रीकृष्णस्य तासु प्रासादरूपां लीलां पञ्चभिः खण्डैः वर्णयति । काममपि कांचित् सुनटनभङ्गीभि सुन्दरनृत्यभङ्गीभिः जनिता उत्पादिता रतिः स्वविषये प्रीतिरनुरक्तिर्यया तथा ताम् । भुजान्तरनीतां क्रोडनीतां हरिरनुकृतवान् । कांचित् प्रियगीतां प्रियप्रीतिजनकजातां यस्यां सा तथा ताम् । अलमत्यन्तं वारंवारं निविडं वा अचुम्बत तद्वदने स्ववदनसंयोगं कृतवानित्यर्थः । चुम्बनं कीदृशं अन्यथोत्प्रेक्षते । गीतरसं रसयितुमिवेति । एतेन गीतस्य निरुपममाधुर्यं प्रकटितम् ॥ ७ ॥

---

1. क. मुखदृष्टैः ।
2. क. कृतामृतदृष्ठैः ।
 घ. ध्रुवशीतलममृतवृष्टौ ।

श्लेषणचुम्बनकञ्चुककर्षणनखरविलेखविलासी[1] ।
वामाभ्रूकुटिकुटिलितलोचनलोकनकौतुकहासी[2] ॥ ८ ॥
यौवतनिरुपमयौवनविभ्रममोहित इव[3] सुविहारी ।
सततं भातु रघूत्तमचेतसि भक्तपरमसुखकारी ॥ ९ ॥

श्लेषणेति । श्लेषणादिभिः विलसितुं युवतिविलासयितुं वा शीलमस्य स तथा । यद्वा आलिङ्गनरूपा ये विलासाः ज्ञेयास्ते प्रशस्ताः । अतिशयितो बहवो वा विद्यन्ते यस्य स तथा । वामानां प्रतीपदर्शनीनां वक्रमनोहरदर्शनीतां गोपीनां भ्रूकुटिसहितानि कुटिलानि यानि लोचनानि तैस्तेषां वा यद्विलोकनं दर्शनं तत्र यत्र कौतुकं दिदृक्षा चिकीर्षा वा तेन हसितुं शीलमस्य यद्वा तादृशकौतुकात् यो हासः प्राशस्त्येव अस्ति यस्मिन् स तथा ॥ ८ ॥

यौवतेति । यौवतस्य युवतिसमूहस्य यन्निरूपमयौवनं तेन ये विभ्रमाः विलासास्तैर्मोहिता इव न तु मोहितः । सुविहारी सुन्दरबहुविहारवान् श्रीकृष्णस्य विहारोऽयं लोकहितार्थं न तुस्वभोगार्थं रागयुक्तः जीवस्यैव इयं स्त्री अहं पुमान् अनया सहाहं क्रीडामि इत्यादि मोहः । परमेश्वरस्य विज्ञत्वे मोहाभावात् सर्वमनुकरणमात्र' इति बोधयितु मोहितमिवे युक्तं एवंभूतमिमं परमेश्वरं वर्णयित्वा कविराभाले अन्येषामपि तदेवं सततं निरन्तरं भातु प्रकाशतां शेषं स्फुटम् ॥ ९ ॥

1. घ· विलासा ।
2. घ· कौतुकहासा ।
3. घ· तव ।

त्रयस्त्रिंशः प्रबन्धः

॥ देशाख्यरागेण गीयते ॥[1]

॥ रूपकतालेन ॥[2]

विकचकुन्दकुमुदबृन्दमल्ली लसति कानने ।
कैरववनसुरभिपवनमृदुनवदलचालने ।
पश्यत वनमालिनम् । रासनटनशालिनम् ॥ ॥ १ ॥

॥ ध्रुवपदम् ॥

सकलचन्द्रविमलसान्द्रकिरणराजिरञ्जिते ।
कुसुमपुञ्जरुचिरकुञ्जमधुपमधुरगुञ्जिते ॥ २ ॥

विकचेत्यादि । कानने रासनटनशालिनं पश्यत इत्यन्वयः । कानने कीदृशे विकचा स्फुटाः कुमुदबृन्दमल्लयो यांस्ताभिर्लसति शोभमाने मल्ली पदं तु पुष्पपरं बोध्यम् । पुनः कीदृशे कैरववनस्य सम्बन्धी अतः सुरभिः सौगन्ध्यवान् यः पवनः तेन मृदु स्वरूपं न च दलानां लतावृक्षनवपत्राणां चलनं कम्पनं यस्मिन् तत्तथा तस्मिन् । पश्यतेत्यादि सुगमं रासे यन्नटनं तच्छालिनं तद्वन्तं ननु शालिन्निति मत्वर्थीयः प्रत्ययो न व्याकरणसिद्धत्वात् नटनवन्तमिति व्याख्यानं संगच्छत इति नाशङ्कनीयम् । शलगतावित्यर्थे प्रयोगात् धातूनामनेकार्थत्वात् ॥ १ ॥

सकलेति । पुनः कीदृशे कानने इति खण्डद्वयेन विशिनष्टि । सकलः संपूर्णो यो चन्द्रस्तस्य या विमलाः निर्मलाः सान्द्राः निविडाः किरणराजयस्ताभि रञ्जिते शोभिते पुनः कीदृशे कुसुमपुञ्जे रुचिरेषु कुञ्जेषु लतागृहेषु मधुपानां भ्रमराणां मधुराणि गुञ्जितानि यस्मिन् तत्तथा तस्मिन् ॥ २ ॥

---

1. क. क. घ. मल्लाररागेण गीयते ।
2. घ तालस्य लेखो नास्ति ।

मदनरङ्गयुवतिसङ्गरसतरङ्गचञ्चलम् ।
प्रियतमालिमुखनिभालिमारुचलदृगञ्चलम् ॥ ३ ॥
झंझणदिति नूपुररतिचित्रचरणचारिणम् ।
अङ्गुलिततिभङ्गुरगतिहस्तककुलकारिणम् ॥ ४ ॥
मुरलीकातिमधुरजातिगीतरसविलासिनम् ।
परिहासकर[1] युवतिनिकरकेलिकुतुकहासिनम् ॥ ५ ॥

मदनेति । पुनर्वनमालिनं द्वादशखण्डधटितैः पड्भिश्चरणैर्द्वादशभिः विशेषणैर्विशिनष्टि । मदने रङ्गे रागो रतीच्छा यासां तादृशीनां युवतीनां सङ्गो सङ्गमे ये रसतरङ्गा रसोर्मयः तश्चञ्चलं प्रियतमालीनां यानि सुखानि तानि निभालयितुं द्रष्टुं शीलमस्य तादृशं चारु चलं चञ्चलं नयनान्तो यस्य स तथा तम् ॥ ३ ॥

झंझणदिति । झंझणदिति नूपुरयोर्यत्र तादृशं यथा स्यात्तथा चित्र यथास्यात्तथा चरणे पादपद्मे चार यतुं शीलमस्य स तथा तं यद्वा क्रियाविशेषणद्वयं चारु त्यस्य प्रातिपदिकस्य विशेषणं ज्ञेयम् । तथा च तादृक् चरणान्ते यस्य स तथा तं अङ्गुलिततेः भङ्गुराः कुटिलाः गतयो यत्र तादृशं यत् हस्तककुलं हस्तकक्रिया वरोप सङ्गहस्तत्कारिणम् ॥ ४ ॥

मुरलीति । मुरलीका वंशी तया करणभूतया यदतिमधुरजातिगीतं अतिमधुरस्वभावज्ञानं तस्य यो रसस्तत् यद्वा रसो मधुरद्रव्यं अमृतमिति यावत् तत् विलासयितुं तत्र वा विलासितुं शीलमस्येति स तथा तम् । परिहासः परिहासकरो यो युवतिनिकरः तस्य केलिषु यत् कौतुकं चिकीर्षाविशेषस्तेन हासी हसनवान् तम् ॥ ५ ॥

1. क. प. रहसकर ।

झणिति झणिति सिञ्जिततति[1] नर्त्तितशतकामिनीम् ।
नवनवरसरासरभसकोटिगुणितयामिनीम् ॥ ६ ॥

स्त्रीकरतलतालतरलकङ्कणरुतकौतुकम् ।
श्लेषणशतचुम्बनततभीरुमकरकेतुकम् ॥ ७ ॥

झणिति । झणितशिञ्जिततति: नूपुरकङ्कणकिङ्किणीशब्दसमूहो येन तादृशं यथा स्यात् नूपुरकङ्कणकिङ्किणीशब्द समूहो येन तादृशं यथा स्यात् तथा । नर्त्तिताः शतं कामिन्यो येन स तथातम् ।नवनवाः प्रतिक्षणं नूतनाः रसा रागाः युवतीनां स्वस्य च यत्र स नवनवरसो रासः तस्मिन्तस्माद्वा यो रभसो रासहर्षो वा तेन हेतुना कोटि गुणिता अति दीर्घा कृता यामिनी रात्रि येन स तथा तम् । उपसर्जनत्वात् खण्डद्वयान्तरयोरिकारयोर्लघुत्वम् ॥ ६ ॥

स्त्रीति । स्त्रीणां यानि करतलानि तेषां ये करतालस्तैस्तरलानि यानि कङ्कणानि तेषां या निरुतानि तेषु कौतुकं नव नवाशुश्रूषा यस्य स तथातम्, श्लेषणानि शतं चुम्बनानि तैस्तत विस्तारित वर्द्धितः भीरूणां गोपीनां मकरकेतुः कामो येन स तथा तम् । समासान्तः यद्वा तैर्वर्द्धितं भीरूणां मकरकेतुकं कामसुखं येन कशब्दस्य सुखवाचकत्वात् ॥ ७ ॥

---

1. ख- झंकृतेति ।

अतुलनटनकेलिघटनहतविबुधनटस्मयम् ।
निखिलसुखद वेणुनिनदसरमणीसुरविस्मयम्[1] ॥ ८ ॥

इदमघहरविहरणवरमखिलसदनुमोदितम् ।
चिन्तय हृदि धृतमुरभिदि यतिरघूत्तमोदितम् ॥ ९ ॥

अतुलेति । अतुलो नास्ति तुला यस्य तदतुलं नटनं नृत्यं तदेव केलिः क्रीडा तस्याः यत् घटनं निर्माणं तेन हेतुना हतो नाशितः विबुधनटानां देवनटानां स्मयोऽहङ्कारो येन स तथा तम् । निखिलानां सुखदो यो वेणुनिनदस्तेन सरमणीनां सुराणां विस्मयमाश्चर्यं चमत्कारात्मिका बुद्धिर्यस्मिन् यस्मात् वा स तथा तम् ॥ ८ ॥

इदमिति । नारदगीतं श्रीकृष्णचरितं वर्णयित्वा भक्तानुपदिशति । अघहरस्य विहरणवरं हृदि चिन्तयेत्यन्वयः । हे भक्तवृन्द इति शेषः । हृदि कथं भूत । धृतमुरभिदि धृतो धारितो मुरभित् श्रीकृष्णो येन यत्र वा तत्तथा तस्मिन् कीदृशं विहरणवरं यतिना रघूत्तमेन उदितं वर्णितं ननु सन्न्यासीनां निर्गुणब्रह्मभावनैव हृततनुचिता अलं सगुणब्रह्म वर्णनायाऽनेन इत्याशङ्क्याह । अखिलेति । अखिलैः सर्वैः सद्भिः व्यासपराशरवाल्मिकीनारदादिभिरपि अनुमोदितं वर्णनं श्रवणाभ्यां अङ्गीकृतमास्वादित वा अतो रघूत्तम नामा यतिनानुयोज्य इति भावः ॥ ९ ॥

---

1. क. सरणि सुर विस्मयम् ।

चतुस्त्रिंशः प्रबन्धः

॥ मल्लाररागेण गीयते ॥[1]

प्रियतमकरकिशलयधरवामपाणिसरसिजा ।
भ्रूकुटिसङ्गीनयनभङ्गीविततशौरिमनसिजा[2] ।
नटति साधु राधिका । हरिनटसहसाधिका[3] । ॥ १ ॥
॥ ध्रुवपदम् ॥

अरुणचरणकमलविमलगतिजितसुरनर्त्तकी ।
श्रवणरञ्जिमधुरसिञ्जिनूपुरमणिसप्तकी ॥ २ ॥

प्रियतमेति । श्रीराधानृत्यं वर्णयति । श्रीराधिका साधु यथा स्यात् तथा नटति इत्यन्वय । नृत्यविशिष्टा राधिका कीदृशी इति एकविंशतिविशेषणै विशनष्टि । हरिः श्रीकृष्णः स एव नटो नर्त्तकः तस्य सहसाधिका सहचारिणी सहायिनीत्यर्थः । पुनः कीदृशी प्रियतमस्य श्रीकृष्णस्य कर एव किशलयं पल्लवं तद्धरं कामपाणिं सरसिजं यस्याः सा तथा । पुनः कीदृशी भ्रूकुटिभङ्ग्या हरिसङ्गमया नयनभङ्गीतया विततो विततो विसृतो वर्द्धितः शौरे श्रीकृष्णस्य मनसिजः कामो यथा सा तथा ॥ १ ॥

अरुणेति । पुनः कीदृशी अरुणे रक्ते ये चरणकमले तयो विमला निर्दोषाः या गतयः ताभिर्जिता पराजिता सुरनर्त्तकी उर्वशी प्रभृतयो यथा सा तथा । पुनः कीदृशा । श्रवणानि श्रवणेन्द्रियाणि रञ्जयितुं शील येषां तादृशानि मधुराणि सिञ्जितानि ध्वनिविशेषा यस्याः तादृशी । नूपुरयोः मणियुक्ता सप्तकी क्षुद्रघण्टिका यस्याः सा तथा ॥ २ ॥

---

1. क घ. रागस्योल्लेखोनास्ति ।
2. घ. गौरिमनसिजा ।
3. घ. नटति सा राधारसधिका ।
हरिनट सह राधिका ।

झंझणरुतकङ्कणयुतचित्रचपलपाणिका ।
अङ्गहारचटुलहारचलतरपरिधानिका ॥ ३ ॥
उरसिजतटतरलितपटचलितललितकुण्डला ।
भ्रमणिकातितनुविभाति सुभगरासमण्डला ॥ ४ ॥
गीतसहितनृत्यवशितदयितनटमतल्लिका ।
शिथिलपाशचिकुरपाश[1] विगलदमलमल्लिका ॥ ५ ॥

झंझणेति। झंझाण इति रुतानि यस्य तादृशं यत् कङ्कणं तेन युतो युक्तो चित्र चपलोऽभूतचाञ्च ययुक्तः पाणिर्यस्या स तथा अङ्गहारा नृत्यकालेऽङ्गविक्षेपास्तै श्चटुलश्च-ञ्चलहारो यस्याः सा अङ्गहाराश्चटुलहारा चलतरं चञ्चलतरं इतस्ततः क्षिप्तं परिधानं नाभिपद्माव द्गुल्फपर्यन्ताधोवसनं यस्याः सा तथा सा चासौ सा चेति ॥ ३ ॥

उरसिजेति। उरसिजतटे तरलितस्तरलीकृतः पटो यस्या यया वा। चलिते चञ्चले ललिते मनोहरे कुण्डले विचित्रमणिमयसुवर्णकुण्डलयुगं यस्याः सा तथा सा चासौ सा चेति। भ्रमणिका तनुभ्रमणान्मण्डलाकारगतिविशेषः तयातिशयिता या तनुविभा शरीरदीप्तिः तथा सुभगं रासमण्डलं मण्डलाकाररासस्थानं यया सा तथा ॥ ४ ॥

गीतेति। गीतसहितेन नृत्यकालीनेन गीतेन वशिता वशीकृता दयितनटमतल्लिक श्रीकृष्णप्रशस्तनटो यया सा तथा। शिथिलः पाशः बन्धनं यस्य तादृशी वा चिकुरपाशः केशसमूहः तस्माद्विगलतोऽमला मल्लिका मल्लिपुष्पाणि यस्याः सा तथा ॥ ५ ॥

---

1. घ· शिथिलमाल चिकुरजाल ।

भङ्गुरचलदङ्गुलीदलयुगधृतकपटाञ्चला ।
मधुरहास्यनयनलास्यहरिदर्शनचञ्चला ॥ ६ ॥
द्रुतपदशतकौतुकगतखञ्जनगतिलम्बिनी ।
मन्दमन्दगमनबृन्दहंसगतिविडम्बिनी ॥ ७ ॥
अञ्चलधरकुञ्चितकरकुटिलकुटिलला सिका ।
बहुविचित्रतनुचरित्रविस्मितसुरलासिका ॥ ८ ॥

भङ्गुरेति । कुटिलेन चलता चञ्चलेन अङ्गुलीदलयुगेन वामकरपदाङ्गुष्ठतर्जनीदलाभ्यां धृतं कपटाञ्चलं शिरो वसनान्तो यया सा तथा तादृशी सती किं चकार तदाह । मधुरं सुन्दरं हास्यं यत्र तादृशं नयनलास्यं लोचननृत्यं यत्र एवंभूतं यद्धरिदर्शनं हरौ विषये लोचनक्रिया तत्र चञ्चला ॥ ६ ॥

द्रुतपदेति । द्रुतं शीघ्रं यत्र पदशतं पदविक्षेपशतं यत्र एवंभूतं कौतुकगतं कौतुकाय कौतुकेन वा गमनं तेन खञ्जनगतिं लम्बितुं अवलम्बितुं शीलं यस्याः सा तथा । यद्वा द्रुते पदे येषु तानि द्रुतपदानि शतकौतुकगतानि तानि च एतानि चेति तैः खञ्जनगतिलम्बिनी खञ्जनगमनानुकारिणी यर्थ । यद्वा पदानि पदयोः शतं कौतुकगतानि यस्यां सा द्रुतपदशतकौतुकगतः । ईदृशी या खञ्जनवत् गतिः तल्लम्बिनीत्यर्थः इत्यास्तां तावद् विस्तार मन्दमन्दं अतिधीरं यद्गमनवृन्दं तेन हंसगतिविडम्बिनी हंसगमनानुकारिणी अयमपि नृत्यविशेषो ज्ञेयः ॥ ७ ॥

अञ्चलेति । अञ्चलधरो वसनप्रान्तधरः कुञ्चितकरो यत्र तादृशं कुटिलं वक्रवक्रं च यथा स्यात् तथा । लासिका नृत्यन्ती ननु क्रियाविशेषणस्य कथं समासः यस्तु कर्मधारयः सधर्मिणा सह विशेषणस्यैव भवति । यथा नीलोत्पलमिति । इह तु नृत्यवती धर्मिणी न कुटिलादिविशेषणे नैव विशिष्यते । किन्तु तत्र गुणीभूतं यन्नृत्यं तदेव विशेष्यं अतो विशेषणं

नागरवरसंमद्भरहारदानभूषिता ।
श्लेषपालिचुम्बनालिकरतदधिकभूषिता[1] ॥ ९ ॥
श्रमजलहरमाधवकरमृजितवदनचर्च्चिता[2]
श्रुतिविचारविदित[3] सारयतिरघूत्तमार्च्चिता ॥१०॥

विशेष्येण बहुलमिति सूत्रस्य नायं विषयः । ननु द्वितीया तत्पुरुष एव स्यात् इति चेन्न । द्वितीया श्रितातीतेत्यादि सूत्रगृहीतानां मध्ये लासिकेत्यादरेण ग्रहणात् इति नाशकंनीय क्रियाविशेषणस्य कर्मत्वविधानादन्यथानुपपत्त्या द्वितीयाश्रिते यादि योगविभागेन समासोपपत्तेः । तथा च द्वितीया तत्पुरुष एव यं समास क्रियाविशेषण य विशेष्यालभ्यङ्ग-त्वात् निर्लिङ्गताप्रसङ्गात् स केनचिन्लिङ्गेन विना निर्देष्टुमशक्यतया सामान्यतो नपुंसकलिङ्गतेति युक्ता । नपुंसकलिङ्गत्वे सिद्धे कर्मत्वाविधानार्थैक्यत्वात् । अतएव स्तोकनम्रा स्तनाभ्यां इति कालिदासप्रयोगोऽपि साधु संगच्छते । बहुविचित्राणि अति विचित्राणि तनुचरित्राणि अङ्गदविक्षेपणानि तैस्तेषु वा विस्मिताः सुरलासिकाः देवनर्त्तक्यः उर्वश्यादयो यस्यां सा तथा ॥ ८ ॥

नागरेति । नागरवरेण श्रीकृष्णेन संमदभरेण प्रियातिशयेन संमदभराय प्रीत्यतिशयाय वा हारदानेन स्वकण्ठादुद्धृत्य तत्कण्ठे हारमर्पणेन विभूषिता अलंकृता तत्कीदृशी सा श्लेषपालिश्च चुम्बनालिश्च ते श्लेषपालिश्चुम्बनाली ते करोतीति तत्करश्चासौ श्रीकृष्णश्चेति तत्करः तेनाधिकं यथा स्यात् तथा भूषिता ॥ ९ ॥

श्रमजलेति । श्रमस्य नृत्यश्रमस्य जलं श्रमजलं यद्वा श्रमजातजलं मध्यपदेलोपी समासः श्रमजलं हरतीति मार्जनेन दूरीकरोति इति श्रमजलहरो यो माधवस्तस्य करः पाणिपद्मं तेन मृजितं मार्जितं यद्वदनं मुखं तेन चर्च्चिता शोभिता श्रुतीनां विचारेण तात्पर्यनिर्णयेन विदितं सारं जगदुत्कृष्टं वसुब्रह्मैव येन एवंभूतेन यतिना रघूत्तमेन अर्च्चिता पूजिता ॥ १० ॥

---

1. क. तूषिका । 2. क. मृदिवदनचर्च्चिता । 3. ख. विहित ।

वीणाप्रकाण्डेन सताण्डवो यन्मुदोपगायन्मदयत्यशेषान् ।
मुनिः परंब्रह्मसगोपरूपंसंदर्शयामास तदेव देवान् ॥ ८ ॥
यदेव वाचां मनसोऽसमक्षंतदेव जातं मिथुनानि लक्षम् ।
गोपीमुकुन्दाख्यमुपास्यमिष्टंसदा सतामस्तु हृदि प्रविष्टम् ॥ ९ ॥

विणेति । ईदानीं नवभिः श्लोकैः सर्गसमापयिष्यन् ग्रन्यादौ कविताछलेन परंब्रह्मैवाहं प्रवक्ष्यामीति यत् प्रतिज्ञातं तत् द्वाभ्यां श्लोकाभ्यां सम्पादयन् सविरामां रासलीलां स्वयमाह । यत् परंब्रह्म वीणाप्रकाण्डेन सताण्डवः सन् मुदा हर्षेण उपगायन् मुनिः अशेषान्मदयति प्रत्यहमानन्दति तदेव परंब्रह्मैव गोपरूपा देवा यः सम्यक् दर्शयामास । गोरूपमिति गोपाश्च कृष्णाः गोप्यश्च युवत्येतदुभयरतामित्यार्थः ॥ ८ ॥

यदेवेति । एतदेव स्फुटमाह असमक्षं अगोचरः तदेव परंब्रह्मैव लक्षं मिथुनानि स्त्रीपुरुषाः गोपीकृष्ण रूपाः तस्मात् प्रादुर्भूतामत्यर्थः । प्रादुर्भावो ताम भेददर्शिनां ज्ञानमेव । तथाच लक्षं मिथुनानि लक्षसंख्यकस्त्रीपुरुषयु मबुद्धिविषयीभूतमित्यर्थ । इयमेका अयमेका अयमेकः ईमे लक्षं इत्यादिरूपभ्रान्तिविषयीभूतमेकमेव तत्वमितिभावः । एतेन राधादयो गोप्योऽभिन्नाः कृष्णोऽपि भिन्न इति ये न जानन्ति ते भ्रान्ता इति ध्वनितम् । गोपीमुकुन्द इति वाच्ये नाम्नी यस्य तत् गोपी मुकुन्दाख्यं यथा नटो सीतारामराधाकृष्णवेषधारी तत्तनाम्ना जनै व्यवह्रियते सीतेयमागता रामोऽयमागत इत्यादिरूपव्यवहारदर्शनात्तथा परंब्रह्म परमार्थतो रूपनाम रहितमपि सीतारामराधाकृष्ण-गोपीगोपादिरूपधारीत्वात्तन्नाम्ना जनै व्यवह्रीयते ।

केशवे मे मती राजन् सर्वत्रास्ते समस्तदृक ।
तस्य नामान्यनन्तानि नटस्यैव न वस्तुत ॥

इति ब्रह्मवैवर्त्तपुराणे कमलावचनात् । योऽनुग्रहार्थं गजपादमूलमनामरूपो भगवाननन्तः । नामानि कर्माणि च जन्मभिर्भजे स मह्यं पममप्रसीदतु । इति भागवते गजेन्द्रवचनात् ।

रूउमात्मा परंब्रह्म सत्यमित्यादिका बुधैः।
कल्पित यवहारार्थं तस्य संज्ञा प्रसीदतु॥

इति वाशिष्ठरामायणवचनात्।

नक्षत्रनाथ विद्यन्ते नामजात्यादिकल्पनाः।
तद्ब्रह्म:परमं नित्यमविकारं भवानलम्॥
न कल्पनामृतेऽर्थस्य सर्वसाधिगमो यतः।
तत कृष्णाच्युतानन्तविष्णुनाम भिरुच्यते॥

इति विष्णुपुराणे श्रीकृष्णं प्रति अक्रूरवचनात्।

शक्तिर्नारायणो ब्रह्म त्रयस्तुल्यार्थवाचकाः।
स्त्री पुं नपुंसकतया भेदाः सिद्धा न वास्तवाः॥

इति ब्रह्मयामलसंमोहनतन्त्रवचनात्।

या दुर्गा परमं ब्रह्म मत्स्यकूर्मादिरूपिणी।
रासक्रीडाविनोदार्थं गोपगोविन्दरूपिणी॥
कंसाद्यसुरनाशाय नन्दनन्दनरूपिणी॥
वृन्दावनविलासाय राधाकृष्णस्वरूपिणी॥
रावणादिवधार्थाय सीतारामस्वरूपिणी॥

इत्यादि शक्तियामलवचनानि।

चिन्मयस्य द्वितीयस्य निष्फलं स्यात् शरीरिणः॥
उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना॥

इति श्रीरामतापनीयश्रुतेः। इत्यलं विस्तरेण। उपास्यं उपासनायोग्यं इष्टं प्रियं सदा निरन्तरं सतां साधूनां स्वधर्मनिष्ठभक्तानामित्यर्थः हृदि मनसि प्रविष्टमिव चिन्तया आस्थितमित्यर्थः॥ ६॥

अन्योऽन्यलीलाधृतचारुहस्तौ किञ्चिच्चलत्कुञ्चितकेशहस्तौ ।
सिञ्जानमञ्जीरसुमेखलाकौ विडम्बिताम्भोधिरचञ्चलाकौ[1] ॥ १० ॥

सुमञ्जुलास्यौ स्मितमञ्जुलास्यौ विलोलहारौ लसदङ्गहारौ ।
गोपीमुकुन्दौ चलमौलिकुलौ व्यराजतान्तौ रसिकौनितान्तौ ॥
युग्मकम् ॥ ११ ॥

अन्योऽन्येति । असंख्यमिथुनरूपस्य युगपद्भावयितुमशक्ययो एक मिथुन एव सदा भावनीयमेव इत्यभिप्राये एकमिथुनरूपे ब्रह्मणि मनो निवेशार्थं लास्यलाव यं तस्य पदयुग्मकेन दर्शयति । सुमञ्जुलास्यौ सुमनोहरनृत्यौ गोपीमुकुन्दौ व्यराजतमिति द्वयोरन्वयं तौ कथंभूतौ स्मिताभ्यां मनोहरे आस्ये मुखे ययोस्तौ । विलोलाहारौ विशुद्धमुक्तामाले ययोस्तौ । लसन्तोऽङ्गहाराः करचरणाद्यवयवचालनानि ययोस्तौ । चलानि चञ्चलानि मौ योश्च तद्धम्मिल्लयोः कुलानि कुलपुष्पाणि ययोस्तौ । तौ प्रसिद्धौ श्रुतिपुराणादिप्रसिद्धावित्यर्थः । नितान्तौ रसिकौ अत्यन्त रसिकावित्यर्थः अत्र महान् कविरित्यादौ यथा व्युत्पत्तिवैचित्र्य-वशेन महतः कवित्वेऽन्वयस्तथा नितान्तयो रसिकत्वयोरन्वयः । तथा च महारसिक-त्ववन्तावित्यर्थ । अत्र अन्योऽन्यलोलेत्यादि पद्यस्य टीका पतिता ॥ १०-११ ॥

---

1. क घ. विडम्बितारतोधरचंचलाकौ ।

गोपीसमूहं समसंख्यकेशं[1] राधामिवैवाद्भुतरूपवेशम् ।
नृत्यन्तमत्यन्तसुखं सकान्तं दृष्ट्वा महेन्द्रो मुमुदेतरां तम् ॥ १२ ॥
श्रुता सभायामुपविश्यमाना[2] या या मुनीन्द्रैरपि चिन्त्यमाना ।
सा सा मुरारेर्नटवद्विचेष्टा दृष्टाद्भुता सर्वसुरैर्यथेष्टा ॥ १३ ॥
मन्दारवृन्दैर्मकरन्दगंधैरामोदिताशेषदिशैरशेषैः ।
विधुं सराधं सवधूकदम्बं संवर्षयामास मुदा महेंद्रः ॥ १४ ॥

गोपीत्यादि ।.एकस्य मिथुनस्य लावण्यं दर्शयित्वा तथैव सर्वेषां केयमित्याशयेत्यह । गोपीसमूहं सकान्तमिति युक्तं तत् विवृणोति समसंख्यकमिति समसंख्यकः ईशः स्वामी यस्य स तथा तम्। समसंख्यकशरीरकप्रियसहितं नृत्यन्तं दृष्ट्वा महेन्द्रो मुमुदेतराम्। प्रसिद्धं यद्वा सकान्तमिति क्रियाविशेषणम्। तथाच नृत्यत् कान्तसहितं नृत्यवन्तमित्यर्थः। राधामिवेति राधाया एकेन यत् भयलावण्ये नृत्यगीतादिकौशलं दर्शितं तथैव सर्वासां वोध्यमितिभावः। पुनः कीदृशं अत्यन्तं सुखं अत्यन्तानंदरूपमित्यर्थ। अत्र श्रुतिरप्यस्ति। यद्वा अत्यन्तमुत्कृष्टं सुखं भक्तानां यस्मात् स तथा तम्॥ १२॥

श्रुतासभायामित्यादि श्लोकः सुगमः ॥ १३ ॥

मन्दारेति। भानुषलीलां नटनयोग्यमत्यन्तं देवराजप्रसादं दर्शयति । मन्दारवृन्दैः पारिजातकपुष्पसमूहैः अशेषैः सर्वैः तद्दिनविकाशैरित्यर्थः। विधुं श्रीकृष्णं सराधं सवधूसमूहं महेन्द्रः संवर्षयामास इत्यन्वयः मकरन्दगन्धैरित्यादि स्फुटम्। यद्वा अशेषैरखण्डैरित्यर्थः। शिषहिंसायामिति धातो शेष इति रूपमिह ज्ञेयम् ॥ १४ ॥

---

1. घ. समभुंजकेशं । 2. ख. ग. सभायामुपवीण्यमाता ।

एवं शरत्काव्यकथाविनोदी स्त्रीबृन्दसङ्गी वनकेलिमोदी ।
सपद्मिनीमानिव यूथनाथं श्रान्तो ययौ यामुनमेव पाथः ॥ १५ ॥
अथोत्प्रायातो दिविषत्समाजः[1] स्वं स्वं निकेतं सहदेवराजः ।
अन्तर्दधानो मुनिरप्यनन्ते जगाम सद्यो यमुनावनान्ते ॥ १६ ॥

इति श्रीमुकुन्दविलासे महाकाव्ये यतीन्द्ररघूत्तमतीर्थपादकृतौ
रासविलासो नाम एकोदशः सर्गः ।

एवमिति । रासनटतवर्जनं साङ्ग विधाय द्वादशजल विहार वर्णयितुं सर्गान्तश्लोके वर्णयति । एवमित्थमनेन प्रकारेण वनकेलीमोदीत्यन्वयः रासलीलावत् वनलीलां च जगदीश्वरेण कृता ग्रन्थबाहुल्यभयात् वर्णितेति भाव कीदृशः सन् वनकेलीमोदी तदाह । शरदित्यादि शरत्काव्यं शरद्वर्णनं चन्द्रकुमुदकुन्दव लीवनजलचन्द्रप्रभृतिवस्तुवर्णन वस्तु विशेषणवत्तया शरद्वर्णनमित्यर्थ । तदेव कथाकदम्बतरुवत्समासो द्रष्टव्यः तस्यापोविनोदो विलासस्तद्वान् प्रशस्तवानित्यर्थः । पुनः कीदृशः स्त्रीबृन्दसंगीति स्फुटार्थम् । ततः श्रन्तः यामुनं पाथ ययौ । एव शब्दो काव्यालंकारे यद्वा श्रान्त एव ययावित्यर्थः अत्र पक्षे एवशब्दः बोधे संगच्छते । तत्र उपमामाह । श्रीकृष्णो यूथनाथः करिणीसमूहपतिः स इव उपमा बीजं मुख्यं श्लेषेणाह । परिमनीमानिति । पद्मिन्यो हस्तिन्यः स्त्रीविशेषाः गोप्य एव तद्वान् अथच पद्मिन्यो हस्तिन्य सर्वान् यूथनाथः ॥ १५ ॥

अथेति । रासक्रीडादर्शनान्तरं दिविषत्समाजः सहदेवराजः महेन्द्रेण सह स्वं स्वं निकेतं उत्प्रयातः उद्धर्वं यत् मुनिरपि नारदोपि अन्तर्दधानः देवानामगोचरं जगाम । कृतान्तर्धानमगात् । अनन्ते आकाशे देवानामधिष्ठानस्थाने सद्यस्तत्क्षणादेव यमुनान्ते यमुनावनमध्ये जगाम गतवान् जलक्रीडादिदृक्षयेति शेषः ॥ १६ ॥

इति श्रीमुकुन्दविलसप्रकाशिकायां एकदशः सर्गः ।

---

1. ख, ग. दिवित्समाजः ।

द्वादशः सर्गः

सपद्मिनीभिर्मृदुहस्तपद्मैरादाय तोयैरभिषिच्यमानः।
स्वयं च सिञ्चन् करपुष्करैस्ता रेमेतरां कृष्णमतङ्गराजः ॥ १ ॥
गोपालवाला यमुनाजलौघेर्निमज्जनोन्मज्जनमाबहन्त्यः।
संतप्तचामीकरचारुभासः संरेजुरुच्चैश्चपला इवाब्दे ॥ २ ॥

सपद्मिनीभिरिति। "द्वादशे जलकेल्यन्ते तस्य नारदरूपिणः आत्मना महती गीतैरद्वैतं प्रतिपद्यते।" तत्र प्रथमं षड्भिः श्लोकैरेकया गाथया जलक्रीडां वर्णयति। वनक्रीड़ाकान्तः कृष्णः मतंगजः कृष्णोऽयं मतङ्गज इव कृष्णमतङ्गजः यद्वा पक्षे कृष्णवर्णो मतंगराजः रेमेतरामित्यन्वयः कथंभूतः पद्मिनीभिः स्त्रीविशेषैः गोपीभिरेव पक्षे पद्मिनीभि हस्तनीभिः मृदुहस्तपद्मानि पाणिकमलानि शुण्डसम्बन्धि अग्रभाग वा तैः आदाय गृहीत्वा तोयैर्जलै अभिषिच्यमानः सर्वत्राभ्युक्षमाणः। पुनः कीदृशः करपुष्करैः शुण्ढाग्रैरादाय तोयैरनुषज्यते। यद्वा करसम्बन्धिभिः पुष्करैर्जलैरित्यर्थः। अतो उभयपक्षयोः करपदेन पाणिशुण्डौ ज्ञेयौ। स्वयं च कृष्णः मतङ्गराज एव सिञ्चन् अभ्युक्षन् ता पद्मिनी पक्षयोरपि व्याख्याताः ॥ १ ॥

गोपालेत्यादि। निमज्जनोन्मज्जनमिति निमज्जनादनन्तरं उन्मज्जनं निमज्जनोन्मजनं मध्यपदलोपीति बोध्यः। आसम्यक् वारंवारं वहन्त्यः कुर्वत्यः चामीकरं सुवर्णं शेषं योज्यम्। चपला इव विद्युत् इव अब्दे मेघे ॥ २ ॥

---

1. ख. मुद्रुहस्वापद्मै।
ग. मुदृहस्तपद्मै।

सुचन्द्रिकाचंदनलिप्तगात्रा श्यामा विराजज्जलचंद्रवक्त्रा ।
आलोलसंविस्तृतवीचिहस्ता शिश्लेष कृष्णं यमुना प्रशस्ता[1] ॥३॥
संमार्जयंती मृदुलाङ्ककानि प्रक्षालयंती कुचकुङ्कुमानि ।
मृगीदृशामुमिकरक्रियाभिर्दासीव निर्माल्यमुवाह[2] कृष्णा ॥ ४ ॥
रसैर्लसंतां विततोर्मिहस्ता कृष्णा च[2] आलिङ्गति चञ्चलेयम् ।
इत्युग्रकोपादिव भानुपुत्रीमताडयन् पाणितलैस्तरुण्यः ॥ ५ ॥
अन्योऽन्यसमार्जित सालसाङ्गाः सलिलसङ्गाश्च यमोतरङ्गा ।
आचुम्बतालिङ्गनदोप्यनङ्गाः श्रीकृष्णगोप्यो जहृषुः सरङ्गाः॥ ६ ॥

सुचन्द्रिकेत्यादि । कृष्णया हृस्ततरलार्ञ्चितकोमलवालुकमिति श्रीभागवते कालिन्दीं कृष्णपदप्रयोगात् योगवृत्त्येव वा कृष्णापदं यनुनायां प्रयुक्तमिति ध्येयम्। तत्पक्षे तामापदं स्त्रीविशेषपं उभयपक्षेऽपि व्याख्यामापदं स्त्रीविशेषणम् । उभयपक्षेऽपि श्यामापदं तथैवावधेयम्। शेषं सुगमं योजनीयम् ॥ ३ ॥

संमार्जयन्तीतिसुगमम् ॥ ४ ॥

रसैरिति। रसैर्जलैरनुरागैर्वा लसन्ती शोभमाना क्रीडन्ती वा नोऽस्माकमेव कृष्णमालिङ्गति सा चञ्चलैव निर्लज्जा एवेत्यर्थः इतिहेतो उग्रकोपादिवेति कविरुत्प्रेक्षते अताडयन्नित्यादि स्फुटार्थम् ॥ ५ ॥

अन्योऽन्येति । सलीलं सखेदं यथास्यात् तथा सलसाङ्गा अलसगात्राः ताः यस्याः यमुनायाः तरङ्गा उर्मयोर्याभिस्ता तथा आचुम्बनादिना दीप्तिर्यस्य तादृशोऽनङ्गो यासां तास्तथा जहृषु हृष्टा बभूबुः सरङ्गा सानुरागाः ॥ ६ ॥

---

1. ख. ग. प्रशास्ता:

2. ख. ग. निर्माल्य मुदाह ।

3. ख. ग. न.

4. क यमा ।

पञ्चत्रिंशः प्रबन्धः

॥ वसन्तरागेण गीयते ॥

विलसति[1] नन्दसुतो यमुनायाम् ।
ततचपलाशत[2] सजलजलद इव चन्द्रिकायां[3] रुचिरायाम् ॥१॥
॥ ध्रुवपदम् ॥

पद्मिनीकाकुलकरपुष्करजलशीकरसेचनमोदी
स्वयमपि गज इव तदुपरिहस्तकनिकर[4] निषेकविनोदी ॥ २ ॥
भानुसुताततरलतरङ्गकभुजपरिरम्भविलासो ।
तदनु रुषेव युवतिकुलकरतलयमुनाताडनहासी[5] ॥ ३ ॥
अतिनटनादुरसिजयुगलं तव नटमिथुनं श्रमयुक्तम् ।
इति सस्मितवचनो[6] युवतीकुचयुगमकरोदभिषिक्तम् ॥ ४ ॥

विलसतीत्यादि । विलसति क्रीडति ततः विस्तृतः चपलाशतं यस्मिन् एवंभूतः यः सजलः जलदोमेघस्तस्मिन्निव तादृगुपमायां कीजमाह । चन्द्रिकायां रुचिरायां इति स्फुटार्थम् । पद्मिनीत्यादि खण्डं सुगमार्थं तदुपरि तासां पद्मिनीनामुपरि हस्तसम्बन्धीनि यानि कानि तेषां यो निकरः समूहः तस्य यो निषेकः अभिषेचनं तेन तस्मिन्वा विनोदी विलासी यद्वा तन्निषेकरूपो यो विनोदः तद्वानित्यर्थः ॥ १-२ ॥

भानुसुतेत्यादि--चरणं व्याख्यातार्थम् ॥ ३ ॥

अतीति । उरसिजयुगलं नटमिथुनमिति समस्तरूपकम् ॥ ४ ॥

---

1. क. विहरति ।
   ग. विलति ।
2. ख. ग. चपलागत ।
3. क. घ चन्द्रिकया ।
4. क. हस्तनिकर ।
5. क. करतलतज्जताडनहासी ।
6. घ. सस्मितवदनो ।

निशि विकशितमिदमम्बुजमद्भुतमिति मृदुवागविलम्बम् ।
सौरभलाभमिषेण रमामुखमकृत चिरं परिचुम्बम् ॥ ५ ॥
करकमलेन परां परिमृजयति कामपि नर्त्तनतान्ताम् ।
कामपि वर्षति कामपि कर्षति कामपि चुम्बति कान्तम् ॥ ६ ॥
पयसि निमज्य पदे परिकृष्यति कामपि सपदि सुभीताम् ।
मामवहर इति वचसमुदश्चति हसति निजोरसि नीताम्॥ ७ ॥

निशीति । निशि रात्रौ विलसितं प्रफुल्लं अद्भुतमाश्चर्यकरं इदमिति हस्ताग्रे चिबुकं धृत्वा कथयतीति बोध्यम् । इति मृदुः कोमला वाक् यस्य तादृशः सन् अविलम्बं शीघ्रं वाक् समय एव सौरभलाभः सौगन्ध्योत्पादनं व्याजः तेन इदं जिघ्रामिति वने स्व छलेनेत्यर्थः रमा राधिका कापि गोपीवा सर्वासां लक्ष्मीत्वात् तस्याः मुखं परितः चुम्बः चुम्बनानि यस्मिन् तत् परिचुम्बः तादृशं चिरमकृतमकरोत् ॥ ५ ॥

करेति । परिमृजयति परितः सर्वाङ्गेषु मृजति मार्जयतीत्यर्थः नर्त्तनतान्तां नृत्येन श्रान्तामित्यर्थः कामपीत्यादि स्फुटम् ॥ ६ ॥

पयसीत्यादि । सपदि झटिति तत्क्षण एव सुनीतां जलजन्तुकर्षणभ्रान्त्या अतिभीयामित्यर्थ । मामवतारयस्व हे हरे हे श्रीकृष्ण इति वचसं इति वदन्तीं उदश्चति उन्मजति उदश्चत्यस्य क्रियायाः फलस्य संयोगस्य तस्या वक्षसि सन्त्या तत्कर्मत्वं तथा च उन्मज्जनं कृतं न येन स्ववक्ष तद्वक्षस्थलयोः संयोगे जात इति भाव । निजोरसि कृत्वा हसन्ति, परिहसति । त्वां परमसुन्दरो जलाधिष्ठात्रीं देवो रिरंसया आकृष्टवान् कथं भीतासीत्यादि रूपः परिहासो ज्ञेयः ॥ ७ ॥

रजनौ नीलकमलमुदितं कथमिति वचसा मृदुहसया ।
घ्राणमिषेण मुखे परिचुम्बत एतादृशाधिकरसया[1] ॥ ८ ॥

इति बहुविधजलकेलिकलाकुलहरिदयितासहचरितम् ।
गायत रसयत शृणुत रघूत्तमयतिभणितं रसभरितम् ॥ ६ ॥

देवर्षिरित्थं चरितानि दृष्ट्वा गोविन्दगोपीचरितानि हृष्ट्वा ।
प्रादुर्बभूवाभिनयन्प्रसादं गायन् वितन्वन्महतीनिनादम् ॥७ ॥

रजनावित्यादि । इति वचसा इत्युक्तप्रकारं वचो यस्याः सा इति वचसा इति वदन्तीत्यर्थः । घ्राणमिषेण जिघ्रामीति वचनछलेनेत्यर्थः । एतादृश्या मुगान्वयः ॥ ८ ॥

इतीति । इति ईदृशप्रकारैर्बहुविधा या जलकेलिकला तया आकुलो व्याप्तो यो हरि तस्य दयिता तासांसहचरितं एकदा चरितं एककालीनं कथं तत् अत्रौ वाकुलान्तं विशेषणं ध्येयम् । तत् कीदृशं रसभरितं संजातं रसभरं अतएव रसयत हे भक्तिरसिका इति शेषः । ननु केन व्यापारेण रसयाम इत्यपेक्षामाह । गायत शृणुतेति श्रोतरि सति गायत । गायति सति शृणुत अन्यदा तु गायत अतएव शृणुत इत्यर्थः ॥ ६ ॥

देवर्षिरिति । पूर्वसर्गान्ते मुनिरभ्याजगाम मुनेः नारदस्य वनान्ते यमुनावनमध्ये-गमनं यदुक्तं तत्र प्रयोजनं वर्णयन्नाह । देवर्षि नारदः इत्थमुक्तप्रकाराणि चरितानि जलकेलिरूपाणि दृष्ट्वा हर्षं प्राप्य तान्येव गायन् महतीनिनादं वितन्वन् प्रादुर्बभूव गोविन्दगोपीनां गोपीनां गोचरीबभूव शेषं व्यक्तम् ॥ ७ ॥

1. क. हसया ।

मुक्ताफलानामधिदेवतेव प्रहीणलक्ष्मेव सुधांशुदेवः ।
दिवेव कुर्वन् यमुनां प्रतीरे तिष्ठन् मुकुन्दो हि परे शरीरे ॥८॥
दृष्ट्वा व्रजन्तं यमुनातटं तं गायन्तमानन्दमयं नटन्तम् ।
गोविन्दगोप्यः प्रविहाय नीरं प्रोत्तेरुरुच्चैः[1] कुतुकेन तीरम् ॥९॥
अत्रान्तरे तद्वनदेवता सा निर्गत्य सद्यः ससखी सुभासा ।
विचित्रवस्त्राभरणानि दत्वा[2] तस्थौ तदग्रे हरिमाशु नत्वा ॥१०॥

मुक्तेति । पुनःश्लोकेनैकेन उपमोत्प्रेक्षाभ्यां तम् अभूतशुक्लगुणोपमोक्ता । प्रहीणलक्ष्म्या कलङ्कया रहितः सुधांशुदेव इव अनेन द्रुतास्निग्ध - निर्मलदीप्तिगणोपमा कथिता । यमुनां प्रतीरे दिवाकुर्वन्निव दिवसं विदधन्निव । अनेनोत्प्रेक्षालङ्कारेण सूक्ष्म इव दीप्तिमान् नारद इति उपमालङ्कारो व्यञ्जितः । नारदस्वरूपमाह तिष्ठन् मुकुन्द इति परे अन्यस्मिन् स सुन्दरशरीरभिन्ने चन्द्रसुन्दरशरीरे मुकुन्द एव तिष्ठन् प्रादुर्भूतवान्नारद इति पूर्वेणान्वयः ॥ ८ ॥

दृष्टेति । तन्नारदं यमुनातटमाक्रान्तं दृष्ट्वा गोविन्दगोप्यः नीरं विहाय उच्चैः कुतूकेन तीरं प्रतेरुः इत्यन्वयः । तं कीदृशं यमुनातटं कीदृशतया गच्छन्त तदाह । गायन्तं नटन्तमिति आनन्दमयमिति गाननटनयोः विशेषणं यद्वा तं कीदृशं आनन्दमयं आनन्दरूपं ब्रह्मस्वरूपमित्यर्थः श्रीकृष्णेन सहाभेदात् "तृतीयमृषिसर्गं वैदेवर्षित्वमुपेत्य सः" इति श्रीभागवते प्रथमस्कन्धे तृतीयावतारतया कथितत्वात् यद्वा आनन्दमयं ब्रह्म गायन्तमित्यर्थः ॥ ९ ॥

अत्रेति । अस्मिनवसरे श्रीकृष्णगोपीनां तीरोत्थानसमये इत्यर्थः । वनदेवता श्रीवनाधिष्ठात्री देवी प्रसादसिद्धा लक्ष्मीरिव निर्गता वनात् बहिर्भूत्वेव । सद्यस्तत्क्षणे ससखी सती वस्त्राभरणादि तदग्रे हर्यग्रे दत्वा समर्प्य आशु शीघ्रं हरिं नत्वा तस्थौ ऊर्ध्वं स्थितवती । सा कीदृशी सुभास सुन्दरतरोभासोदीप्तिर्यस्या सा तथा यद्वा सुन्दरभासा दीप्त्या उपलक्षिता ॥ १० ॥

1. क. घ. प्रोक्तेरुरुच्चैः । 2. ख. ग. विचित्रवस्त्राभरणादि दत्वा ।

चित्राणि नेत्राणि सुदृग्व्रजाय पीताय पीताम्बरमच्युताय[1] ।
माल्यानि मल्लीसुमनस्मयानि प्रादात्सुगन्धानि सुकोमलानि ॥ ११ ॥

कस्तूरिकाकुङ्कुमचन्दनादिसौगन्ध्यसंवासिततद्‍द्रवनानि ।
कर्पूरकृष्णागुरुमिश्रितानि विचित्रपत्रावलीपूरितानि[2] ॥ १२ ॥

मुक्तासुधापक्वभुजङ्गवल्लीलवङ्गजातीफलचन्द्रपूगैः ।
सुचारुचामीकरहंसपत्रं ताम्बूलबृन्दं प्रददौ पुरस्तात्[3] ॥ १३ ॥

चित्राणीति। वस्त्राभरणानि दत्तानीत्युक्तं कीदृशं वस्त्रं कृष्णाय कीदृशानि गोपीभ्यः किदृशानि सर्वेभ्यो ददावित्याशङ्कायामाह। चित्राणि बहुविधचित्रभूषितानि नेत्राणि कौशेयवस्त्रविशेषाणि सुदृग्व्रजाय गोपीनां समूहाय प्रीताय तेषु वस्त्रेषु प्रीतिमतेऽच्युताय श्रीकृष्णाय पीताम्बरं हरिद्राभकौशेयवस्त्रं प्रीताय इति। कयापि गोपालकन्यायाा तदुभयं प्राप्तमिति द्रष्टव्यम्। मल्लीसुमनस्मयानि मल्लीपुष्पमयानि शेषं व्यक्तार्थम्। युग्मकमिति एकक्रियान्वितं पदद्वयमित्यर्थः ॥ ११ ॥

कस्तूरिकेति। पुनः युग्मकेनकांक्षितं दर्शयति कस्तूरिकेत्यादि व्यक्तार्थम ॥ १२ ॥

मुक्तेत्यादि। मुक्ता सुधा मौक्तिकं भस्मीकृतद्रवचूर्णमिति प्रसिद्धम्। ताम्बूलघटकं वस्तु पक्व भुजङ्गवल्यः पक्वानि वर्णानि परिणतानि ताम्बूलदलानि लवङ्गानि लवङ्गपुष्पवृतानि जातिफलानि प्रसिद्धानि चन्द्राः कर्पूराणि पूगानि गुवाकफलमूक्ष्मखण्डानि तैः घटितमिति शेषः यद्वा उत्कृष्टवस्तु समुदायस्य ताम्बूलत्वेन समुदायिभ्योऽभिन्नत्वात् तृतीयात् अभेदा द्रष्टव्याः सुचारूणि परमसुन्दराणि चामीकरणस्य कनकस्य हंसपत्राणि हंसाकारपत्राणि अस्य ताम्बूलवृदस्य तथा ताम्बूलवृन्दं ताम्बूलसमूहं पुरस्तात् प्रददौ समर्पयामास ॥ १३ ॥

---

1. क. पीताम्बर अच्युताय।
2. क. घ. पुस्तके ११, १२ श्लोकद्वयं नास्ति।
3. क. प्रददौ च तेभ्यः।

अपहृततनुनीराः संविराजच्छरीरा
परिहितपरिधाना भूषणैर्भासमानाः ।
सदयितवनितास्ता भूमिलन्मौलिहस्ता-
स्त्रिदशऋषिमुदाराः प्राणमल्लोलहाराः ॥ १४ ॥
तटभुवि पटपुष्पैरासने कल्पिते तं
मुनिवरमुपविष्टं दिव्यवीणासमेतम् ।
सहयुवतिसमूहैर्मन्यमानं करिष्णुः
कुसुमसहितगन्धैरर्च्चयामास विष्णुः ॥ १५ ॥

अपहृतेति । अथ गोपीनां चरितमाह श्लोकैकेन । अपहृता गोपिनां परिहितवस्त्रा इत्यर्थ । परिहितपरिधाना परिधान ग्रहणमिह बोध्यम् भूषणे कटककुण्डलादिभि नूतनालङ्कारैः परिहितैरित्यर्थः । भासमानत्वादन्यथानुपपत्तेः सदयितवनिताः दयितेन श्रीकृष्णेन सहिता गोप्यः भुवि मिलन्त संयुज्यमानाः मौलयो मस्तकानि ललाटान्येव वा हस्ता पाणियुगलानि च यासां तास्तथा । त्रिदशऋषिं देवर्षिं नारदं प्राणमन् प्रणामं कृत्यवत्यः शेषं स्फुटार्थम् । समासे ऋकारस्यासन्धिः । केषांचिन्मतमालम्ब्य हिमरतावपि अस्मत्यादौ शिशुपालवधे तथा प्रयोगदर्शनात् त्रिदशमृषिमिति पाठान्तरे देवत्वं च नारदस्य सम्भवति इति न दोषः ॥ १४ ॥

तटेति। तटभुवि यमुनातटे भूमौ पटश्च पुष्पाणि तः कल्पिते निर्मिते उपविष्टं दिव्यवीणासमेतं तं मुनिवरं विष्णुरर्च्चयामास इत्यन्वयः । विष्णुः कथंभूतः समर्च्चयामास तदाह । युवतिसमूहैः सहितः सनित्यर्थः मान्यानां पूजार्पणाय मन्यमानं पूजां करिष्णुस्तत्कर इत्यर्थः ॥ १५ ॥

अथ विधितनयाज्ञालब्धचेलासनासु
प्रिययुवतिषु मध्ये पूर्णचन्द्राननासु ।
अधिवसनमुपेन्द्रो दिब्यनारीष्विवेन्द्रो
न्यविशत वरमायी लोचनानन्ददायी ॥ १६ ॥

अथेति। अथ नारदपूजानन्तरं अधिवसनं वसननिर्मितासने दिब्यनारीषु सत्युर्वशी-प्रभृतिस्त्रीषु वरमायी सर्वोत्कृष्टमाया विद्यतेऽस्मिन् स वरमायी यद्वा वरश्चासौ माया चेति स तथा यद्वा वरेषु श्रेष्ठेषु ब्रह्मादिषु मायी तेषामपि मोहकमित्यर्थः।

अहं महेन्द्रो निरृतिः प्रचेताः सोमोऽग्निरीशः पवनोऽर्को विरञ्चिः।
आदित्य विश्वे वसवोऽथ साध्यामरुद्गणा रुद्रगणाः ससिद्धाः॥
अन्ये च ये विश्वसृजोऽमरेशा भृग्वादयोऽसृष्टरजस्तमस्काः॥
यस्येहितं न विदुः सृष्टमाया सत्वप्रधाना अपि किं ततोऽन्ये॥

इति भागवते षष्ठस्कन्धे यमवचनात्। ननु श्री भागवत एव--

नोतेऽपि चेन्द्राखिललोकपालविरञ्चिवैकुण्ठसुरेन्द्रगम्यम्।
ज्योतिः परं यत्र रजस्तमश्चसत्वं न तम् ब्रह्म निरस्तभेदम्॥

इति श्रीभागवते रुद्रं प्रति प्रजापतिवचनम्।

न ब्रह्मा नच गोविन्दः पौराणि ऋषयो नते।
महात्म्य वेदितुं शक्ता याथातथ्येनते शिव॥

इति महाभारते मोक्षधर्मे दक्षवचनम्॥

नमस्त्रिमूर्त्तये तुभ्यं सर्गस्थित्यन्तहेतवे।
त्वयैव निखिलं सृष्टं संहृतं पालनं जगत्॥
तथापि मायया नाथ न विदुस्त्वन् पितामहः॥

इति वायवीयपुराणे मुनिवचनम्।

न विदुस्त्वां सुरश्रेष्ठ विष्णुरुद्रादयो वयम् ।
त्वन्माया जगतामेव मोहयित्री दुरत्यया ॥

इति पाद्मेसृष्टिखण्डे ब्रह्माणं प्रति श्रीविष्णुवचनम् ।

सर्वत्रस्था सर्वगा दिव्यमूर्त्तिर्नित्या देवी सर्वरूपा च या सा ।
कृष्णादीनां सर्वदा मोहयत्री सा स्त्रीरूपैः सर्वगा सा समन्तात् ॥

इति कालिकापुराणे मार्कण्डेयवचनम् ।

विष्णुः शरीरग्रहणमहिमापान एव च ।
कारितास्ते यतोऽसि त्वां कः स्तोतुं शक्तिमान् भवेत् ॥

इति मार्कण्डेयपुराणे ब्रह्मवचनम् ।

"नज्ञायसे हरिहरादिभिरप्यपारा" इत्यादि तत्रैव शक्रादिवचनम् । तस्मान्मोह्य-मोहकभावादिना संमोहनार्थं वा अन्यथा :-

त्रयाणामेकभावानां ये न पश्यन्ति वै भिदाम् ।
सर्वभूतात्मता ब्रह्मन् स शान्तिमुपता ? कति ॥

इति श्रीविष्णुवचनेन । "न ते मय्यच्युते येन भिदामप्यपि चक्षते ।" इति श्रीरुद्रवचनेन च । "यो वै विष्णु स वै रूद्रो यो रुद्रः स पितामहः इत्यादि" महाभारतवचनेन न ।

संख्याता च वै ··· ला असंख्याताः पितामहाः ।
हरश्चान्यश्च सख्यात एक शिव महेश्वर ॥

इति लिङ्गपुराणवचनेन च । ब्रह्माशिवादिनामेकेश्वरत्वप्रतिपादनात् कथं विष्णोमो-हकत्वं सङ्गच्छते इति चेत् शृणु भेददर्शिनां प्रथमतोऽद्वैत भक्तिर्न सम्भवति । तस्य देवस्य तद्वर्णनं भक्ति वर्धनार्थं क्रियते । सा स्तुतिरेव तत्वं तु एक एव परमेश्वरो मीनशरीरादि धृत्वा मोहने ··· सेवकवाह्यवाहनादिभावादिनामेव करोतीति । ननु श्रीविष्णोरेव परमेश्वरत्वं ब्रह्मशिवादीनां तु जीवविशेषत्वं अतो मोह्यत्वमपि न विरुद्धं इति नाशंकनीयम् । तुल्या युक्त्या प्रत्येकस्य ब्रह्मादेरपि परमेश्वरतया विष्णो जीवतया तत्र शास्त्रे प्रतिपादनात् । तथाहि—

सहसखिवनदेव्या पूजितं पूजितासु प्रततसुभगगन्धैर्मण्डितं मण्डनासु।
युवतीषु मृदुवीणावादनैश्चारुतानैरमरमुनिरनादीन्माधवं साधुगानैः॥१७॥

षट्त्रिंशः प्रबन्धः

॥ तोड्डिरागेण गीयते ॥

॥ पट्टतालेन ॥[1]

जय मुकुन्दविकचकुन्दहासवशितयुवतिबृन्द ॥ १ ॥

अहं ब्रह्मा कपिलोध्याप्यनन्तः पुत्राश्च सर्वे ब्रह्मणश्चाधीशाः।
त्वत्तः सर्वे देवदेवाः प्रसूता एवं सर्वे कारणानां त्वमीड्यम्॥

इति हरिवंशे रुद्रं प्रति श्रीकृष्णवचनम्।

यः कृष्ण सैव दुर्गास्याद्या दुर्गा कृष्ण एव सा" इत्यादि वचनम्।

उमा सर्वेशयोर्भेदो नास्त्येव परमार्थतः।
द्विधासौ रूपमास्थाय स्थित एको महेश्वरः॥

इत्यादि लिङ्गपुराणवचनात्। हरिं हरं विधातारमित्यादि पूर्वोक्त वाक्यं नच संगच्छते। परमेश्वरनानात्वं तु सर्वेषां सम्मत एव इत्यास्तां विस्तरः ॥ १६ ॥

सहेति। अथ नारदगीतं वर्णयितुमाह। सहसखिश्चासौ वनदेवी चेति समासः। तयानवीत् अस्तावीत साधु यथा स्यादिति स्तुतिविशेषणं मानविशेषणं च काकाक्षिन्यायात् शेषं स्फुटम्॥ १७ ॥

जयेत्यादि। यतिचतुष्टयशोभितैरेकादशखण्डैः कृतेन गीतेन नारदकृतिं दर्शयति। हे मुकुन्द हे मुक्तिदायक श्रीविष्णो विकचकुन्दपुष्पवत् हासो यस्य हे तादृशः। यद्वा विकच कुन्दवत् यो हासस्तेन वशितं वशीकृतं युवतिबृन्दं येन हे तादृश ॥ १ ॥

1, क. रागस्योल्लेखो नास्ति।

चन्द्रवदनकेलिसदनरूपवर्जितकोटिमदन ॥ २ ॥

नवविलासकनकभासयौवनशतरचितरास ॥ ३ ॥

सुरनटवरसुंदरतरकौतुककृतनृत्यनिकर ॥ ४ ॥

चपलकुण्डलसुभगगण्डमौलिमिलितचलशिखण्ड[1] ॥५॥

पुष्करधरमरकतवर मञ्जुलतरकांतिविसर ॥ ६ ॥

चन्द्रेति । हे केलिसदन केलिनिकेतन क्रीडाश्रयरूपेण सौन्दर्येण विजिता परिभूता मूर्छीकृताः कोटिमदनाः कन्दर्पा येन ॥ २ ॥

नवेति । हे नवविलास कनकभासो तस्य ईदृशं यत् यौवनं युवतियूथशतं तेन विरचिता रासो येन यद्वा युवतियूथगते रचिता रासो येन हे तादृश यद्वा नवविलासेति देवताविशेषणमेव बोध्यम् ॥ ३ ॥

सुरेति । सुरनटादेव न रसेषां तेभ्यो वा वरः श्रेष्ठः हेतादृश यद्वा सुरनटवरादपि सुन्दरतरः यद्वा सुन्दरतरः सहज सुन्दरातिशयः कौतुकेन कृतो नृत्यनिकरो येन हेतादृश कौतुककृतनृत्यनिकरेति पृथगेव वा ॥ ४ ॥

चपलेति । चपलाभ्यां कुण्डलाभ्यां शुभौ सुन्दरौगण्डौ कपोलौ यस्य हेतादृश चपलकुण्डलेतिपदं चलशिखण्डमौलौ मिलितम् । सम्वन्धं दलं चञ्चलं शिखण्डं मयूरपुच्छं यस्य हे तादृशः ॥ ५ ॥

पुष्करेति । पुष्करधरो मेघः मरकतवरो नीलपाषाणश्रेष्ठः ताभ्यां मञ्जुलतरः अथवा मञ्जुलतरो कान्तिविसरः अत्यन्त मनोहर कान्तिसमूहो यस्य हे तादृशः ॥ ६ ॥

---

1. क. पुस्तकस्यात्र समाप्तिर्जाता ।

पीतवसनकनकरसनमण्डिततनु मध्यलसन ॥ ७ ॥
अलकजाललतितभालभृङ्गमिलनसुवनमाल ॥ ८ ॥
अतिसुतानवेणुगानरमितभुवनजनवितान ॥ ६ ॥

पीतेति । पीतवसनं च कनकरसनं ताभ्यां मण्डितं मध्यं तेन लसनं शोभा यस्य हे तादृशः ॥ ७ ॥

अलकेति । अलकजालेन चूर्णकुन्तलश्रेण्या ललितं भालं ललाटं यस्य भृङ्गाणां यन्मीलनं मधुलोभेन तनुसंयोजनं तेन सुन्दरी वनमाला यस्मिन् हे तादृशः ॥ ८ ॥

अतीति । अति सुतानं अतिसुन्दरतानयुतं यद्वेणुगानं तेन रमित प्रीणितो भुवनानां जनवितानो येन हे तादृशः ॥ ६ ॥

अरुणेति । अरुणकमले रक्तपद्मे इव चरणयुगलं यस्य नाम्ना कृष्ण-शिवराम-दुर्गा प्रभृति नामा निहितं सकलानां सकलं वा समलं येन हेतादृश ।

कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते ।
भस्मीभवन्ति राजेन्द्र महापातककोटयः ॥
यद्व्यक्षरं नाम गिरेरितं नृणां,
सकृत्प्रसङ्गादघमाशु हन्ति तत् ।
पर्वत्रकीर्त्तिं तमलंय शासनं
भवानहो द्वेष्टि शिवे शिवेतरम् ॥
विष्णोरेकैक नामेव सर्वदेवाधिकं मतम् ।
आवृतीनां सहस्रेण रामनामसमं मतम् ॥
नारायणेति शब्दोऽस्ति वागस्ति वशवर्त्तिनी ।
तथापि नरके भूप पतन्तीति किमद्भूतम् ॥

अरुणकमलचरणयुगल नामनिहित[1] सकलसमल॥ १० ॥
अमृतदाय विजितमाय भव रघूत्तमसुखनाय[2] ॥ ११ ॥

उमेतिद्व्यक्षरं मन्त्रं योऽहर्निशमनुस्मरेत् ।
न स्मरे वित्रगुप्तस्तं कृतपापमपि द्विजः ॥
प्रभाते यः स्मरेन्नित्यं दुर्गादुर्गाक्षरद्वयम् ।
आपदस्तस्य नश्यन्ति तमः सूर्योदये यथा ॥

इत्यादि पुराणवचनं वीक्षणीयम् । "शक्तिर्नारायणो ब्रह्मत्रयस्तुल्यार्थवाचकः इत्यादिना शास्त्रे एषा ··· र्यता प्रतिपादिता । ननु शिवविष्णुदुर्गादीनां अद्वैतार्थता कथं तर्हि समलिङ्गानुशासने शक्तिग्राह .. तेषां भिन्नपर्य्यायतया लिखनं न सङ्गच्छत इति नाशङ्कनीयम् । तत्तद् ग्रन्थकर्तृकसाहित्ये प्रामाणिकत्वान्नहि वेदव्यासः वेदाद्वेद-विभागकर्त्तारस्ते यद्वा वृत्तिनिमित्तानां शिवविष्णुदुर्गादिशरीराणां भेदास्तद्भिन्नपर्यायतया लिखनं ननु प्रवृत्तिनिमित्तवतां शिवविष्णुदुर्गादिना नारदात् यथा कुण्डलावतंसा कर्णवेष्टनी किरिटी मुकुटा मौलिमान् च्छत्रि आपतन्ति धन्वा धनुष्मान् इत्यादि शब्दानभिन्न-पर्य्यायत्वेऽपि एकभाव अपरत्वात् पर्यायत्वमपि न विरुद्धम् । तथा शिवविष्णुदुर्गादीनां शब्दानां एकत्वेन तच्छरीरविशिष्टवाचकत्वेन च भिन्नपर्याया ते वो ये अयं भाव । छत्रकुण्डलीत्यादौ छत्रवन्ति कुण्डलानीत्यादिना एका व्यक्तिर्बुध्यते शिवविष्णुदुर्गेत्यादौ कुण्डलत्वमात्रं प्रवृत्तिनिमित्तं इहतु शिवादिशरीरत्वस्य परमेश्वरत्व योभयं वृत्तिनिमित्तमिति ज्ञेयम् ॥ १० ॥

अमृतेति । हे अमृतमय तदीयमोक्षदायक विजिता वशीकृता माया दुर्घटनपटी-यसी माया येन हे तादृशः । ईदृशो यदीशमाया सजीवो यस्तस्य मायावीति प्रामाणिकोक्तेः अतो जीवस्य सुखनाय सुखीकरणाय मोक्षसुखकारणाय वा भव प्रवर्त्तस्व ॥ ११ ॥

1. ग. निहत । 2. घ. सुखदाय ।

सप्तत्रिंशः प्रबन्धः

विहङ्गरागेण[1] गीयते

॥ सिंहनन्दनेन पटतालेन वा[2] ॥

जय जय जय नन्दतनय भक्तिनियसुरतरो।
अगुणसगुणदीनशरणसप्तभुवनजनगुरो ॥ ध्रुवपदम् ॥ १ ॥

जयेत्यादि। स्तुत्यन्तरमाह। जयपदस्य अशोभनं अत्यादर सूचनार्थं यद्वा प्रकृततः सत्वरजस्तमसां त्रयाणां प्रकृतिगुणानां जयं विना जीवस्य मोक्षो नास्ति इति तदर्थमुक्तं जयजयेति। तमोजय रजोजय सर्वंजय पराभूतं कुरु जीवनमिति शेषः। यद्वा ब्रह्मा विष्णु शिवरूपैः क्रमेण गुणत्रयकृतं त्रिविधं संसारं भक्तानां जयेत्यभिप्रायः। नन्दस्य गोपविशेषस्य तनयत्वे न आविर्भूत नटवदिति शेषः। भक्तनिचयस्य सेवक समूहस्य सुरतरो कल्पवृक्षत्वात् सर्वाभीष्टदायकेत्यर्थः। ननु भक्तानां द्वैविध्यात् राजविरागिभेदेन केषां केन रूपेण फलं दिदासीति अपेक्षयामाह। अगुण सगुणेति निर्गुणरूपेण तत्भक्तानां मोक्षं ददासि सगुणरूपेण तत्भक्तानां त्रिवर्गं ददासीति भावः। अतएव दीनानां मुमुक्षुविषयिणां दुःखितानां शरणरक्षकः। ननु केन व्यापारेण तान् प्रति मम फलं दत्तमित्यपेक्षयामाह। सप्तेति गुणोदितोपदेशक अन्तर्यामीरूपेण मुमुक्षूणां तत्रज्ञानं प्रवर्त्तकं त्रिवर्गेच्छूनां धर्मज्ञानं प्रवर्त्तकेत्यर्थः। यद्वा सप्तभुवनानि यस्मात् सप्तभुवनः हेतादृशः सकल लोकजनकेत्यर्थः। अतएव जनानां मुमुक्षुविषयिगुरो इति ज्ञानप्रवर्त्तकः। यद्वा सप्तभुवनानि जनयन्ति सम्भवन्ति येन ब्रह्म सोऽपि गुरुर्जनकः हेतादृशः ननु ब्रह्मातु श्रीविष्णुरेव कथं तस्य जन्यजनकभावः यदि पृथगेव ब्रह्मा विष्णुभाव पृथक् तर्हि त्रयाणामेकभावनामित्यादि शास्त्रं कथं संगच्छति नाशङ्कनीयम्। एक कल्पेषु कल्पेषु ब्रह्माविष्णु महेश्वरा परस्परेण जायन्ते परस्परजनयिषिणः तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः प्रभावः कथ्यते। तेषां रसमुद्भवतां—

1. घ विहडा।
2. घ पुस्तके तालस्योल्लेखो नास्ति।

देहरहित[1] सेवकहितविधृतविविधतनुतते ।
दुष्टनिकरनाशनकरशासनकर[2] परतते ॥ २ ॥

क्वचिद्ब्रह्मा क्वचिद्विष्णुः क्वचिद्रुद्रः प्रशस्यते ।
नानेन तेषामाधिक्यमैश्वर्य्यं वातिरिच्यते ॥
एकः प्रशंसमानस्तु सर्वानेव प्रशंसति ।
एकं निन्दति यस्तेषां ससखिनेव निन्दति ॥

इत्यादि वायवीयपुराणवचनवृन्दात् एतेषां जन्यजनकभावस्तु नटलीलेवेत्याह । कौर्मे "अन्योऽन्यमनुरक्तास्ते त्वन्योन्यमुपजीविन कार्यजन्या" इत्यर्थः ॥ १ ॥

देहरहितेति । एतेनैव प्रयोजनमाह—
प्राणस्थो धर्मो क्षुत्तृष्णे ज्ञातव्यो मनसस्तथा ।
शोकमोहौ जरामृत्यु शरीरस्य षडुर्मयः ॥

इति द्विविधलिङ्गशरीर स्थूलशरीरधर्मैः रहित एव देह रहित इत्युच्चते । एतेषा परधर्मत्वेऽपि भ्रान्तैजीवैः स्वात्मन्यारोपितत्वेन जीवधर्मत्वं ईश्वरस्य भ्रान्त्यभावात् । स्वस्मिनारोपिता भावेन तद्धर्मत्वं इतिबोध्यम् । तर्हि मम किमनर्थं शरीरधारणं कर्माभावा-भोगाभावः भोगभावात् शरीरस्य व्यर्थत्वं इत्याशङ्क्याह । सेवकेति सेवकानां भक्तानां हिताय विधृता विविधा लक्ष्मीनारायणपार्वतीशङ्करसावित्रीब्रह्माद्यातनुतति शरीरश्रेणी येन हे तादृशः । दुष्टेति स्फुटार्थम् । शासनकराणामाज्ञाप्रतिपालितानां धर्मनिष्ठानां परगते परमोक्षाय सर्वाभीष्टसाधकेत्यर्थः यद्वा शासनकराणां परा उत्कृष्टा गतिः स्वर्गमोक्षप्राप्तिरूपा दशा यस्मात् हे तादृशः ॥ २ ॥

---

1. ख. हे हर हित ।
2. ख. शीशकर ।
ग. शाननकर ।

पङ्कजभवमधुवधभववाणीलक्ष्मीगिरिसुते ।
गोपीगोपवकविलोपकलितसकलरिपुहते ॥ ३ ॥
रामचन्द्रकृष्णचन्द्रजानकीजयराधिके ।
मन्दरचरमन्मथहर शुम्भमथनसाधिके ॥ ४ ॥

पङ्कजेति । त्रिविधतनुं दर्शयति । पङ्कजात् विष्णो नाभिपद्मात् भूतः उत्पन्नः पङ्कजभवः शरीरोत्पत्त्या ··· ··· मुपचारादिति बोध्यम् ।

नारायणाख्यो भगवन् ब्रह्मलोक पितामहः ।
उत्पन्नः प्रोच्यते विद्वन्नित्य एवोपचारतः ॥

इति विष्णुपुराणवचनात् । अनेनाभिप्रायेणैव देवानां कार्यसिद्ध्यर्थमाविर्भवति । "सा यदा उत्पन्नेति तदालोके सा लोकाभ्यवधीयते ।" इति मार्कण्डेयपुराणवचनात् एवं सर्वत्रेश्वरविषये जन्मादूयर्थवचनं बोध्यम् । पङ्कजभूः भवः ब्रह्मन् मधुवधार्थं भवति मधुवधभव । मधोर्वधो येन हे मधुवध नारायण भवति संहारो यस्मात् स मधुवधभवः । यद्वा ··· ···दूयस्मात् स्थितिसृष्टिसंहार इति भावः । यद्वा भवत ब्रह्मादिस्तम्भपर्यन्तं ··· वाणी सरस्वती लक्ष्मी हे कमले गिरिसुते हे दुर्गे गिरिसुतेति हिमालयकन्यात्वेनाविर्भूतं ब्रह्मा तीति लोकानां तस्यै रेजे । नटवदितिपूर्वोक्तमेव । गोपीगोपाकृति वल्लवतया-विर्भूतश्रीकृष्णरूपस्य तस्य कर्मान्तरेण सम्बुद्धिं विधत्ते । वकं विलोपेति । वकं वकासुरं विलुप्तवान् विदारितवानिति वकविलोपः हे तादृशः । न केवलं वकं हतवान सि किन्तु अन्यापीत्याह कलितानां सकलानां अघासुरकंसासुरप्रभृतीनां रिपूणांहति वधो येन हे तादृशः ॥ ३ ॥

रामेति । रामोऽयं चन्द्र इव रामचन्द्रः कृष्णोऽयं चन्द्र इव कृष्णचन्द्रः सकललोकाह्लादजनकसौन्दर्य कोमल स्वभावो वा ज्योतिष्मन्तादिगुणैश्चन्द्र सादृश्यमन्यावतारसाधारणमिह

ब्रह्मपरमजगदनुपमधाम तव तु सकलकम् ।
योऽनुभजति कृष्ण जगति याति स परमकलङ्कम् ॥ ५ ॥
विलसदलघुकरपुण्यरघुनाथहृदयनन्दनम् ।
उत्तमयतिरेष[1] भणति पालय हरिचन्दनम् ॥ ६ ॥

संबोधयति । जानकीति अत्रपि जयपदेन चन्द्रोपममिति सूचितम् । मन्दरचरेति । मन्दरो गिरिविशेषस्तत्र लीलार्थं चरतीति हे तादृशः । मन्मथं कामदेवं हृतवान्नाशितवानिति मन्मथहरः हे तादृशः । शुम्भस्य मथनं नाशनं तस्य साधिके हे तादृक् । भर्वगिरिसुत इति पूर्वमुक्त्वापीह पुनरुपादानम् । रामजानकीकृष्णराधाशिवपार्वतीनां षण्णां अवताराणां विलक्षणसदृशमाधुर्यवोधार्थमिति ध्येयम् ॥ ४ ॥

ब्रह्मेति । मिथुनरूपस्य सगुणस्य ब्रह्मणो भजनेन निर्गुणब्रह्मणः प्राप्तिरूपं परमं पुरुषार्थमाह । हे परमब्रह्म हे कृष्ण तव सकलकं समूर्त्तिकं शरीरं धामस्वपरप्रकाशकं स्वरूपं यो जनोऽनुभजति अनुचिन्तयति श्रवणकीर्त्तनादिभिरनुसेवते वा जगति ससारिलोकसमूहमध्ये स एव परमुत्कृष्टं अकलङ्कं धाम याति प्राप्नोतीत्यर्थः । तथाच अनुपमेति सम्बोधनं समासेन धामविशेषणम् । कलाशब्दस्य मूर्त्ति-परतत्व नितरां हृदीति श्रीभागवतादिवचनं प्रमाणमनुसन्धेयम् ॥ ५ ॥

विलसदिति । इत्थं भगवन्तं स्तुत्वा नारदवचनभङ्गैव वाणपुराधिकारी जगन्नाथ हरिचन्दनोपरोधेन छलेन जगदुपकारार्थम् श्रीमुकुन्दविलासकाव्यं कृत्वा समापयन् तत् कल्याणं प्रस्तूयते । विलसन्ति प्रशमानानि अलघूनि महान्ति पुण्यानि यस्य तादृशपुण्यकं स चासौ रघुनाथश्चेति तस्य हृदयस्य नन्दनहृदयाह्लादकजनकपुत्रमित्यर्थः । हे अधहर यतिः सन्न्यासी एष श्रीमुकुन्दविलासकर्त्ता भणति याचते प्रार्थयते । कं प्रार्थयते तत् कथय इत्याशङ्क्याह । पालयेति हरिचन्दनं हरिरिव चन्द्र इव लोकान् चलयति आह्लादहतीति हरिचन्दनःतं पालय तस्यानिष्टं निवारय । इष्टं रचय पालयेत्यर्थः । अनिष्टं निवारणेष्टसम्पादनोभयस्यैव पालयेत्यर्थत्वात् ॥ ६ ॥

1. घ. अधरहरन्तयतिरेव ।

अष्टात्रिंशः प्रबन्धः

॥ मल्लाररागेण गीयते ॥

॥ एक तालेन ॥[1]

जयजयकृष्णपरमपुरुषेश्वर लीलाकल्पितनीलकलेवर
पूतनिकाहरदलितशकटवर सतृणावर्त्तकवत्सककर्त्तक ।
वत्ससुपालकवल्लववालक । यामुनतटनटचपलोपमपट ।
पाटितवकमुखघटितसकलसुख कपटसर्पहरदर्पकसुरुचिर ।
धवलकलवरजयनोतानव केलिकदम्वकमृदितप्रवम्वक
विदलितधनुकपालित धेनुक ।
तनुपशुरेणुकवादितवेणुक कालियमर्दक दाव द वादक ।[2]
दारित षत्ररकारिलवृषनर गोपीपटहरचापलपटुतर ।
जलधरसुन्दरविजितपुरन्दर गोवर्द्धनधरगोवर्द्धनक ।
कोटियुवतिवररासनटनपर चलकुटिलालकमञ्जुलभालक ।
चञ्चलकुण्डलसुवलसुकुण्डल जगदघखण्डकदुर्जनदण्डक ।
निर्गुणगुणमयदीनयाचय तारय भवभतजलधितरे ॥

जयजयेति । ग्रन्थसमापयितुं श्रीकृष्णसङ्कर्षणावताराभ्यां कृता लीला संक्षेपेण परमेश्वरं तल्लीलाभि संबो य प्रार्थयते तारय भवजलधितरे इत्यन्तासां दण्डकाभ्यां सतृणावर्त्तकेति तृणावर्त्तसहितं वत्सकं कर्त्तयतीति तृणावर्त्तकवत्सककर्त्तकः यद्वा स तृणावर्त्तको वत्सक कर्त्ता वत्सनाशो यस्मात् स तथा । यद्वा तृणावर्त्तकवत्सकयोः कर्त्ता विनाशः हे तत् सहित तत्कर्त्तरीत्यर्थः । चपलोपम पटवित्स दशाम्वरपाटितं विदारितं वकमुखं येन हेतादृशः केलिकदम्वके केलिसमूहसमये दलितः प्रलम्वोऽसुरो येन हेतादृशः । यद्वा केलिदकम्वेन यत्सुखं तेनैव न तु युद्धव्यापारेण निहतः प्रलम्वो येन हे तादृशः । यद्वा केलिकद•वात् कं सुखं यस्य हे केलिकदम्वक दलितप्रलम्वकेत्यत्र प्रहेवेति गुरुत्वभावो ज्ञेयः मृदिति पाये स एवार्थः

1. घ· रागतालचोलेखो नास्ति । 2. ख. दावदवा ।दक ।

इति बहुविधगानं संमिलत्तालतानं,
सुरमुनिवरगीतं कर्णपर्णोपनीतम्।
मधुरमधुरविणाध्वानधारापरीतं,
व्यधित सहवधूभिर्नन्दसूनुं निपीतम् ॥ १८ ॥

रचितनयनघूर्णं[1] धूयमानोत्तमाङ्गं,
स्खलितवसनवन्धं कम्पितस्वेदिताङ्गम्।
मधुवरमिव पीतं[2] कामिनीभिः सतृष्णं
विधिसुतकृतगीतं[3] मोदयामास कृष्णम् ॥ १९ ॥

कलिता धेनवो येन स तथा हे पालितधेनुक तनौ शरीरे पशुरेगवो गोधूलयो यस्य हे तादृश अकारितो वृषोधर्मो नरैयेन स कारितवृषनरः। यद्वा कारिता वृषाधर्मा यस्ते कारितवृषा तादृशा नरा यस्य स तथा यस्य भक्ता अपि अन्येषां गोवर्द्धनकरः हे तादृशः। कोटेयुर्वतिवरा यत्र तादृशो यो रासस्तस्मिन् यन्नटनं तत्परः। दुर्जनानधर्मिकान् दण्डयतीति दुर्जनदण्डकः तन्निग्रहकर्त्तेत्यर्थः हे गुणमय निर्गुण परमार्थतो गुणरहित गुणमय मायया नटगुण वहुलेत्यर्थः। गुणमयत्वेनैव जीवेश्वरभावकल्पना संसार्य संसारभावकल्पना च। तव परमेश्वरत्वेन मम तु जीवत्वेन माययैव सेव्यसेवकभावः। तयाच निरामय भवजलत्रे मां तारय पारं नयेति भावः। हे भवजलधितरे भवसमुद्रस्य नौकावतारणकारणेत्यर्थः।

इतीति। इति वहुशिर्धेति इति पदं दण्डकपर्यन्त बोधार्थम्। कर्णावे व पर्णं तत्र पुटके ताभ्यामुपनीतं गृहीतम्। ध्यानधारया परीतं व्याप्तं अकरोत् निपीतमास्वादितं शेषंस्फुटम् ॥ १७ ॥

रचितेत्यादि। धूयमानमुत्तमाङ्गं मस्तकं यस्मिन् येन वा तत्तथा। कम्पितं च स्वेदितं च जातघर्मजलं च अङ्ग शरीरं यस्मिन् येन वा तत्तथा शेषं स्फुटार्थमेव ॥ १८ ॥

अथेति। स प्रियाकः श्रीकृष्णगीतावेशानचिरमित्यर्थः। क्षणदाशेषं रात्रिशेषं शेषस्य अनन्तनागस्य इव कान्तिर्यस्य स शेष कान्तिनीरदस्तिरोदधे स प्रियाक श्रीकृष्णस्य नयनगोचरी वभूव इत्यर्थः ॥ १९ ॥

---

1. घ नयनयुगं। 2. घ· मधुरमेपिसुगीतं। 3. घ· विधिसुत गीतगानं।

अथ क्षणं मुनिर्मौनीरतायन्महतीं मुदा ।
निरीक्ष्य क्षणदाशेषं शेषकान्तिस्तिरोदधे ॥ २० ॥

गोप्योऽपि प्रापितानन्दा गोविन्देनानुमोदिताः ।
कान्तमन्तर्हितं वीक्ष्य गृहमीयुर्निजं निजम् ॥ २१ ॥

क्षणदे क्षणदा कान्ते वारुण्यां दिशि संगते ।
पूर्वे दिग् वदनं रक्तं व्यक्तं रोषादिवाभवत् ॥ २२ ॥

द्विजराजं गतश्रीकं वारुणीपतितं पतिम् ।
निरीक्ष्य रजनी शुद्धा भीतेवान्यत्र निर्गता ॥ २३ ॥

अथेति । टीका पूर्वपत्रे द्रष्टव्या ॥ २० ॥

गोप्यइति । प्रापितः आनन्दो याः श्रीकृष्णेन ताः यद्वा प्रापितः आनन्दो याभिः कृष्णं ताः प्रापितानन्दाः यद्वा प्रापितः संजात प्राप्ति आनन्दो यासां ताः श्रीकृष्णं अन्तर्हितं नारदवन्नयनागोचरीभूतं अवेक्ष्य ज्ञात्वा गृहं ययुरित्यर्थः ॥ २१ ॥

क्षणदेत्यादि । क्षणदाकान्ते चन्द्रे किंभूते क्षणदेतन् शब्देन आनन्दविशेषप्रदे रोषादिव मानादिव अत्र पूर्वापरदिशोः सपत्नीत्वं चन्द्रस्य पतित्वं व्यञ्जितम् शेषं स्फुटार्थम् ॥ २२ ॥

द्विजराजमित्यादि । द्विजराजं चन्द्रं गतश्रीकं गतशोभाकं वारुणीपतितं पश्चिमदिग्गतं पतिं स्वामिनं निरीक्ष्य दृष्ट्वा शुद्धा भीतेव न तु भीता अन्यत्र निर्गता अगोचरा बभूवेत्यर्थः । अथच रजन्या ब्राह्मणीत्वं तत्पत्यु ब्राह्मणश्रेष्ठत्वं तस्य च मन्दिरपतितत्वं तत्तया दिवसजायाः सपत्न्याः यामिन्यां अन्यत्र निर्गमनमित्यादि द्रष्टव्यम् ॥ २३ ॥

आसीन्निशासु संयोगो वियोगो दिवसेषु च ।
गोविन्दगोपिकापाल्योश्चन्द्रचन्द्रिकयोरिव ॥ २४ ॥

शशिना च निशा निशया च शशी
शशिना निशया च यथा गगनम्
हरिणा च रमा रमया च हरि
हरिणा रमया च तथा भुवनम् ॥ २५ ॥

न हरिः स पुलोमजया वियुतो
न हरिः प्रभया पृथगाकलितः ।
न हरिः सुधया विधुरोऽवधृतो
न हरीरमया रहितो हि तथा ॥ २६ ॥

आसीदित्यादि । निशासु प्रतिनिशं संयोगः संमिलनं वियोगो विप्रलम्भः विरह इत्यर्थः । दिवसेषु प्रतिदिवसं एतेन प्रतिदिवसमित्यत्र विचित्रलीलावर्णनमशक्यतया न कृतमिति सूचितम् । शेषं स्फुटार्थम् ॥ २४ ॥

शशिनेति । मिथुनरूपस्यपरस्य परमेस्वरश्य उपासनमेव युक्तमित्यभिप्रायेणाह । यथा तथेत्याभ्यां सर्वप्रथमान्तस्य तृतीयाकृते त्यन्वयः । यथा यादृक् तथा तादृक् इत्यर्थ ॥ २५ ॥

नहरिरिति विष्णु लक्ष्म्योः परस्परतादात्मेन वियोगेन सम्भवतीति बुद्ध्वा उपासनं विधेयं इत्यभिप्रायेणाह । हरिरिन्द्रः पुलोमजया न वियुतो न पृथगित्यर्थः । हरिः सर्पः प्रभया प्रभानाम्न्या तद्भार्य्यया न पृथक् आकलिता आकलितो निश्चितः शास्त्रज्ञैरितिशेषः । हरिः सूर्य्यमण्डलं प्रभया आलोक रूपेण तेजसा न पृथक् किन्तु तत्तेजोमयमेव भानुमण्डलमित्यर्थः । हरिश्चन्द्रः सुधया अमृतेन न विधुरो न विश्लेषितः न विरहित इत्यर्थः । अवधृते निश्चितः

गोसहस्रकसंचारी मञ्जुपीतांशुकोज्ज्वलः[1] ।
विलासी कमलोल्लासी हरिः प्रातः समुद्बभौ ॥ २७ ॥
अमितो मितवद्भासी स्वभासा सर्वभासकः ।
सर्वतोमुखपादायमात्मेव रविरुद्बभौ ॥ २८ ॥

तथाच सुधामयमेव चन्द्रमण्डलमित्यर्थः । हरिः विष्णुस्तथा रमया लक्ष्म्या न रहितो न पृथक् इत्यर्थः ।

लक्ष्मीमाधवयोर्भेदो नास्त्यैव परमार्थतः ।
चिद्रूपः परमात्मैको माययैव द्विधा स्थितिः ॥

इति पाद्मवचनात् ॥ २६ ॥

गोसहस्रेति । काव्याङ्गसूर्योदयवर्णनं श्रीकृष्णश्लेषेण दर्शयति । गो सहस्रकं किरणसहस्रं धेनुसहस्रं च तत्संचारी तच्चारणानुकूलव्यापारवान् । पीतांशुकाः पीतकिरणाः पीताम्बरं पीतैः तेन वा उज्ज्वलः शोभमानः विलसी विलासपदीप्तिमान् क्रीडावान् च कमलानि कमलां वा उल्लासयितुं शीलमस्य स तथा हरिः सूर्यः हरिः श्रीकृष्णः शेषं सुगमम् । एतेन श्लेषेण श्री सूर्यइव श्रीकृष्ण इव श्री सूर्य इति वा उपमालङ्कारो व्यङ्ग्यः । एवं यत्र यत्र श्लेषादिरस्ति तत्र तत्रैव उपमालङ्कारो ध्वननीय इति चिन्त्यम् ॥ २७ ॥

अमितमित्यादि । इदानीं सूर्यतेजोमण्डलस्य गुणब्रह्मतो निराकारब्रह्मणा सहभेदं व्यञ्जयितुं श्लेषेण तं विर्णयति । अयं रविः प्रत्यक्षीभूत श्री सूर्यः आत्मेव निराकार ब्रह्मेव उदबभौ इत्यन्यद्य । अमितोऽपरमिति अनेक योजनविस्तृतप्रमाणत्वात् मितवत् परिच्छिन्नवद्भासी भासमानो दृश्यमान इत्यर्थः । निराकारपक्षे अमितः परिच्छिन्न परिमाणविभिन्नमिति भासा रामकृष्णादिरूपेण तत्तद्विलस्तिपरिमाणशरीरपरिमाणव येन ज्ञायमानः स्वभासा असाधारणेन लोकेन सर्वभासकः सर्वप्रकाशकः निराकारपक्षे स्वभासा स्वप्रभुतया भासा तेजसा इत्यर्थः शेषपुरुषं यस्य भासा सर्वमिदं विभाति सचराचरमिति शात्येत् सर्वतोमुखाः सर्वव्यापकाः पदाः किरणाः यस्य सर्वतोमुख जल तदिव शुक्लाः पादा यस्य । कार्य कारणयोरभेदोपचारात् आदित्याज्जायते वृष्टिरित्यादि वचनात् । निराकारपक्षे सर्वतः सर्वेषां मुखानि पादाश्च मुखपादा यस्य सर्वात्मकत्वात् सर्वतः पाणिपादमित्यादिवचनात् ॥ २८ ॥

---

1. घ. शीताशुकोज्ज्वलः ।

श्रीनीलाद्रिनिवासिनो भगवतः पश्चादपश्चाद्दृशः
श्रीमद्बाणपुरान्तरेऽच्युतपुरे वारांनिधेरुत्तरे ।
जातं सालवतीतटे भगवतीदक्षेशयोरन्तिके ।
काव्यं श्रीहरिचन्दनस्य नृपते राज्ये सभातुष्टये[1] ॥ २६ ॥

ग्रहवसुशरचन्द्रोन्मानवर्षान्तिमेऽब्दे
क्षितिपतिकुलमौले क्ष्मापते श्रीशकस्य ।
वसुरसऋषिवेदैः संमिताब्दान्तवर्षे
समजनि कलिकालस्यैष काव्यप्रबन्धः[2] ॥ ३० ॥

इति श्रीमुकुन्दविलासे महाकाव्ये जलक्रीडाब्रह्माद्वैतप्रतिपादको नाम द्वादशः सर्गः ॥

---

1. क. शिव...षादविष्णोः कपटभजनो विष्णुविमुखो
ज्वलः शिवो दुर्गा यजन रहितौ तावपि तथा ।
विधा...वेन विजहति धरद्विगा
त्यरोप खलु कलुषाणामधिकृतिः

2. ख. ग. पुस्तके नास्ति । (अधिकपाठः)

प्रबन्धानुक्रमणिका

रागानुक्रमणिका

रागनामानि	सर्गाङ्काः	प्रबन्धाङ्काः	रागनामानि	सर्गाङ्काः	प्रबन्धाङ्काः
कल्याण	११	३२	मल्लार	१, ११, १२	२, ३४, ३८
कामोदी	१०	२६	मालवगौडा	४,५	११, १६
केदार	८, ८	२३, २४	मालश्री	४	१२
गुज्जरी	६, १०	१८,३०	ललित	३	१०
गुण्डकेरी	४	१३	वसन्त	२, ५, १२	७, १५, ३५
गौरी	७, ७	२२, २८	वाल धनासी	२	५
तोडी	१, २, ६, १२	१,८, [illegible],३६	विभास	६	२०
देशाक्ष (रूप)	११	३३	विहङ्गडा	८,१२	२५,३७
धनासी	२, १०	६, ३१	शा[illegible]ी	२	३
पीठमायूर	५	१७	सामगड़ा	६	२१
भैरव	६	१८	सारङ्ग	६	२७
मङ्गलगुज्जरी	२, ४	४, १४	सिन्धुड़ा	३	६

ग्रन्थान्तर्गततालनामानि

एकतालः	१२	३८	रूपकतालः	११	३३
पट्टतालः	१२	३६	सिंहनन्दनः	१२	३७

... .

श्लोकानुक्रमणिका

....